Palm-leaf. $18\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 155. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

Fol. 1*a* gives the name of the work and 1*b* is left blank.

कुवलयानन्दव्याख्या—बुधरञ्जनी.

KUVALAYĀNANDAVYĀKHYĀ: BUDHARAÑJANĪ.

Foll. 2*a*—153*a*. Foll. 153*b*, 154 and 155 are left blank.

This is a commentary on the Kuvalayānanda of Appayadīkṣita. For a full description of the text, see pages 81 and 82 of the Report on a Search for Sanskrit and Tamil MSS., No. 2. The name of the commentary here shown is based on nothing else than what is found in the title given on fol. 1*a*.

Wants the first leaf and breaks off in the Lōkōkti Alaṅkāra. It is stated in the MS. that the further portion is with a person named Vāsudēva Parabrahma Śāstrin.

Beginning:

चन्द्रालोकीयत्वनिश्चयेन तत्संदर्भवति तस्यापि तथात्वौचित्याच्च । यद्वा चन्द्रालोकीय एवायम् । अतो यथाश्रुतान्वये नानुपपत्तिः । अन्यथा चन्द्रालोकस्य प्रेक्षावत्प्रवृत्त्यङ्गप्रयोजनाभावदोषप्रसङ्गात् । उत्तरश्लोकेन कुवलयानन्दप्रतिज्ञायाः करिष्यमाणत्वेन प्रतिज्ञार्थमेतस्यावश्यापेक्षाविरहाच्च ।

* * * *

अथालंकाराणां शब्दार्थगतत्वेन द्विविधानां मध्ये स्वाश्रयभूतशब्दस्य प्रतीत्यन्तरङ्गत्वेन स्वतः पुरःस्फूर्तिकतया अलसपुरुषरञ्जनक्षमत्वेन संप्रदायानुरोधेन च शब्दालंकाराणां निरूपणे प्राथम्यौचित्येऽपि तेषां प्रायेण नीरसत्वेन कविभिरनादरणीयत्वात् तत्र विचारणीयबाहुल्याभावाच्च तानुपेक्ष्यार्थालंकारान् लिलक्षयिषुः तत्रापि ‘उपमैका शैलूषी संप्राप्ता चित्रभूमिकाभेदान् । रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥’ इत्युपमायाः सर्वालंकारप्रकृतित्वेनाभ्यर्हितत्वात् ‘तदिदं विश्वचित्रं ब्रह्मज्ञानादिवोपमाज्ञानात् । ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदसहिता सा ॥’ इत्युक्तरीत्या सर्वालंकारज्ञानस्याप्युपमालंकारज्ञानाधीनत्वात् तामेव प्रथमं लक्षयति—उपमेति । अत्रानन्वये अतिव्याप्तिवारणाय द्वयोरिति पदम् । कारिकायां लक्षणांशं व्याचष्टे यत्रेति । तत्रान्वयक्रमेण प्रथमं द्वयोरित्यत्र विवक्षितमाह —उपमानोपमेययोरिति ।

End:

कल्याणीति । लौकिकी लोकप्रसिद्धा । जीवन्तं नरं वर्षशतादपि आनन्द एति इति गाथा मा प्राति मां प्रति; ‘अभितः परितः—’ इत्यादिना प्रतियोगे द्वितीया ।

R. No. **819.**

Palm-leaf. 13¼ × 1⅓ inches. Foll. 53. Lines, 8 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

काव्यप्रकाशिकाव्याख्या—काव्यकौमुदी.
KĀVYAPRAKĀŚIKĀVYĀKHYĀ: KĀVYAKAUMUDĪ.

Foll. 1*a*—49*b*.

A commentary on the Kāvyaprakāśikā of Mammaṭa: by Dēvanāthatarkapañcānana, who is said to be the son of Gōvinda.

Breaks off in the fifth Ullāsa.

Beginning:

मातस्त्वं शिववल्लभासि जगतामानन्दमूलं शिवे
दीनोऽहं नगनाथनन्दिनि वचस्तन्मामकीनं शृणु ।
मध्ये(ध्ये)कान्तपराङ्मुखे कुरु तथा कारुण्यमापाततो
येन त्वच्चरणाम्बुजे मम मनः स्थेमानमालम्बते ॥
य एष कुरुते मनाविियदि(नो विवृति)गौरवीणां गिरां
स वामन इवाम्बरे हरिणलाञ्छनं वाञ्छति ।
लिलङ्घय(ङ्घिष)ति सिंहिकारमणकेसरं फेरुवत्
पतङ्ग इव पावकं नृहरिशावकं धावति ।
विन्यस्तं दूषणं येन गौरवीषु निरुक्तिषु ।
विन्यस्यत्यस्य शिरसि तर्कपञ्चाननः पदम् ॥

ननु ग्रन्थारम्भे प्रयोजनाभिधेयसबन्धो(न्धा) वक्तुमुचितो(ताः) न तु स्तुत्यादीत्यतोऽविगीतशिष्टाचारानुमितमङ्गलाचरणपरां कारिकामवतारयन्नाह—ग्रन्थारम्भ इति । ग्रन्थो वचनरचनाविशेषो महावाक्यमिति केचित् । महत्त्वं च विवक्षितार्थबोधने पदा(न्तराना)काङ्क्षत्वम् । आरम्भे आरम्भप्राक्काले, आरम्भनिमित्तं वा, तत्रापि सप्तम्यनुशासनात्, चर्मणि द्वीपिनमितिवत् ।

* * * *

Colophon:

इति महामहोपाध्यायालंकाराचार्यकुलश्रीगोविन्दमहानुभावचरितपञ्चमसुतमहामहोपाध्यायतर्कपञ्चाननठक्कारश्रीदेवनाथकृतकाव्यप्रकाशविवरणे काव्यकौमुद्यां प्रथम उल्लासः ॥

End:

रामपदं च सकलदुःखभाजनत्वं लक्षयत् सीतां विनापि जीविष्यामीति व्यञ्जयत् विप्रलम्भं व्यनक्ति । ताभ्यां सह राम इत्यर्थान्तरसंक्रमितवाच्यः सोऽनुग्राह्यानुग्राहकभावेन संकरः । रामोऽस्मीत्यनेन लक्षणामूलस्य विप्रलम्भस्य च व्यञ्जनात् स वाच्यव्यङ्ग्योऽप्यस्य प्राधान्यादित्यलं विस्तरः ॥

Colophon:

इति श्रीमहामहोपाध्यायतर्कपञ्चाननश्रीदेवनाथकृतायां काव्यकौमुद्यां काव्यप्रकाशविवरणे चतुर्थ उल्लासः ॥

अथ गुणीभूतव्यङ्ग्यनिरूपणार्थमुद्देशक्रमसंगतिं सूचयति—एवमिति । अगूढमिति वाच्यापेक्षया चमत्काराभावे व्यङ्ग्यस्य गुणीभावः ।

* * * *

वैदेहीति सीतासंबोधनम् । लङ्काभर्तुः दशमुखस्य । वदनपरिपाटी मस्तकपङ्क्तिः । (त)स्यामिषुघटना कृता । कुशलवौ सुतौ यस्याः सा कुशलवसुता सीता ।

Fol. 50 contains some Telugu stanzas. The remaining foll. are left blank.

R. No. **820.**

Palm-leaf. $17\frac{4}{8} \times 1\frac{1}{4}$ inches. Foll. 105. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

Fol. 1 is left blank.

(*a*) काव्यप्रकाशिका.

KĀVYAPRAKĀŚIKĀ.

Foll. 2*a*—76*a*. Fol. 76*b* is left blank.

A work on poetics by Mammaṭa in ten Ullāsas. The work is well known and has been printed.

Complete.

The transcription of the MS. is said to have been completed by Jandhyāla Svâmi Śāstri on Thursday, the 11th day of the bright fortnight in the month of Phālguna of the Śōbhakṛt year.

(*b*) रसतरङ्गिणी.

RASATARAṄGIṆĪ.

Foll. 77*a*—98*a*. Fol. 98*b* is left blank.

This is another work on the poetic sentiments like the Rasamañjarī, and by the same author as that, viz., Bhānudatta, son of Gaṇanātha. This is the same work as that described on page 353 under No. 1211 of the India Office Library Catalogue.

Complete.

The transcription is said to have been completed on Thursday, the 3rd day of the dark fortnight of Caitra in the year Krōdhi.

Beginning:

लक्ष्मीमालोक्य लुभ्यन्निगममुपहरन्मोचयन् यज्ञशत्रून्
क्षत्रं शोणाक्षि पश्यन् समिति दशमुखं वीक्ष्य रोमाञ्चमञ्चन् ।
हृत्वा हैयङ्गवीनं चकितमपसरन्म्लेच्छरक्तैर्दिगन्तान्
सिञ्चन्दन्तेन भूमिं पलमिव तुलयन्पातु मां पीतवासाः ॥
भारत्याः शास्त्रकान्तारश्रान्तायाः शैत्यकारिणी ।
क्रियते भानुना भूरिरसा रसतरङ्गिणी ॥
वाणी कमलिनी भानोरेषा रसतरङ्गिणी ।
हंसाः कृतधियस्तत्र युक्तमत्र प्रतीयताम् ॥
गिरां देवी तरङ्गिण्यां वारयेत् क्रूरवारणान् ।
यैर्भविष्यति लोकानामाविलो विरसो रसः ॥

हेतोः पूर्ववर्तित्वनियमादतः पूर्वमेव तस्योपन्यासः समुचितः । रसस्य हेतवो भावाः । तेन रसेभ्यः पूर्वं भावा एव निरूप्यन्ते । तेन रसानुकूलो विकारो भावः । विकारोऽन्यथाभावः । विकारस्तु द्विविधः—आन्तरः शारीरश्च । आन्तरोऽपि द्विविधः—स्थायीभावो व्यभिचारीभावश्चेति । शारीरास्तु सात्त्विकाः ।

End:

भावमुख्यो यथा—

सप्ताम्भोनिधितीरहीरपटलालंकारिणीं मेदिनीं
दातुं विप्रकुलाय योजितवतः संकल्पभोगोद्यमाम् ।
नाभीनीररुहात् सरोरुहभु(भ)वे तत्कालमाविष्कृते
हस्ताम्भोरुहभार्गवस्य किमपि व्रीडास्मितं पातु नः ॥

अत्राद्भुतरति(स)भावस्य मुख्यता दानवीररसो गौणः ।

विद्वद्वारिधराः स्नेहं तथा वर्षन्तु सन्ततम् ।
लभते विपुलां वृद्धिं यथा रसतरङ्गिणी ॥

अवगाहस्व वाग्देवि दिव्यां रसतरङ्गिणीम् ।
अस्मात्पदेन पद्येन रचय श्रुतिभूषणम् ॥

यावद्भानोः कृता कापि कालिन्दी भुवि नन्दति ।
तावत्तिष्ठतु मे भानोरेषा रसतरङ्गिणी ॥

Colophon:

इति श्रीकविकुलनाथगणनाथतनयमैथिलश्रीभानुदत्तविरचितायां रसतरङ्गिण्यामष्टमस्तरङ्गः ॥

इयं रसतरङ्गिणी नवरसोल्लसन्ती स्फुर-
द्विभावपरिपूरिता सकलतुल्यसंचारिणी ।
विजृम्भितविजृम्भितोत्कटतरानुभावा समा-
श्रितोज्ज्वलितसात्त्विका सपदि वीक्ष्यतां सज्जनाः ॥

भानुदत्तकविभानुवर्धिता प्रोल्लसन्नवरसाभिपूरिता ।
स्थायिभावयुतसात्त्विकोदया वर्धतां रसतरङ्गिणी स्वयम् ॥

Fol. 99 is left blank.

(c) दशरूपकपद्धतिः.

DAŚARŪPAKAPADDHATIḤ.

Foll. 100a—104b. Fol. 105 is left blank.

This is a treatise in dramaturgy dealing with the characteristics of the ten kinds of Rūpaka or dramatic composition. By Kuravi Rāmakavi, who appears to be the same as the commentator on the Bhāratacampū. He states that the work consists of 110 stanzas.

Complete.

Beginning:

अनवधिकरुणावारिधिमानम्यात्मनि सदाशिवं देवम् ।
व्युत्पित्सुमुदे कथयति दशरूपकवर्त्म कुरविरामकविः ॥

यद्यपि पूर्वं (कथितं चै)तद्दशरूपकादिषु तथापि ।
व्युत्पित्सूनामस्मिन् सुगमाय परं ममारम्भः ॥

नटैः प्रतिनिधीभूय स्वैः स्वैरभिनयैः स्फुटम् ।
सभायां नेतृचारित्ररूपणाद्रूपकं मतम् ॥

धीरोदात्तादिभेदेन नायको वहुधा मतः ।
नेतॄणां चरितं प्राज्ञैरिति वृत्तमितीर्यते ॥

End:

आभाषणं विचित्रार्थप्राप्तिः स्यादुपगूहनम् ।
इष्टकार्येक्षणं पूर्वभावः कार्योपसंहृतिः ॥

संहारः स्यात्प्रशस्तिस्तु शुभाशंसनमीरितम् ।
दशोत्तरशतश्लोकैर्दशरूपकपद्धतिः ॥

दर्शिता साधुकुरविकुलक्षीराम्बुधीन्दुना ।
रामसंख्यावता कृत्या प्रीयतां शंकरोऽनया ॥

R. No. 821.

Palm-leaf. 16⅛ × 1¾ inches. Foll. 127. Lines, 10 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

(*a*) **वासवदत्ता.**

VĀSAVADATTĀ.

Foll. 1*a*—20*a*.

By Subandhu. Same work as that described under R. No. 734(*a*) *ante*.

Complete.

(*b*) **वासवदत्ताविवरणम्.**

VĀSAVADATTĀVIVARAṆAM.

Foll. 20*b*—40*a*.

This is a commentary on the work described above. The author's name is not apparent.

Complete.

Beginning:

अनिर्वाच्या विद्याद्वितयसचिवस्य प्रभवतो
विवर्ता यस्येमा वियदनिलतेजोऽम्बुवसुधाः ।
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखा(ख)ज्ञानममलम् ॥

करबदरेति । अनेन स्वेष्टदेवता सरस्वती जयति सर्वस्मात्कार्यारम्भे प्रशस्यते । सूक्ष्ममतयः कवयः यस्याः प्रसादतः अखिलं भुवनतलं करबदरसदृशं पश्यन्ति सा देवी सरस्वती जयति सर्वस्मादुत्कृष्टा वर्तत इत्यर्थः । सरस्वतीशब्देनान्यत्र नदी कथ्यते । तदा करवत् अरसदृशमिति पदभङ्गः । सूक्ष्ममतयः अल्पबुद्धयः जलपक्षिणः यस्याः स्वच्छतया अरसदृशं जलप्रतिहरस(भासव)र्जितं समस्तं भुवनतलं जलस्वरूपं करवत् पश्यन्ति । कं जलं विः पक्षी अत एव कवयो जलपक्षिण इत्यर्थः ।

End:

चिराय श्वसन्नासीत् ना(न)मृत इत्यर्थः । शक्तिमोक्षणम् 'शक्तिकासूरुभे समे' इति वैजयन्ती, अत्र चेष्टा । रावणवधं क्रन्द्रमानस्येप(स्य) वधम् 'रावश (रवणः श)ब्दनो(नान्दीवादीनान्दीकरः)समौ' इत्यमरः । योगदृशा ध्यानदृशा । हृदयाभिलषितानि हृदयस्य निरूपितानि ॥

Colophon:

इति वासवदत्ताविवरणम् ॥

Fol. 40*b* is left blank.

(*c*) द्विरूपकोशः.

DVIRŪPAKŌŚAḤ.

Foll. 41*a*—46*b*.

By Śrīharṣa. Same work as that described under No. 1607 of the D.C.S. MSS., Vol. III.

Complete.

The transcription is said to have been completed by Kādambari Lakṣmīnārāyaṇa Śāstrin on Tuesday, the second of the dark fortnight of Phālguna in Sarvajit.

(*d*) मालतीमाधवम्.

MĀLATĪMĀDHAVAM.

Foll. 47*a*—76*b*.

This is one of the well known dramas of Bhavabhūti.

Complete.

(*e*) सूर्यशतकम्.

SŪRYAŚATAKAM.

Foll. 77*a*—83*a*.

By Mayūrakavi. Same work as that described under R. No. 139(*b*) *ante* and that described under No. 11314 of the D.C.S. MSS.

Complete.

Fol. 83*b* is left blank.

(*f*) नरकासुरविजयः.

NARAKĀSURAVIJAYAḤ.

Foll. 84*a*—91*b*.

This work is written in the form of a Rūpaka called Vyāyōga. By Dharmasudhī, son of Parvatēśvarasudhī of Vāraṇāsī family. It treats of the destruction of the demon called Narakāsura by Kṛṣṇa. This event is commemorated even to-day on the Dīpāvalī occasion.

The author appears to be the same as that of Sāhityaratnākara. He also mentions another work of his, viz., Bālabhāgavata.

Complete.

Beginning :

कस्तूरीपरिदिग्धमुग्धकमलावक्षोजबुद्ध्या द्रु(ध्रु)वं
नीलाद्रेः शिखरेषु नित्यकुतुकी दैत्यारिरव्यात्स नः ।
प्रत्यङ्गाभरणेषु दीप्तवपुषः सेवासु देवाः स्फुटं
यस्याशेषसुरात्मतां विदधते चन्द्रार्धचूडादयः ॥

नान्द्यन्ते सूत्रधारः—(सकौतुकमवलोक्य) अहो प्रामदमयन्ति (प्रमदयति) मम हृदयं प्राभातिकी लक्ष्मीः ।

शय्याम्बरं शशिनिशोरिव भाति लाक्षा-
ताम्बूलयोरिव रसैररुणाभ्रलेशैः ।
हारैः प्रसूननिकरैरिव तारकैश्च
चूर्णैः पटीरनिकरैरिव चन्द्रिकांशैः ॥

* * * *

नटी--आर्य कथं करणीयं सामाजिकहृदयानुरञ्जनम् ।

सूत्रधारः--विख्यातेऽजनि पर्वतेश्वरसुधीः श्रीवारणास्यन्वये
षण्णां दर्शनकारिणां सुमनसामैकात्म्यलीलायितः ।
धर्माख्येन मनीषिणा विरचितस्तत्सूनुना तादृशा
व्यायोगो रसजृम्भितोऽस्ति नरकध्वंसाभिधो नूतनः ॥

सूत्रधारः—अस्ति खल्वत्राप्यमृतनिष्यन्दी सकलतमस्स्तोमपरिपन्थी नरहरेर्नरकासुरनिबर्हणोदाहरणरूपो गुणशिरोमणिः । इत्थमेवैतत्कविना स्वकाव्ये बालभागवतेऽप्युदीरितम् ॥

End:

तथाप्येतदस्तु भरतवाक्यम्—

भामत्युल्लसिता रता विवरणे तन्त्रे निरूढिं गताः
सच्चिन्तामणयः समुज्ज्वलयशोलीलावतीवल्लभाः ।
सांख्यन्यायविचारचुञ्चुमतयः प्राभाकरप्रक्रिया-
धौरेयस्फुरणीभवन्त्ववनिपा विप्राश्च नित्योत्सवाः ॥
आबिभ्रता श्रियमुरस्यथ वा शिरोधा-
वब्जं च नाभिसुषिरे यदि वा कपर्दे ।
पाणौ सुदर्शनवताप्यथवा ललाटे
देवेन केनचिदिदं जगदेतु मोदम् ॥

Colophon:

इति धर्मसूरिविरचितो नरकासुरविजयो नाम व्यायोगः ॥

(*g*) प्रहसनम्.

PRAHASANAM.

Foll. 92*a*—102*a*.

This work is written in the form of another kind of Rūpaka called Prahasana by Vēṅkaṭēśvarakavi of Kauṇḍinyagōtra. Its chief aim is to produce laughter in the audience, by appealing to the ludicrous, in a vulgar manner.

Complete.

Beginning:

लम्बोदरस्य विगलत्कटिसूत्रलम्बि-
कौपीनपार्श्वविवृतो मदनध्वजोऽव्यात् ।

यं संभ्रमादुपसरन्नुरगभ्रमणे
चक्ष्वा विकर्षति षडाननयानबर्हिः ॥

* * * *

सूत्रधारः—अयि भरतपुत्र कदाचिदप्यदृष्टचरं प्रहसनं नाम नाटकं प्रदर्शयेति ।

पारिपार्श्विकः—(सहर्षम्) भाव, अनुगृहीताः स्मः ।

आबाल्यादतिदीर्घं यच्छन्नं प्रहसनं त्वया ।
प्रदर्शय तदेतेभ्यो दृष्ट्वामी हर्षमाप्नुयुः ॥

End:

तावत्पर्यन्तं निपुणिका जम्बुकस्य मम च भवतु । परस्तात् । नहि तस्य मनोरथमवहानिष्यामि । यो हि भुक्तमतं(वन्तं) प्रति [रूयाय] मा भुङ्क्था इति (ब्रूयात्) किं तेन कृतं स्यात् । कासरेण त्वलाबूस्तनी लब्धैव, तद्गृहिणी च दीर्घदन्तेन । सर्वेऽपि हर्षिताः । मयापि राजकारितवानरवेषेण प्रतिरथ्यं नीयमानेन सर्वेऽपि पौराः प्रतिनन्दिताः ।

दीर्घदन्तादयः—किमितोऽपि प्रियमस्ति भगवतः ।

वक्र—अत एव नन्दामि । तथापीदमस्तु भरतवाक्यम्—

भूपाः पुण्ये(ण्य)पथे चरन्तु भवतु क्षेमं नृणां सर्वतः
कालेष्वोषधयः फलन्तु कवयः खेलन्तु राज्ञां प्रियाः ।
(कौण्डिन्यान्वयमण्डनाय जनितश्रीदक्षिणामूर्तिना
काव्यस्यास्य च वेङ्कटेश्वरकविः कर्ता चिरं जीवतु) ॥

Colophon:

प्रहसनं समाप्तम् ॥

Fol. 102*b* is left blank.

(*h*) अन्यापदेशप्रस्तावः.

ANYĀPADĒŚAPRASTĀVAḤ.

Foll. 103*a*—106*b*.

Stanzas containing observations apparently on animate and inanimate nature with an ulterior didactic significance. This appears to be a collection rather than the composition of a particular author.

Beginning:

दिगन्ते [स्तूयन्ते] श्रूयन्ते मदमालिनगण्डाः करटिनः
करिण्यः कारुण्यास्प(द)मसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयति(तु)कस्मिन्मृगपतिः ॥ १ ॥

End:

छित्त्वा महागिरिशिलाः (करजा)ग्रजाग्र-
दुद्दामशौर्यनिकरेण करिभ्रमेण ।
देशे(दैवे)पराचि करिणामरिणा तथापि
कुत्रापि नापि खलु हा पिशितस्य लेशः ॥ ९९ ॥
गर्जितमाकर्ण्य मनागङ्के मातुर्निशार्धजातोऽपि ।
हरिशिशुरुत्पतितुं द्रा(गङ्गान्याकुञ्चच लीयते निभृतम्) ॥

Foll. 107—120 are left blank.

(*i*) रसार्णवसुधाकरः.

RASĀRṆAVASUDHĀKARAḤ.

Foll. 121*a*—127*a*. Fol. 127*b* is left blank.

By Sarvajña Śiṅgabhūpāla. Same work as that described under No. 21 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS., No. I.

Contains the Nāṭakaparibhāṣā only.

The transcription is said to have been completed on Sunday, the 5th day of the dark fortnight of Vaiśākha month in the year Sarvadhāri, by Kādambarī Rāmaṇṇa.

R. No. **822.**

Palm-leaf. 19¼ × 1½ inches. Foll. 148. Lines, 8 in a page. Telugu. Injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

(*a*) चित्रमीमांसा.

CITRAMĪMĀṀSĀ.

Foll. 1*a*—43*b*.

By Appayadīkṣita Same work as that described under No. 34 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS., No. 2, but with the addition of seven lines at the end as given below.

Breaks off in the Atiśayōktyalaṅkāra.

तत्राप्रस्तुत एव विषये प्रतिपादकातिरिक्तस्य प्रस्तुतविषयप्रतिपादनस्वभावात्

* * * *

ननु तथापि कमलमनम्भसीत्याद्यतिशयोक्तौ विषयिवाचकेन पदेन विषयो लक्ष्यते । तत्र लक्ष्यत्वस्य च सर्वैः ऐकमत्येनालंकारिकैर्व्यवहृतत्वात् ।

Fol. 44 is left blank.

(*b*) काव्यप्रकाशिकाटीका.

KĀVYAPRAKĀŚIKĀṬĪKĀ.

Foll. 45*a*—145*b*.

By Sarasvatītīrtha. Same work as that described under R.No. 197 *ante*, but without the first two benedictory stanzas given in the beginning therein.

Breaks off in the ninth Ullāsa.

End:

यथा रत्नावल्यादावित्याह—एवमिति ।

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायां गुणालंकारभेदनियतगुणनिर्णयो नामाष्टम उल्लासः ॥

Beginning :

गुणविवेकानन्तरमलंकाराणां कः प्रस्ताव इत्यत आह गुणेति । 'तददोषौ शब्दार्थौ' इत्यादिनिर्देशक्रमेणालंकारनिरूपणस्यायमेवावसर इत्यर्थः ।

* * * *

उभयविधोऽपि अयमुपमादेरलंकारान्तरस्य प्रतिभामुत्थापयति । अतश्चास्यार्थालंकारत्वमपि युक्तम् ; न शब्दालंकारत्वमेवेत्युद्भटमतमाशङ्कते—नन्विति । परिहरति—उच्यत इति । सामान्येन वाच्यव्यवहारे शाब्दत्वार्थत्वानिबन्धनं निश्चेतव्यं य.

Fol. 146a contains a horoscope. The remaining foll. are left blank.

R. No. **823.**

Palm-leaf. $18\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 173. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam

The first two foll. are left blank.

(*a*) आह्निकम्.

ĀHNIKAM.

Foll. 3*a*—147*a*. Foll. 18*b*, 86*b* and 147*b* are left blank.

Deals with the various religious rites to be performed by a twice-born daily from early morning to bed time in the night.

The transcription of this manuscript is said to have been completed by Śiṭa Mādhavadīkṣita on the 5th day of the bright fortnight of the Ādi month in the year Prabhava.

Incomplete.

Beginning :

वल्लवीवल्लभोऽस्माकं दद्याद्वाचं बुधस्तुताम् ।
यत्परिग्रहमात्रेण मूको वाचालतामगात् ॥

ननु त्वद्ग्रन्थारम्भ एवानुपपन्नः पुरातनानां मन्वादिधर्मशास्त्राणां (विद्यमा)नत्वात् । तेषां वा किं प्रयोजनम् ; येन तत्संग्रहरूपत्वादस्यापि तदेव भविष्यतीति चेत्, अत्र ब्रूमः ।

* * * *

(अस्मिं)श्च ग्रन्थे ब्राह्ममुहूर्तमारभ्याशयनं यान्यवश्यकर्तव्यानि कर्माणि तेषामनुष्ठानप्रकारः कथ्यते । तत्र ब्राह्मे मुहूर्ते शयनादुत्थाय करपादौ प्रक्षाल्य स्वेष्टदेवताचिन्तनं कुर्यात् । तथाच याज्ञवल्क्यः--

'ब्राह्मे मुहूर्ते उत्थाय चिन्तयेदात्मनो हितम् ।
धर्मार्थकामान् स्वे काले यथाशक्ति न हापयेत् ॥' इति ।

End:

अर्घ्यप्रक्षेपणं कुर्यादादित्याभिमुखो द्विजः ।
प्रातः प्रह्वः क्षिपेदप्सु मध्याह्न ऋजुसंस्थितः ।
अर्घ्यप्रक्षेपणं कुर्यात्सायं तूपविशन् भुवि ॥
पाणिभ्यां जलमादाय गायत्र्या चाभिमन्त्रितम् ।
गोश्रृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥
जले त्वर्घ्यं प्रदातव्यं जलाभावे तु तत्स्थले ।
संप्रोक्ष्य वारिणा सम्यक्पश्चादर्घ्यं यथाविधि ॥

Foll. 148*a*—150*b* contain some Telugu stanzas relating to Dharmaśāstra.

(*b*) अजपागायत्री.

AJAPĀGĀYATRĪ.

Foll. 151*a*—153*b*.

Slightly different from the work described under No. 5852 of the D.C.S. MSS., Vol. XII.

Complete.

(*c*) गायत्रीकल्पः.

GĀYATRĪKALPAḤ.

Foll. 154*a*—171*b*.

Similar to the work described under No. 7812 of the D.C.S. MSS., Vol. XV.

Complete.

Beginning:

दिवं च पृथिवीं चान्तरिक्षमथो सुवः । आपः शुन्धन्तु मेनसः । (आचम्य) तत्सवितुः ब्रह्मात्मने अङ्गुष्ठाभ्यां नमः । वरेण्यं विष्णवात्मने तर्जनीभ्यां नमः ।

End:

जपारम्भे च गायत्री जपान्ते कवचं तथा ।
गोस्त्रीब्रह्मवधान्मित्रद्रोहाद्याखिलपातकैः ।
मुच्यते सर्वपापेभ्यः परब्रह्माधिगच्छति ॥

Colophon:

इति श्रीगायत्रीकवचं संपूर्णम् ॥

(*d*) कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Foll. 171*b*—172*a*.

Same work as that described under No. 356 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*e*) हंसोपनिषत्.

HAṀSŌPANIṢAD.

Foll. 172*a*—173*b*.

Same work as that described under No. 841 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. **824**.

Paper. 16½ × 6⅝ inches. Foll. 114. Lines, 22 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstrī of Masulipatam.

पञ्चदशी—सव्याख्या.

PAÑCADAŚĪ WITH COMMENTARY.

The text is by Vidyāraṇya and the commentary by Rāmakṛṣṇa Vidvat. Same work as the one described under No. 4615 of the D.C.S. MSS., Vol. IX.

Complete.

This manuscript is said to have been copied by Jandhyāla Nṛsiṁhasōmayāji for his sole use, the copying having been completed on Friday, the 2nd day of the bright fortnight of the month of Māgha in the year Vibhava.

R. No. **825.**

Paper. 16¼ × 6½ inches. Foll. 10. Lines, 27 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

By Śaṅkarācārya. Same work as the one described under No. 4660 of the D.C.S. MSS., Vol. IX.

Contains the fourth Adhyāya only.

Fol. 10*b* is left blank.

R. No. **826.**

Paper. 9 × 6½ inches. Foll. 57. Lines, 30 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

The copying of this manuscript is said to have been completed by Jonnalagaḍḍa Veṅkaṭarāyaḍu on Wednesday, the 7th day of the dark fortnight of the Bhādrapada in the year Vṛṣa.

गीतगोविन्दम्—श्रुतिरञ्जनीसहितम्.

GĪTAGŌVINDAM WITH ŚRUTIRAÑJANĪ.

Foll. 2*a*—57*b*. Fol 1 is left blank.

A commentary on the Gītagōvinda of Jayadēva by Tirumalarāja, son of Śrīraṅgarāja of Ātrēyagōtra. Slightly different from

the one described under No. 22 of the Report on a Search for Sanskrit and Tamil MSS. of M. Seshagiri Sastri, No. 2.

Contains Sargas one to four only complete and the fifth incomplete.

Beginning:

उपदिशति कार्यजातं स्वप्ने मह्यं पितेव पुत्राय ।
यद्धाम नीरदाभं सेवे तद्भूमिपुत्रिकाह्वयम् ॥
न बुध्यते बुधैर्गीतगोविन्दस्यार्थगौरवम् ।
व्याख्यानशतकेनापि विहाय श्रुतिरञ्जनीम् ॥
रागद्वेषविहीनैरतिरसिकैः परगुणस्तवने ।
विद्वत्कविभी रसिकैस्स्तोतव्या कृतिरसौ विमला ॥
इत्यलङ्कारसङ्गीतशब्दशास्त्रविचक्षणैः ।
विलोकनीया विद्वद्भिर्व्याख्यासौ श्रुतिरञ्जनी ॥
धवलजलदवर्णं (. . .) दक्षिणामूर्तिमीडे ॥

Colophon:

इति श्रीमदखिलदेवतासार्वभौमरघुनाथप्रसादलब्धसकलसाम्राज्यसोमान्वयाभरणधरणीवराहात्रेयगोत्रपवित्रश्रीरङ्गराजपुत्रतिरुमलराजविरचितायां गीतगोविन्दव्याख्यायां श्रुतिरञ्जनीसमाख्यायां प्रथमः सर्गः ॥

R. No. 827.

Paper. 12¼ × 7⅝ inches. Foll. 54. Lines, 35 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

गीतगोविन्दम्—श्रुतिरञ्जनीसहितम्.

GĪTAGŌVINDAM WITH THE COMMENTARY ŚRUTI RAÑJANĪ.

Same work as that described under No. 22 of the Report on a Search for Sanskrit and Tamil MSS. of M. Seshagiri Sastri, No. 2

Contains Sargas five to twelve complete.

This manuscript is said to have been copied by Jonnalagaḍḍa Vēṅkaṭarāyuḍu for Nṛsiṁha Śāstri, son of Jandhyāla Svāmi Śāstri, on Saturday, the 1st day of the dark fortnight of Āśvija in the year Vṛṣa.

R. No. **828.**

Paper. 9½ × 6¼ inches. Foll. 84. Lines, 17 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

अनर्घराघवम्.

ANARGHARĀGHAVAM.

By Murāri. Same work as the one described under R.No. 132(*b*) *ante.*

Complete.

This manuscript is said to have been copied by Jandhyāla Svāmi Śāstri.

Fol 84*b* is left blank.

R. No. **829.**

Paper. 8⅛ × 6¼ inches. Foll. 22. Lines, 29 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

अभिज्ञानशाकुन्तलव्याख्यानम्—कुमारगिरिराजीयम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM : KUMĀRAGIRIRĀJĪYAM.

By Vēmabhūpāla. Same work as that described under R.No. 295(*b*) *ante.*

Fol. 22*b* is left blank.

Contains four acts only.

R. No. **830.**

Paper. 8⅛ × 6½ inches. Foll. 53. Lines, 16 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

रसगङ्गाधरः.

RASAGAṄGĀDHARAḤ.

A treatise on poetics and rhetoric: by Paṇḍita Jagannātha Paṇḍitarāja, son of Pērubhaṭṭa and Lakṣmī. The author is said to have learnt in Benares the Vēdānta, the Nyāya and Vaiśēṣika, the Mīmāṁsā and the Mahābhāṣya from Jñānīndrabhikṣu, Mahēśa (Mahēndrācārya), Dēva (Khaṇḍadēva) and Śēṣa(Vīrēśvarapaṇḍita) respectively.

Contains the first Ānana only.

Beginning :

स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् ।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥
श्रीमज्ज्ञानीन्द्रभिक्षोरधिगतनिखिलब्रह्मविद्याप्रपञ्चः
काणादीराक्षपादीरपि गहनगिरो यो महेशादवेदीत् ।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत्सर्वविद्याधरो यः ॥
पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥
निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं
मयोन्नीतो लोके ललितरसगङ्गाधरमणिः ।
हरन्नन्तर्ध्वान्तं हृदयमधिरूढो गुणवता-
मलङ्कारान् सर्वानपि विगतगर्वान् रचयतु ॥
परिष्कुर्वन्त्वर्थान् सहृदयधुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भवति ।
तिमीन्द्राः संक्षोभं विदधतु पयोधेः पुनरिमे
किमेतेनायासो भवति विपुलो मन्दरगिरेः ॥

निर्माय नूतनमुदाहरणानुरूपं काव्यं मयात्र निहितं न परस्य किञ्चित्।
किं सेव्यते सुमनसां मनसापि गन्धः कस्तूरिकाजननशक्तिभृता मृगेण ॥

मननतरि[वि]तीर्णविद्यार्णवो जगन्नाथपण्डितनरेन्द्रः ।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम् ॥
रसगङ्गाधरनामा सन्दर्भोऽयं चिरं जयतु ।
किं च कुलानि कवीनां निसर्गसम्यञ्चि रञ्जयतु ॥

तत्र कीर्तिपरमाह्लादगुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य व्युत्पत्तेः कविसहृदययोरावश्यकतया गुणालङ्कारादिभिर्निरूपणायैतस्मिन् विशेष्यतावच्छेदकं तदितरभेदबुद्धौ साधनं च तल्लक्षणं तावन्निरूप्यते—रमणीयार्थप्रतिपादकः शब्दः काव्यम् ।

End:

एवमेषां रसादीनां प्राधान्येन निरूपितानि उदाहरणानि गुणभावे तु वक्ष्यन्ते नामानि च । तत्र प्राधान्य एवैषां रसादित्वमन्यथा तु रत्यादित्वमेव नामनि रसपदं तु रत्यादिपरमित्येके । अस्यैव रसादित्वं किं तु न ध्वनिव्यपदेशहेतुत्वमित्यपर इति ॥

Colophon:

इति महोपाध्यायपदवाक्यप्रमाणपारावारपारीणश्रीपेरुभट्टस्य सूरेः सूनुना पण्डितराजेन जगन्नाथेन निर्मिते रसगङ्गाधरे रसनिरूपणात्मकं पूर्वमाननम् ॥

अथ संलक्ष्यक्रमध्वनिर्निरूप्यते—स ता.

R. No. **831.**

Paper. 8 × 6¼ inches. Foll. 16. Lines, 22 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

धनञ्जयविजयव्यायोगव्याख्यानम्—लक्ष्मीकान्तीयम्.

DHANAÑJAYAVIJAYAVYĀYŌGAVYĀKHYĀNAM: LAKṢMĪKĀNTĪYAM.

This is a commentary on Kāñcana's Dhanañjayavijaya, which is described under No. 18 of the Report on a Search for

Sanskrit and Tamil MSS. of M. Seshagiri Sastri, No. 1. The commentary is called Lakṣmīkāntīya after the name of the author who is called Lakṣmīkānta and who was the so of Svāmisūri of Śāṇḍilyagōtra. The commentator states that this is his third work and that he consulted the Vasantarājīya (Nāṭyaśāstra?), the Bhārata and the Daśarūpaka before commenting on this.

Complete.

Beginning:

हरिस्ते कल्याणं कलयतु तरां कौस्तुभविभा-
शुभायां श्रीवायां जलनिधिसुता नूत्नसुरते ।
विपर्यस्तः शम्भुः किमिति चकिता येन हसता
परीरब्धा रेजे स्फुटपुलकमन्दाक्षमधुरम् ॥

* * * *

दृष्ट्वा वसन्तराजीयं भारतं दशरूपकम् ।
व्यायोगं काञ्चनप्रोक्तं व्याकुर्वे स्फुटभाषितैः ।
पितामहो यस्य कलाविशारदः पिता बहुग्रन्थविधानविश्रुतः ।
सहोदरौ शास्त्ररहस्यशिक्षितौ स काञ्चनोक्तीर्विवृणोति यत्नतः ॥
शाण्डिलचगोत्रसद्रत्नस्वामिसूरिसुतोत्तरः ।
लक्ष्मीकान्तोऽम्बते टीकां लक्ष्मीकान्तीयसंज्ञिताम् ॥

अथ तत्र भवान् सकलकलाप्रवीणः काञ्चननामकविः

* * * *

अर्जुनविजयेन व्यायोगसंज्ञितं मार्गरूपकविशेषं चिकीर्षुरादौ कर्तव्यपूर्वरङ्ग-प्रधानाङ्गभूतां नान्दीमुपनिबध्नाति हरेरिति । लीलावराहस्य सागरे हिरण्याक्ष-निक्षिप्तक्षितिमण्डलोत्क्षेपणाय विलासविधूतसूकरस्वरूपस्य ।

End:

व्याख्यातं काञ्चनप्राज्ञप्रोक्तं व्यायोगरूपकम् ।
बालैर्जिज्ञासुभिर्ज्ञेया दृश्यग्रन्थस्य पद्धतिः ॥

अज्ञानाद्यन्मया प्रोक्तं प्रमादाद्वा प्रवेशितम् ।
तदत्र क्षम्यतां प्राज्ञैर्ये प्रथन्ते गुणोत्तराः[1] ॥

जयति जगति यावत्पद्मिनीप्राणनाथः
कुमुदविपिनबन्धुस्तारकास्ताः समस्ताः ।
विबुधजनमनोज्ञस्तावदस्यां पृथिव्यां
मम कृतिषु तृतीयो वर्धतां[2] ग्रन्थ एषः ॥

R. No. **832.**

Paper. 8½ × 6¾ inches. Foll. 26. Lines, 23 on a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

परमार्थसारः—सव्याख्यः.

PARAMĀRTHASĀRAḤ WITH COMMENTARY.

A short summary in fifty stanzas of the Āryā metre on the principles of the Advaita-Vēdānta: by Śēṣa. The work is also called Śēṣārya in honour of its author.

Complete

Beginning :

निरस्तनिखिलानर्थपरमानन्दरूपिणे ।
नृसिंहाय नमस्कुर्मः सर्वधीवृत्तिसाक्षिणे ॥

वन्देऽहं वसुधाधामवासवाद्यैः सुपूजितम् ।
वासुदेवप्रियं शेषमशेषसुखदं गुरुम् ॥

आदौ शेषं नत्वा तत्कृपया लब्धबोध आचार्यात् ।
आर्यापञ्चाशीतिं व्याख्यास्येऽहं मुमुक्षुजनसेव्याम् ॥

इह खलु समस्तवसुधाधारभूतश्रियःपतेरन्तरङ्गभक्तः आद्यः शेषाख्यो भगवान् इदं जगत् दुःखसागरे निमग्नमभिवीक्ष्य . . . . तत्त्वज्ञानसाधनं परमार्थसाराख्यं प्रारिप्सुः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन

---

[1] गुणोत्सुकाः इति पाठान्तरम्. [2] मोदतामेष यत्नः इति पाठान्तरम्.

परिसमाप्तिप्रचयनिगमनाभ्यां शिष्टाचारपरिप्राप्तस्वेष्टदेवतानमस्काररूपं मङ्गलमाचरिष्यन्

*   *   *   *

मुमुक्षुणा केनचिच्छिष्येण प्रार्थितः सन् तदनुग्रहार्थं प्रथमश्लोकेन गुरूपसत्तिप्रकारं तावद् दर्शयति—

गर्भगृहवाससम्भवजन्मजरामरणविप्रयोगाब्धौ ।
जगदालोक्य निमग्नं प्राह गुरुं प्राञ्जलिश्शिष्यः ॥

गर्भगृहवाससम्भवश्च जन्मजरामरणं च विप्रयोगश्च गर्भगृहवाससम्भवजन्मजरामरणविप्रयोगास्त एव अब्धिवत् दुस्तरत्वसाम्यादब्धिः दुःखसमुद्र इति यावत् ।

End:

उक्तमर्थमुपसंहरति—

वेदान्तशास्त्रमखिलं विलोक्य शेषस्तु (इह) जगदाधारः ।
आर्यापञ्चाशीत्या बबन्ध परमार्थसारमिदम् ॥

वेदान्तो नामोपनिषत्प्रमाणं महावाक्ययुक्तं

*   *   *   *

इदं शास्त्रं बबन्ध कृतवान् । मुमुक्षुत्वाभिमानो यथा नास्ति तथा शिष्याणामपि स नास्ति इति प्रदर्शनार्थं प्रथमपुरुषप्रयोगः ॥

Colophon:

इति शेषार्या सव्याख्या समाप्ता ॥

R. No. **833.**

Paper. $11\frac{5}{8} \times 5\frac{3}{8}$ inches. Foll. 64. Lines, 16 in a page. Telugu. Slightly injured.

Presented in 1913-14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

ब्रह्मोत्तरखण्डः (स्कान्द).
BRAHMŌTTARAKHAṆḌAḤ (SKĀNDA).

Same work as that described under No. 2307 of the D.C.S. MSS., Vol. IV, Part I.

Contains Adhyāyas 1 to 22 complete.

R. No. **834.**

Paper. 11⅝ × 5⅜ inches. Foll. 182. Lines, 16 on a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

शिवरहस्यखण्डः (स्कान्द).

ŚIVARAHASYAKHAṆḌAḤ (SKĀNDA).

Same work as that described under No. 2315 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Kāṇḍas Sambhava, Āsura, Vīramāhēndra, Dēvatā and Dakṣa.

R. No. **835.**

Paper. 7⅞ × 6⅛ inches. Foll. 34. Lines, 31 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. J. Gaurīnātha Śāstri of Masulipatam.

नैषधम् — सव्याख्यानम्.

NAIṢADHAM WITH COMMENTARY.

The well-known poem of Śrīharṣa with the commentary of Mallinātha.

Contains the thirteenth and the fourteenth Sargas.

The transcription of this manuscript is said to have been completed by Jandhyāla Lakṣmīkānta on Monday, the 6th day of the dark fortnight of the Bhādrapada month in the year Krōdhana.

R. No. **836.**

Palm-leaf. 16 × 1½ inches. Foll. 250. Lines, 7 in a page. Telugu. Fair.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol. IV, Part I

Contains Skandhas one to eight.

R. No. **837**.

Palm-leaf. 16×1½ inches. Foll. 237. Lines, 8 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

भागवतम्.

BHĀGAVATAM.

Same work as that described under No. 2161 of the D.C.S. MSS., Vol. IV. Part I.

Contains Skandhas nine to twelve.

R. No. **838.**

Palm-leaf. 15⅜×1⅝ inches. Foll. 154. Lines, 6 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

(*a*) कूर्मपुराणम्.

KŪRMAPURĀṆAM.

Foll. 1*a*—130*b*.

Same work as that described under No. 2107 of the D.C.S. MSS., Vol. IV, Part I, but with a different colophon as given below.

Contains the Uttarabhāga complete.

Colophon :

इति श्रीकौर्मे महापुराणे षट्सहस्रान्तब्राह्मीसंहितायामुपरिभागे व्यासगीतासु कूर्मरूपजनार्दननारदादिमहर्षिसंवादप्रकारेण सूतर्षिसंवादे प्रतिसर्गलक्षणपुराणश्रवणफलविशेषकथनं नाम सप्तचत्वारिंशोऽध्यायः ॥

Foll. 131—133 are left blank.

(*b*) अष्टकवर्गः.

ASṬAKAVARGAḤ.

Foll. 134*a*—148*b*.

A treatise relating to horoscopy in astrology. Similar to the work described under R. No. 371(*d*) *ante*.

Incomplete.

Beginning:

चक्रं विलिख्य सहलग्नदिवाकराद्यैः
सूर्यान्तलग्नभवनान्तवियच्चराणाम् ।
वाक्याष्टकोपगतभूरिनियोजिताश्चे-
द्भिन्नाष्टवर्गगणिताखिलबिन्दवः स्युः ॥

*   *   *   *

मिश्रं फलं भवति सागरबिन्दुयोगा-
द्रोगापवादभयदो यदि शून्यभावः ।
एकादिबिन्दुयुतभानुमुखग्रहाणां
भिन्नाष्टवर्गजनिसर्वबलं प्रवच्मि ॥

End:

प्रवासं दारसौभाग्यं सप्तमस्थानतो विदुः ।
आधिव्याधिमृतीर्नाशमष्टमं च निरीक्षयेत् ॥
भाग्यस्था.

Foll. 149—154 contain some stanzas taken from various poetical works intended to illustrate different figures of speech.

R. No. **839**.

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 76. Lines, 6 on a page. Telugu. Fair.

Presented in 1913-14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

Fol. 1*a* is left blank.

(*a*) तुलसीषोडशनामस्तोत्रम्.

TULASĪṢŌḌAŚANĀMASTŌTRAM.

Fol. 1*b*.

Herein the Tulasī plant or the holy basil is conceived as a goddess and eulogised under sixteen different names.

Complete.

Beginning and **End**:

श्रीलक्ष्मीः श्रीमहादेवी श्रीबृन्दावनवासिनी ।
तुलसी भक्तशुभदा महातीर्थस्वरूपिणी ॥
ब्रह्महत्यादिपापघ्नी सर्वसौभाग्यदायिनी ।
विष्णुप्रिया विष्णुमयी विष्णुवक्षःस्थलालया ॥
समस्तपुण्यफलदा सर्वसंपत्प्रदायिनी ।
मुक्तिप्रदा मुनिस्तुत्या नित्यमङ्गल्यकारिणी ॥
षोडशैतानि नामानि स्त्रियो वा पुरुषा अपि ।
पठन्ति तुलसीभक्त्या त्रिषु कालेषु मानवाः ॥
मुच्यन्ते सर्वपापेभ्यस्ते गच्छन्ति हरेः पदम् ।
नमस्ते तुलसीदेवि नमस्ते पापनाशिनि ।
गृहाणार्घ्यं मया दत्तं मम पापानि नाशय ॥
तुलसीमृत्तिकां फाले तिलकं धारयेत्सदा ।
मार्जयेत्तुलसीतीर्थे गङ्गास्नानफलं लभेत् ॥

(*b*) विष्णुसहस्रनामस्तोत्रभाष्यम्.

VIṢṆUSAHSRANĀMASTŌTRABHĀṢYAM.

Foll. 2*a* – 76*b*.

By Śaṅkarācārya. Same work as that described under No. 9064 of the D.C.S. MSS., Vol. XVII.

Complete.

This manuscript is said to have been copied by Bhaṭṭiprōlu Siṅgayya for the use of Janamañci Brahmaṇṇa from the manuscript of Vāḍapalli Narasiṁhācārya, the copying having been completed on Saturday, the 2nd day of the bright fortnight of the Śrāvaṇa month in the year Kālayukti.

R. No. **840.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 32. Lines, 5 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

रुद्रप्रश्नभाष्यम्.

RUDRAPRAŚNABHĀṢYAM.

By Śāyaṇācārya. Same work as that described under Nos. 109 and 129 of the D.C.S. MSS., Vol. I, Part II.

Complete.

R. No. **841.**

Palm-leaf. $14\frac{5}{8} \times 1$ inches. Foll. 139. Lines, 6 on a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

विष्णुपुराणटीका.

VIṢṆUPURĀṆAṬĪKĀ.

By Śrīdharasvāmin. Same work as that described under No. 2286 of the D.C.S. MSS., Vol. IV, Part I.

Breaks off in the thirty-sixth Adhyāya in the fifth Aṁśa.

R. No. **842.**

Palm-leaf. $17\frac{3}{8} \times 1\frac{3}{8}$ inches. Foll. 101. Lines, 7 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

Foll. 58 and 72*b* are left blank.

निर्णयसिन्धुः.

NIRṆAYASINDHUḤ.

By Kamalākarabhaṭṭa. Same work as that described under No. 3128 of the D.C.S. MSS., Vol. VI.

Breaks off in the second Paricchēda.

R. No. **843.**

Palm-leaf. $10\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 32. Lines, 5 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam

(*a*) आपस्तम्बपशुमैत्रावरुणम्.
ĀPASTAMBAPAŚUMAITRĀVARUṆAM.

Foll. 1*a*—**11***a*. Fol. 11*b* is left blank.

Contains directions for the sacrificial priest Maitrāvaruṇa in connection with the sacrifice Paśubandha conducted in accordance with the school of Āpastamba.

Complete.

Beginning:

आपस्तम्बमतानुसारेण पशुमैत्रावरुणमुच्यते । मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णाम्यवक्रो मिथुने भूयासम् । इति दण्डं गृहीत्वा होतृवज्जपहोमश्च अग्ने नयेत्यादि होतायक्षदग्निम् ।

End:

तान्यस्मा आ च शास्वाच गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥

Colophon:

समाप्तोऽयमृषभमैत्रावरुणः ॥

(*b*) आपस्तम्बपशुहौत्रम्.
ĀPASTAMBAPAŚUHAUTRAM.

Foll. 12*a*—14*a*.

On the duties to be performed by Hōtṛ priests in animal sacrifices performed in accordance with the school of Āpastamba.

Incomplete.

Beginning:

आपस्तम्बमतानुसारेण पशुहौत्रमुच्यते--तत्र चाग्नावैष्णवेष्टिः । मयि गृह्णामीत्यादि पञ्चदश सामिधेन्यः । आवाहनकाले, अग्निमग्न आ वह । अग्नाविष्णू आ वह ।

End:

अथ यूपाञ्जनं यूपायज्यमानायेति प्रेषितः । हिं भूर्भुवः सुवरोमञ्जन्ति त्वामध्वरे देवयन्तो.

Foll. 14*b*—19*b* are left blank. Foll. 20*a*—23*a* contain copies of some documents in Telugu.

Fol. 23*b* is left blank.

(*c*) पार्थिवलिङ्गपूजाविधानम्.

PĀRTHIVALIṄGAPŪJĀVIDHĀNAM.

Foll. 24*a*—27*b*.

Slightly different from the work described under No. 8652 of the D.C.S. MSS., Vol. XVI.

Complete.

(*d*) पञ्चाक्षरीमन्त्रः.

PAÑCĀKṢARĪMANTRAḤ.

Foll. 28*a*—29*a*.

Slightly different from the work described under No. 6572 of the D.C.S. MSS., Vol. XIII.

Complete.

Fol. 29*b* is left blank.

(*e*) समुद्रस्नानविधिः.

SAMUDRASNĀNAVIDHIḤ.

Foll. 30*a*—32*b*.

Lays down that only on new moon and full moon days sea-bath should be resorted to by a twice-born and also deals with the ceremonial details to be performed by him preliminary to taking his bath therein on those occasions.

Complete.

Beginning:

अथातः समुद्रस्नानविधिं व्याख्यास्यामः—तत्रामावास्यायां पौर्णमास्यां वा स्नायान्नान्यतिथिषु । अक्षतिलाम्बुमृद्दूर्वादर्भैः सह तीरं गत्वा तदितराद्भिः पादौ हस्तौ च प्रक्षाल्य पवित्रपाणिः प्राङ्मुखस्तिष्ठन् ।

End:

पर्वदिनेषु सुस्नायात् । कृष्णाङ्गारकचतुर्दशीपर्वयुक्ते समुद्रस्नातस्य जन्मसहस्रार्जितपापं नश्यति । ब्राह्मणः पूतो भवतीत्याह भगवान् बोधायनः ॥

Colophon:

समुद्रस्नानविधिः संपूर्णः ॥

R. No. **844.**

Palm-leaf. $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 72. Lines, 8 in a page. Telugu. Good.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

(*a*) परशुरामसूत्रम्.

PARAŚURĀMASŪTRAM.

Foll. 1*a*—18*a*. Fol. 18*b* is left blank.

Same work as that described under No. 5674 of the D.C.S. MSS., Vol. XII.

Complete.

(*b*) सौभाग्यनाभिविद्यामन्त्रः.

SAUBHĀGYANĀBHIVIDYĀMANTRAḤ.

Foll. 19*a*—22*b*.

Same work as that described under No. 7597 of the D.C.S. MSS., Vol. XIV, but with the addition of the following lines at the end.

Complete.

श्रीं ह स क ह ल ह्रीं स क ल ह्रीं श्रीं इति कादिहादिविद्ये यथाशक्ति जपित्वा

* * * *

परदेवतायै सम्यगर्चयेत् । ओं तत्सत् ॥

श्रीमत्पञ्चदशाक्षर्या लक्षावृत्त्या तु यत्फलम् ।
नाभिविद्या(द्यां) सकृज्जप्त्वा तत्फलं लभते ध्रुवम् ॥

Colophon:

नाभिविद्या समाप्ता ॥

(*c*) गायत्रीपञ्चदशीमूलोद्धारः.

GĀYATRĪPAÑCADAŚĪMŪLŌDDHĀRAḤ.

Foll. 22*b* and 23*a*.

On fifteen different ways of repeating the Gāyatrīmantra in conjunction with the letters forming the Śāktamantra formula.

Complete.

Beginning:

ओं भूः ओं भुवः ओं सुवः ओं महः ओं जनः ओं तपः ओं सत्यं ओं श्रीं ह्रीं क्लीं ऐं सौः ओं श्रीं ह्रीं तत्सवितुर्वरेण्यम् । क ए इ ल ह्रीं भर्गो देवस्य धीमहि ।

End:

विद्याद्यं चरणं द्वितीयमपरं खण्डं तृतीयं पुनः
तार्तीयं च तुरीयकं द्वयमिदं शक्त्यादिमान्तं शिरः ।
तल्लक्षाधिककोटिकोटिगुणितं जप्यैकमात्रेण तु
लब्ध्वा विष्णुपदं तथा शिवपदं तुर्ये परे ब्रह्मणि ॥

(*d*) दीक्षाविधिः.

DĪKṢĀVIDHIḤ.

Foll. 23*a*—27*b*.

Similar to the work described under No. 5657 of the D.C.S. MSS., Vol. XII.

Also gives the various kinds of initiation of a student with a view to befit him for the performance of different religious duties.

Complete.

Beginning:

तत्रादौ मङ्गलस्नानं कृत्वा शुद्धवस्त्रयुतं शिष्यं कृत्वा दीक्षां कुर्यात् । तद्यथा आदौ संकल्पं कृत्वा

* * * *

यथोचितं कर्म कुरुष्वेति गुरुं प्रति शिष्यो वदेत् । करवाणीति गुरुरित्यादि दीक्षादिकं सर्वं कुर्यात् । अथ दीक्षानामानि—वर्णदीक्षा, कलादीक्षा, स्पर्शदीक्षा, वाग्दीक्षा, दृग्दीक्षा, बोधदीक्षा, शाक्तदीक्षा, मन्त्रदीक्षा, वेधदीक्षा, यामणदीक्षा, कालदीक्षा, शाम्भवदीक्षा ।

End:

सदाशिवेन संप्रोक्ता सर्वतत्त्वान्तगा सती ।
चक्रं त्रिपुरसुन्दर्या ब्रह्माण्डाकारमीश्वरी ॥
पर्वताः सरितश्चैव भूगोलो यश्च वै भवेत् ।
तस्माच्च कोटिगुणितं ब्रह्माण्डं गोलकं भवेत् ॥

(*e*) श्रीविद्यारत्नसूत्रम्.

ŚRĪVIDYĀRATNASŪTRAM.

Foll. 28*a*—30*a*.

Same work as that described under No. 5737 of the D.C.S. MSS., Vol. XII.

Complete.

(*f*) त्रयीसारसूत्रम्.

TRAYĪSĀRASŪTRAM.

Foll. 30*a*—32*b*.

An attempt to establish the superiority of the goddess Śakti on the authority of certain passages taken from the three Vēdas.

Complete.

Beginning:

अथ विद्यायाश्चित्सारभूतायाः सामरस्यवराया महिमानं व्याख्यास्यामः—अस्या उद्धारः कामो योनिः कामकला । पुरुच्छेषा विश्वमाता-

दिविद्योमिति त्रैपुरं श्रुतिशिर एव विद्यैव वेद्याविद्यात्मकयोरत्यन्ताभेदमिति हि सूत्रम् । प्रकाशविमर्शकरसीकरणं ब्रह्माजामेकामित्यादिश्रुतिशिरोभिः संप्रतिपन्नमिति ब्रह्मवादिनो व्याचक्षीरन् ।

End :

एवं ब्रह्मविद्यां कुण्डलीं स्फुरन्तीं कोटिसूर्यप्रभामासहस्रारं नामसूत्रार्थकमणिभावनया नीत्वा ग्रन्थित्रयं कुलगतं भित्त्वा तस्मिन्नकुले शक्तिशक्तिमदैक्यं ब्रह्माद्वैतद्वैतरहितं सत्यं ज्ञानमनन्तं जानन् ब्रह्मविदाप्नोति परं ब्रह्मविदाप्नोति परम् ॥

(*g*) बगलाकल्पः.

BAGALĀKALPAḤ.

Foll. 33*a*—68*b*.

Same work as that described under No. 7949 of the D.C.S. MSS., Vol. XV.

Contains thirty-three Paṭalas.

(*h*) पीताम्बरीपूजा.

PĪTĀMBARĪPŪJĀ.

Foll. 68*b*—69*b*.

On the conduct of the worship of the goddess Pītāmbarī, who is a manifestation of Śakti.

Complete.

This manuscript is said to have been copied by Namaḍūri Vēṅkaṇṇa and Annavarapu Kṛṣṇamma for Tsalla Nṛsiṁha Avadhāni on Saturday, the 3rd day of the Mārgaśira in the year Āṅgirasa.

Beginning :

एतत्कर्मसिद्ध्यर्थं बगलार्चां करिष्ये इति संकल्प्य ओं ऐं ह्रीं श्रीं आधारशक्तिकमलासनाय नमः । आधारासनाय नमः । चक्रपद्मासनाय नमः । आधारशक्तिनिलयाय नमः । इति बिन्दुत्रिकोणेषु पीठेषु संपूज्य ।

End:

आधारकमले देवीमुद्रास्य पुष्पमाधाय गुरुं ध्यायेत् । त्रिकोणेषु वाणीलक्ष्मीगौर्यः पूज्या इति । इत्यादिपूजाभेदः सांख्यायनसंमतः स एव प्रसिद्धः ॥

Colophon:

इति पीताम्बरीप्रकारान्तरपूजाविधिः ॥

(*i*) धूम्रवाराहीमन्त्रकल्पः.

DHŪMRAVĀRĀHĪMANTRAKALPAḤ.

Foll. 70*a*—71*b*.

Contains the 21st and the 22nd Paṭalas described as two different works under Nos. 7883 and 7884 of the D.C.S. MSS., Vol. XV.

(*j*) कलिसंतारणोपनिषत्.

KALISANTĀRAṆŌPANIṢAT.

Fol. 72*a*. Fol. 72*b* is left blank.

Same work as that described under No. 351 of the D.C.S. MSS., Vol. I, Part III.

Complete.

R. No. **845.**

Palm-leaf. 14×1¼ inches. Foll. 46. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1913–14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

The first two leaves are left blank.

(*a*) पञ्चदशी—सव्याख्या.

PAÑCADAŚĪ WITH COMMENTARY.

Foll 3*a*—14*b*.

Same work as that described under No 4623 of the D.C.S MSS., Vol. IX.

Contains the Kūṭasthadīpa only.

The scribe adds at the end—

संवत्सरे च विकृतौ श्रावण्यां शुक्लपक्षके ।
प्रतिपद्भौमवारे च सोमयाजिकुलोद्भवः ॥
रामयोगी प्रकाशात्मा मायाकार्यविलक्षणः ।
व्याख्यां कूटस्थदीपस्य लिलेखात्मानुभूतये ॥

(*b*) महावाक्यरत्नावलिः.

MAHĀVĀKYARATNĀVALIḤ.

Foll. 15*a*—38*b*.

By Rāmacandrēndra. Same work as that described under No. 4708 of the D.C.S. MSS., Vol. IX.

Complete.

(*c*) वेदान्तविषयः.

VĒDĀNTAVIṢAYAḤ.

Foll. 39*a*—41*b*. Fol. 42 is left blank.

Stanzas elucidating the principles of the Advaita-Vēdānta followed by a commentary thereon. Probably they form part of a work.

Beginning:

प्रज्ञानं ब्रह्मेति श्रुत्यर्थं श्रुतिरेव बोधयति—

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादु विजानाति तत्र ज्ञानमुदीरितम् ॥
चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु ।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्मम्यपि ॥

इति । येनेति । येन चक्षुरादिप्रवृत्तिनिमित्तेनायं लोकः रूपजातमीक्षते । शब्दजातं शृणोति ।

End:

दर्पणप्रतिबिम्बतुल्यं बुद्धौ प्रतिबिम्बितप्रत्यगात्माभासस्वरूपं कालत्रयेऽप्यसत्यम् । एवं सच्चिदानन्दस्वरूपः प्रत्यगात्मा बुद्ध्या ज्ञातव्य इति युक्तिः सूचिता ॥

(*d*) रहस्योपनिषत्.

RAHASYŌPANIṢAT.

Foll. 43*a*—45*a*. Foll. 45*b* and 46 are left blank.

Same work as that described under No. 749 of the D.C.S. MSS., Vol. I, Part 3.

Complete.

R. No. **846.**

Palm-leaf. 15⅓ × 1⅜ inches. Foll. 167. Lines, 8 in a page. Telugu. Good.

Presented in 1913-14 by M.R.Ry. V. V. S. Avadhāni Gāru, Sub-Judge, Vizagapatam.

The first eight foll. are left blank.

(*a*) आपस्तम्बगृह्यसूत्रम्.

ĀPASTAMBAGṚHYASŪTRAM.

Foll. 9*a*—17*a*. Fol. 17*b* is left blank.

Same work as that described under No. 1180 of the D.C.S. MSS., Vol. II.

Complete.

(*b*) कृष्णयजुर्वेदमन्त्रप्रश्नः.

KṚṢṆAYAJURVĒDAMANTRAPRAŚNAḤ.

Foll. 18*a*—35*a*. Fol. 35*b* is left blank.

Same work as that described under No. 237 of the D.C.S. MSS., Vol. I, Part II.

Complete.

(c) आपस्तम्बसूत्रवृत्तिः—सूत्रदीपिका.

ĀPASTAMBASŪTRAVṚTTIḤ: SŪTRADĪPIKĀ.

Foll. 36a—138b. Foll. 112b, 139 and 140 are left blank.

By Rudradatta. Same work as that described under R.No. 375(b) *ante*.

Contains Praśnas one to five complete.

(d) सर्वसंमतशिक्षा.

SARVASAMMATAŚIKṢĀ.

Foll. 141a—146b.

By Kēśavārya. Same work as that described under No. 997 of the D.C.S. MSS., Vol. II.

Complete.

(e) सर्वसंमतशिक्षा—सव्याख्या.

SARVASAṀMATAŚIKṢĀ WITH COMMENTARY.

Foll. 147a—165b.

The commentary is by Mañcibhaṭṭa. Same work as that described under No. 998 of the D.C.S. MSS., Vol. II.

Complete.

Foll. 166 and 167 are left blank.

R. No. **847.**

Palm-leaf. $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Foll. 90. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from E. R. Kṛṣṇamācārya of Kalyāṇapuram, who collected it at Uppiliyappankōyil, a village in the Tanjore district.

(a) न्यायसिद्धान्तमञ्जरी.

NYĀYASIDDHĀNTAMAÑJARĪ.

Foll. 1a—27a.

By Jānakīnātha. Same work as that described under No. 4215 of the D.C.S. MSS., Vol. VIII.

Śabdakhaṇḍa incomplete.

Foll. 27*b*—29*b* are left blank.

(*b*) न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKA-PRAKĀŚIKĀ.

Foll. 30*a*—90*a*. Fol. 90*b* is left blank.

By Śrīkaṇṭha. Same work as that described under No. 4223 of the D.C.S. MSS., Vol. VIII.

Wants beginning and end in the Śabdakhaṇḍa.

R. No. **848.**

Palm-leaf. 12¾, 13¼ × 1⅛ inches. Foll. 93. Lines, 5 in a page. Grantha and Tamil. Much injured.

Purchased in 1913-14 from E. R. Kṛṣṇamācārya of Kalyāṇapuram, who collected it at Uppiliyappankōyil in the Tanjore district.

(*a*) यदुगिरिनारायणस्तवः—सव्याख्यः.

YADUGIRINĀRĀYAṆASTAVAḤ WITH COMMENTARY.

Foll. 1*a*—76*b*. Fol. 77 is left blank.

Same work as that described under No. 10225 of the D.C.S. MSS., Vol. XVIII.

Incomplete. Wants some leaves in the middle.

(*b*) ஆசார்யஹ்ருதயம்.

ĀCĀRYAHṚDAYAM.

Foll. 78*a*—93*b*.

This is the text, a commentary on which is described under R. No. 11 of the Triennial Catalogue of MSS., Part 2, Tamil.

Incomplete.

R. No. **849.**

Paper. 6¼ × 4¼ inches. Foll. 35. Lines, 12 in a page. Grantha. Good.

Purchased in 1913–14 from E. R. Kṛṣṇamācārya of Kalyāṇapuram, who copied it from the MS. of M.R.Ry. Addaṅki Kumāratātācārya of Triplicane.

नवकोटिः—दशकोटिरत्नमालासहिता.

NAVAKŌṬIḤ WITH DAŚAKŌṬIRATNAMĀLĀ.

Complete.

The work, Navakōṭi, is described under No. 5081 of the D.C.S. MSS., Vol. X. In the present MS. it is written in the beginning that its author is Kuṇigila Rāma Śāstrin. Daśakōṭi refutes the view expressed in the Navakōṭi and seeks to establish that the word Nārāyaṇa really denotes Viṣṇu and ascribes to Him the creatorship of the Universe. Its author is Aṇṇaṅgarārya of Śēṣārya family.

Beginning:

कुणिगिलरामशास्त्रिकृता.

शर्वाण्याश्लिष्टवर्ष्माणं जगज्जन्मादिकारणम् ।
विष्ण्वाद्यर्चितपादाब्जं वन्देऽहं सर्वदा शिवम् ॥

तत्र शिवस्य जगत्कारणत्वसिद्धेः कारणवाक्यघटकनारायणशब्दस्य शिवपरत्वसिद्ध्यधीनत्वात् नारायणशब्दस्य शिवपरत्वमेव प्रथममुपपादनीयम् ।

* * * *

अस्य चार्थस्य विद्यारण्यैः सूतसंहिताव्याख्यानावसरे बहुशः प्रपञ्चितत्वेन नास्माभिरत्र प्रतिपादनीयमस्तीति । निषेधकोटिस्तु तेभ्योऽन्येषां वैष्णवादीनां सर्वेषाम् ॥

अथ दशकोटिरत्नमालानामकरसिद्धान्तग्रन्थः अण्णङ्गरार्यकृतः—

जगज्जन्मस्थेमप्रलयविधिलीलं जलधिजा
समाश्लिष्टोरस्कं निगमततिवेद्यस्वचरितम् ।
स्वयम्भूशर्वेन्द्रैरभिनुतपदाम्भोजमनघं
भजे यद्वद्रिस्थं नरहरिमरीणामसुहृदम् ॥
श्रीमत्फणीन्द्रपणितागमसारवेदी
दीव्यत्फणीन्द्रकुलवारिधिशीतभानुः ।
अण्णङ्गरार्यविबुधस्तनुते प्रबन्ध-
माशासनाद्गुरुततेर्दशकोटिसंज्ञम् ॥

इह खलु भगवान् श्रियः पतिः परमकारुणिको नारायणः . . . . यतो वा इमानीत्यादिश्रुतिं जन्माद्यस्य यत इति सूत्रेण प्रदर्शयांचक्रे । एवंच श्रुतिस्मृतिभ्यां जगज्जन्मादिकारणं यत्तद्ब्रह्मेति निर्धारणात् ततश्च तद्विशेषजिज्ञासायां प्रापकवाक्यान्यन्वेषणीयानि ।

End:

एवंच कारणवाक्यघटकनारायणशब्दस्य शिवपरत्वव्यवस्थितौ कारणवाक्यानां सर्वेषामेव शिवपरत्वसम्भवाच्छिवस्य जगज्जन्मादिकारणत्वं नानुपपन्नमेवेति ॥

नवकोटिरयं ग्रन्थश्शिवपादाम्बुजेऽर्पितः ।
निर्मत्सराणां विदुषां सन्तोषं तनुताच्चिरम् ॥

समाप्ता नवकोटिः ॥

यद्यपि गन्धर्वयानादेः क्षुभ्नादिगणपाठं कल्पयित्वा नारायणपदे णत्ववारणे प्रश्नोपनिषदीत्यादि, तन्न सुन्दरम् ; छन्दस्येव प्रयुज्यमानयो-स्समुद्रायणपुरुषायणशब्दयोः णत्वस्य बाहुळकेनैव सिद्धेः । प्रसिद्धं च छन्दसि वर्णव्यत्ययकल्पं(ल्पनं) बाहुलकेन

* * * *

श्रीमन्नारायणपदपरमाभिधेयः श्रीमहाविष्णुरेव सर्वोत्कृष्ट इति सिद्धम् ॥

R. No. **850.**

Paper. $8\frac{5}{8} \times 7\frac{1}{8}$ inches. Foll. 19. Lines, 24 in a page. Grantha. Slightly injured.

Purchased in 1913-14 from E. R. Kṛṣṇamācārya of Kalyāṇapuram, who copied it from the MS. of M.R.Ry. Kṛṣṇasvāmi Ayyaṅgār of Uppiliyappankōyil, in the Tanjore district.

तत्त्वनिर्णयः.

TATTVANIRṆAYAḤ.

Foll. 1*a*—18*a*. Foll. 18*b*—19*b* are left blank.

By Varadācārya. Same work as that described under No. 4891 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **851.**

Paper. $8\frac{5}{8} \times 6\frac{7}{8}$ inches. Foll. 20. Lines, 23 in a page. Grantha. Slightly injured.

Purchased in 1913-14 from E. R. Kṛṣṇamācārya of Kalyāṇapuram, who copied it from the MS. of M.R.Ry. Śrīnivāsācārya of Kalyāṇapuram, in the Tanjore district.

न्यायकुलिशम्.

NYĀYAKULIŚAM.

Foll. 1*a*—14*a*. Foll. 14*b*—20*b* are left blank.

By Rāmānujācārya *alias* Vādihaṁsāmbuvāhācārya. Same work as that described under No 4910 of the D.C.S. MSS., Vol. X.

Contains the first Vāda complete and the 2nd incomplete.

R. No. **852.**

Paper. $10\frac{1}{8} \times 6\frac{3}{4}$ inches. Foll. 32. Lines, 23—29 in a page. Grantha and Dēvanāgarī. Slightly injured.

Purchased in 1913-14 from E. R. Kṛṣṇamācārya, who copied it from a MS. of the Adyar Library.

सिंहाचलमाहात्म्यम्.

SIMHĀCALAMĀHĀTMYAM.

This work deals with the importance and sanctity of the Vaiṣṇava shrine on the hill Simhācala in the Vizagapatam district and forms part of the Skāndapurāṇa.

Contains Adhyāyas one to three on foll. 1*a* to 5*a* in Grantha characters and Adhyāyas nineteen to thirty-two on foll. 6*a* to 26*b* in Dēvanāgarī. Foll. 5*b* and 27 to 32 are left blank.

Beginning:

त्राहीति व्याहरन्तं त्रिदशरिपुसुतं त्रातुकामो रहस्ये
विश्रान्तं पीतवस्त्रं निजकटियुगले सव्यहस्तेन गृह्णन् ।
वेगश्रान्तं नितान्तं खगपतिममृतं पाययन्नन्यपाणौ
सिंहाद्रौ शीघ्रपातक्षितिपिहितपदः पातु मां नारसिंहः ॥

ऋषय ऊचुः—

श्रुतं हि क्षेत्रमाहात्म्यं जगन्नाथस्य जैमिने ।
सर्वपापक्षयकरं त्वत्तोऽस्माभिस्सविस्तरात् ॥
सिंहाचले तु नृहरिः प्रह्लादेन समर्चितः ।

* * * *

बभूव प्रकटः पश्चाद्धिरण्यकशिपौ हते ॥
आदौ स्तम्भसमुद्भवः कररुहैर्निर्भिद्य चाहोबले
दैत्येन्द्रं कृतशौचमेत्य रुधिरप्रक्षालनं चाकरोत् ।
कृत्वा कल्मषनाशनं घनहरं पापे प्रसन्नाननः
श्रीयुक्तो नृहरिस्स पातु भगवान् सिंहाचले संस्थितः ॥

Colophon:

इति श्रीस्कान्दपुराणे श्रीसिंहाचलमाहात्म्ये प्रथमोऽध्यायः ॥

End:

य एतच्छ्रावयेद्भक्त्या नृसिंहस्याग्रतो द्विजाः ।
नृसिंहक्षेत्रमाहात्म्यं सर्वपापैः प्रमुच्यते ॥

* * * *

तस्य ये पितरः पूर्वे ये च मातामहादयः।
तेऽपि सर्वे महोत्साहा यान्ति विष्णोः पदं द्विजाः ॥

Colophon:

इति श्रीस्कान्दपुराणान्तर्गतसिंहाचलक्षेत्रमाहात्म्ये द्वात्रिंशोऽध्यायः ॥

R. No. **853.**

Paper. 12⅝ × 7⅞ inches. Foll. 104. Lines, 36 in a page. Telugu. Slightly injured.

Purchased in 1913-14 from E. R. Kṛṣṇamācārya of Kalyāṇapuram, who collected it from M.R.Ry. Daśaratharāma Śāstrin of Mylapore. The first two leaves are left blank.

(*a*) देवकेरलः.

DĒVAKĒRALAḤ.

Foll. 3*a*—81*a*. Foll. 6*b*, 7*a*, 41*a*, 81*b* and 82 are left blank.

A treatise on horoscopy: by Acyuta. He mentions two astrological works named Jyautiṣasaṁhitā and Jātakaskandha, the former containing 400,000 Granthas and the latter 2,000 Granthas. The latter is said to have been composed by the author's teacher and summarized here.

Complete.

The copying of this MS. is said to have been begun on the 13th day of the dark fortnight of the Bhādrapada in the year Vikṛti (1812) of the Śālivāhana Śaka, and completed on Monday, the 6th day of the Āśvayuja, when the moon was in the sign of Makara.

Beginning:

वासुदेवं परं ब्रह्म नारायणमनामयम् ।
लक्ष्मीनाथं नमस्कृत्य वक्ष्येऽहं देवकेरलम् ॥
केरले विषये कश्चित्सच्यो(दच्यु)तो नाम भूसुरः ।
बृहस्पतिं समुद्दिश्य स तन्त्रे(चक्रे)तप मु(उ)त्तमम् ॥

प्रसादसुमुखस्तस्मै प्राह देवपुरोहितः ।
तपसा तव तुष्टोऽस्मि वत्स किं ते करोम्यहम् ॥

अच्युतः—

नमस्ते मुनिवन्द्याय वचसां पतये नमः ।
सर्वज्ञाय नमस्तुभ्यं ग्रहाधिपतये नमः ॥
यदि मह्यं प्रसन्नोऽस्मि(सि) यद्यनुग्रहभागः(हम्) ।
अतीतानागतज्ञानं येन मे स्यात्सुरेश्वर ॥
संक्षिप्य ज्यौतिषं शास्त्रं मत्कृते कर्तुमर्हसि ।

गुरुः—

साधु साधु महाप्राज्ञ यस्मै(न्मे)मनसि वर्तते ।
कर्तव्यमिति वत्साद्य तदेव प्रार्थितं त्वया ॥
पुरा नारायणो देवः कमलासनसंस्थितः ।
चतुर्लक्षमितैर्ग्रन्थैश्चक्रे ज्यौतिषसंहिताम् ॥

* * * *

यन(न्म)यानुकृतं पूर्वं जातकस्कन्धमुत्तमम् ।
द्विसहस्रेण संक्षेप्य त्वत्कृते प्रोच्यतेऽधुना ॥
एवमुक्तो गुरुस्तस्मादुपदिश्य स्वकं मतम् ।
मनुश्च भार्गवं प्रीतस्तत्रैवान्तरधीयत ॥
अच्युतोऽपि पुनः प्रीतस्तपसाराध्य भार्गवम् ।
तस्मात्सहस्रसंख्याकं प्राप्तवान् भार्गवं मतम् ॥

* * * *

शिष्यानध्यापयामास शास्त्रं तद्देवकेरलम् ।

* * * *

भावोपग्रहसंयुक्तचतुर्थस्फुटसाधकम् ।
ग्रहस्वरूपकथनं राशीनामपि लक्षणम् ॥

भावानां च परिज्ञानं फलं तत्त्वपरीक्षणम् ।
अष्टवर्गप्रकारं च प्रकीर्णकमतः परम् ॥
राज्ययोगो भाग्ययोगः परजातकलक्षणम् ।
अङ्गभङ्गादियोगाश्च विपद्गतजनस्तथा ॥
दरिद्रजातकश्चैव करजीवमतः परम् ।
लोकयात्रापरिज्ञानं दशानां निर्णयं तथा ॥
अन्तर्द(शा)विचारश्च दशारिष्टफलं तथा ।
दशारिष्टप्रशमनं मृतिलक्षणमेव च ॥
तथा लोकान्तरप्राप्तिरुच्यते स्म गुरोर्मते ।

*   *   *   *

खपक्षेन्दुमिता नाड्यश्चरभे व्यत्ययास्थिरे ।
षट्सप्ततिः समारभ्य द्विस्वभावेषु राशिषु ॥

End :

निरृत्यंशे चरे लग्ने पूर्वभागस्य जातके ॥
अष्टषष्ठे न मे मृत्युः पश्चादुत्तमजन्मवान् ।
लग्ननाडीफलं सत्यं प्रत्यक्षं देवकेरलम् ॥

*   *   *   *

लाभगे सुखराशिस्थे सुखेशे मन्दराशिगे ।
मन्दांशक्षेत्रजातस्य पितामहविनाशवान् ॥

(*b*) ఆరూఢభావనాడి.

ĀRŪḌHABHĀVANĀḌI.

Foll. 83*a*—101*b*.

See the Telugu part of this Triennial Catalogue.

R. No. 854.

Paper. 8 × 6¾ and 9¼ × 7 inches. Foll. 315. Lines, 18 in a page. Telugu. Much injured.

Purchased in 1913–14 from M.R.Ry. Tiruvēṅkaṭācāriyar of Musaravākkam in the Chingleput district.

अष्टश्लोकीव्याख्या(मणिप्रवालरूपा).
AṢṬAŚLŌKĪVYĀKHYĀ (MAṆIPRAVĀLA).

A commentary in Maṇipravāla on the Aṣṭaślōkī, for which see under R No. 171(*d*) of the Triennial Catalogue of MSS. Vol. I, Part I-A: by Śrīnivāsārya, son of Anantasūri of Śēṣārya family.

Complete.

Beginning:

तात्पर्यसारानुभवप्रहृष्टवपुस्स्फुरज्ज्ञानविरक्तिभक्तिम् ।
अनन्तसूरेरभिनन्द्य सूनुं श्रीश्रीनिवासं गुरुमाश्रयेऽहम् ॥
चकार भट्टोपपदार्यसूक्तिश्लोकाष्टकव्याकृतिमार्यसेव्याम् ।
यस्तं फणीन्द्रार्यकुलावतंसं श्रीश्रीनिवासार्यमहं प्रपद्ये ॥

யதோ வா இமாநி பூதாநி ஜாயந்தே, யோ ப்ரஹ்மாணம் விததாதி பூர்வம் என்றும் நான்முகனை நாராயணன் படைத்தான் என்றும்

* * * *

அதில் ப்ரதமபதமான அகாரத்துக்கு அர்த்தம் அருளிச்செய்கிறார்—அகாரார்த்தோ விஷ்ணு: என்று.

ஆத்மாவுக்கு நிரூபணீயமான சேஷத்வமாகிற ஸ்வரூபத்தை நிரூபகமான சேஷிஸ்வரூபம் முன்னாக நிரூபிக்கவேண்டுகையாலே ப்ரதமம் சேஷியினுடைய ஸ்வரூபத்தைச் சொல்லுகிறது அகாரமென்கிற இத்தால்.

End:

தத்ஸர்வவித்வத்தையும் தத்ப்ராபகப்ரகாரத்தையும் தத்ப்ராபகஸம்பத்தையும் தத்ஸ்வரூபஸோகநிவ்ருத்தியையும் ப்ரதிபாதிக்கிறது சரமஸ்லோகம் என்று அருளிச்செய்து நிகமித்தருளுகிறார்.

Colophon:

अष्टश्लोकीव्याख्या समाप्तः.

R. No. 855.

Paper. 11¾×4 inches. Foll. 27. Lines, 16 in a page. Dēvanāgarī. Injured.

Purchased in 1913-14 from M.R.Ry. Hariyācār of Pallikoṇḍa in the North Arcot district.

न्यायामृतव्याख्या--प्रकाशः.

NYĀYĀMṚTAVYĀKHYĀ: PRAKĀŚAḤ.

A commentary on the Nyāyāmṛta, which is described under No. 4796 of the D.C.S. MSS.: by Śrīnivāsa.

Contains the first Paricchēda incomplete.

Beginning:

वासवीहृदयानन्दवेदशाखाप्रणायकम् ।
वेदव्यासं गुरूपास्यं वन्देऽभीष्टप्रदं सताम् ॥
श्रीरामं हनुमत्सेव्यं श्रीकृष्णं भीमसेवितम् ।
श्रीव्यासं श्रीमदानन्दतीर्थसंसेव्यमाभजे ॥
श्रीमन्न्यायसुधाया यैर्भावः सम्यक्प्रदर्शितः ।
तान् वन्दे यादवाचार्यान् सदा विद्यागुरूनहम् ।
अथैतत्कृपया न्यायामृतस्येदं प्रकाशनम् ।
क्रियते श्रीनिवासेन गुरुशिक्षानुसारतः ॥

इह खलु व्यासतीर्थश्रीमच्चरणः श्रुतमर्थं मिमनिषया निबिभन्त्सुः परीक्षकप्रवृत्त्यङ्गभूतमनुबन्धचतुष्टयं वक्तुं विशिष्टविषयादिमद्ब्रह्ममीमांसया निबन्धं संबन्धयितुं चतुर्लक्षणीमीमांसाविवक्षितविशेषणचतुष्टय(व)त्त्वेनेष्ट देवतामभिष्टौति---निखिलेत्यादिना । निखिलगुणपूर्णत्वनित्यनिर्धूतहेयत्वयोर्हेतुहेतुमद्भावस्तु नित्यागणितगुणमाणिक्यविशदप्रभाजालोल्लासोपहतसकलावद्यतमस इति टीकाकारोक्तरीत्यावगन्तव्यः ।

End:

व्यावहारिके व्यावहारिकतयाङ्गीकर्तव्य इत्यर्थः। तथाच प्रातिभासिकतया त्वयोच्यमानमज्ञानं व्यावहारिकं व्यावहारिकोपादानत्वात् ब्रह्मज्ञानात्प्रागबाधितत्वात् श्रुत्यादिसिद्धत्वाच्चेत्यनुमानत्रयमत्र द्रष्टव्यम् । योग्यत्वस्य अपरोक्षव्यवहारयोग्यत्वस्य ।

R. No. 856.

Paper. 12 × 5¾ inches. Foll. 20. Lines, 12 in a page. Dēvanāgarī. Injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

वायुस्तुतिः—सव्याख्या.

VĀYUSTUTIḤ WITH COMMENTARY.

A commentary on the Vāyustuti, for which see under No. 9810 of the D.C.S. MSS., Vol. XVIII: by Vēdātmatīrtha. The author of the text is here said to be Trivikramācārya, who is also said to be the author of Tattvapradīpikā.

Complete.

Beginning:

त्रैलोक्यस्तम्भदान्तादिहृद्गुहावासिनं सदा ।
षड्वर्गदन्तिसंदोहकृन्तनं नृहरिं भजे ॥

परमकारुणिकः श्रीमदानन्दतीर्थमुनिः संसार(क)ष्टाटवीदावानलं भक्तेष्टचिन्तामणिं नखरस्तवं भक्तानुजिघृक्षया विधित्सुः नृसिंहनखराणां संसारकारणीभूतदुर्ज्ञानदुष्कर्माणि सर्वदैत्यहन्तृत्वेन तन्मूलसकलानिष्टनिवर्तकत्वेन

* * * *

प्रार्थयते—पान्त्विति । पुरुहूतवैरिबलवन्मातङ्गमाद्यद्घटाकुम्भोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः—पुरु भूयिष्ठं हूयते यज्ञेषु इति पुरुहूतः पुरंदरः ।

* * * *

चिदानन्दतनुं वन्दे सदा पद्मालयान्वितम् ।
वदावदं च सूत्राणां पदा मितजगत्त्रयम् ॥

* * *

यो वै वैकुण्ठभर्तुः सकलसुरशिरःश्रेणिसंलालिताज्ञां
धृत्वा भूमिं च गत्वा श्रुति(नि)करपुराणादिभिर्वादिवृन्दम् ।
जित्वा भाष्यं च कृत्वा प्रकरणनिकरं स्थापयामास तत्त्वं
मध्वाचार्याय तस्मै नतशिरसि भवत्वेष बद्धाञ्जलिर्मे ॥

व्याख्यानच्छद्मना मुख्यप्राणसद्गुणचिन्तनाम ।
करोम्यालोच्य पूर्वेषां व्याख्यानं बुद्धिशुद्धये ॥

अस्या वायुस्तुतेर्गूढभावार्थाय यथामति ।
वेदात्मयतिना व्याख्या क्रियतेऽन्वयवर्त्मना ॥

इह हि आपूर्वापरदक्षिणोत्तराशाध्वनिर्गलत्कीर्तिस्तत्त्वप्रदीपिकाकर्ता सकलकविकुलशिरोमणिः सकलाचार्यवर्यो भगवांस्त्रिविक्रमाचार्यः प्रधान वायोरवतारत्रयतत्प्रयोजनज्ञानंदानेन सज्जीवानुद्धर्तुं वायुस्तुतिं चिकीर्षुः चिकीर्षिताविघ्नपरिसमाप्त्यादिप्रयोजनसाधनं

* * * *

आशीर्वादरूपं मङ्गलमादावङ्गीकरोति––श्रीमद्विष्ण्वङ्घ्रीति ॥

श्रीमद्विष्ण्वङ्घ्रि (. . . .) प्रेमभारं बभार ॥

श्रीरस्यास्तीति श्रीमान् तदस्यास्मिन्निति मतुप्, लक्ष्मीसमेतः । स चासौ विष्णुश्च ।

End:

अमू केशवानन्दतीर्थौ संराध्य संपूज्य नमन्ति[नु] नमस्कारं कुर्वन्ति ये ते जनाः प्रततमतिगुणाः अतिविशदापरोक्षज्ञानगुणाः सन्तः मुक्तिं मोक्षं व्रजन्ति । व्रज गताविति धातोर्लट् ॥

Colophon:

इति श्रीवेदात्मतीर्थविरचिता वायुस्तुतिटीका समाप्ता ॥

वायुस्तुतिटीका समाप्तिमगमत् ॥

R. No. 857.

Paper. 12⅓ × 5¼ inches. Foll. 85. Lines, 13 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913-14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

Wants three leaves at the end of the eighth Adhyāya.

भारततात्पर्यनिर्णयः--- भावप्रकाशिकासहितः.

BHĀRATATĀTPARYANIRṆAYAḤ WITH BHĀVA-PRAKĀŚIKĀ.

This commentary on the Bhāratatātparyanirṇaya is different from that described under No. 4832 of the D.C.S. MSS., Vol. X, although the name of the commentator is the same.

Breaks off in the ninth Adhyāya.

Beginning:

जयति हरिरचिन्त्यः सर्वदेवैकवन्द्यः
परमगुरुरभीष्टावाप्तिदः सज्जनानाम् ।
निखिलगुणगणार्णोनित्यनिर्मुक्तदोषः
सरसिजनयनोऽसौ श्रीपतिर्मानदो नः ॥

विष्णोः सर्वोत्तमत्वादिकं सर्वसदागमप्रतिपाद्यमित्येतद्भारतव्यपदेशेनाम्नायार्थः प्रकाशितः इति वचनाद्भारतवाक्यैः प्रतिपादयन् भारताद्यपद्योक्तगुणत्वेनाद्यपद्येन स्तौति—जयतीति। असौ जयति उत्कृष्टो वर्तते। अनेन वन्दे इत्येतदुक्तार्थं भवति । अयं मत्तोऽधिकः अहमनुत्कृष्ट इति बुद्धिर्हि वन्दनमिति। विभुमित्यस्यार्थो हरिरिति । निखिलात्मत्वात् तत्राखिलामरवरो हरिराविरासीत् इत्युक्तत्वात् ।

End:

विधातुः पदं सकलं सर्वजनैः क्रियमाणं शोभनं पुण्यफलं च ॥

Colophon:

इति श्रीमत्कविकुलतिलकवादिराजतीर्थविरचितायां भारततात्पर्यनिर्णयव्याख्यायां भावप्रकाशिकाख्यायामष्टमोऽध्यायः ॥

युवतरुणशब्दयोः पर्यायत्वात् तरुणो राजा भव युवराजो भवेत्यर्थः। तदेव मे देहीत्यत्र ईदृशानुग्रहकारणमेव मे देहीत्यर्थः। भवत्पदाम्भोजनिषेवणमिति वा।

* * * *

आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते इत्यादिवाक्यमनालोच्य अग्निमील इत्यादिकेवलाग्निपरतैव वेदेत्यर्थः। व्यत्यासाप्राति.

R. No. 858.

Paper. 8×4¼ inches. Foll. 64. Lines, 11 in a page. Dēvanāgarī. Good.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

(*a*) जयतीर्थविजयः.

JAYATĪRTHAVIJAYAḤ.

Foll. 1*a*—21*b*.

A eulogistic account of Jayatīrtha's life: by Saṅkarṣaṇa, son of Śēṣācārya.

Breaks off in the fifth Sarga.

Beginning:

रमासमाश्लिष्टतनुः स माऽव्याद्व्यंसद्व्याजकृपाकटाक्षः।
दशेक्षहृत्तामग्र्यरस . . वासो हरिर्दशस्यन्दननन्दनाग्र्यः॥
यत्तीर्थसंसेवनतो भवार्हाः सर्वे भवा वैभवतो वसन्ति।
सदा भवं प्राप्य हरिं समीरमानन्दतीर्थं सततं भजेऽहम॥
अखण्डि दुर्वादितमिस्रषण्डो गोमण्डलैर्व्याप्तरसः प्रचण्डः।
हृन्मण्डलस्थं स तमो जयार्यमार्ताण्ड उत्खण्डयतादखण्डम्॥
स्वयंप्रभातो निगमार्थसार्थो यस्यातिवेलं प्रतिभाम्बुराशेः।
तं सत्यनिध्याह्वयतीर्थराजं वन्दारुमन्दारमथाभिवन्दे॥

* * * *

गुर्वादरोद्भूतमुकुन्दभक्त्यै जगद्गुरुश्रीजयतीर्थलीलाम्।
यथाश्रुतीमां महनीयमान्यां वक्ष्याम्यहं स्वान्ततमोनिहन्त्रीम्॥

श्रीवल्लभो वल्लभमर्हवर्गे समादिदेशाथ समीरदेवम् ।
रसावताराय स कार्यवीर्यचातुर्यधैर्यादिगुणं प्रसन्नः ॥
श्रीमध्वरेश्वारुनियोगरत्नं मूर्ध्ना दधानो भुवि मध्यगेहात् ।
स मध्वनामाजनि पाजकाख्ये क्षेत्रे पवित्रे रजतासनाङ्के ॥

* * * *

Colophon:

शेषाचार्यसुतश्रीमत्संकर्षणकृते शुभे ।
जयतीर्थार्यविजये सर्गः प्राथमिकोऽजनि ॥

End:

महीध्रेऽस्मिन् दर्यां [तां] सकलसमयारण्यचरणे
महाव्याख्यानादौ वसति जयतीर्थाभिधहरिः(रौ) ।
शरम्भोज(ज्वरं भेजु)स्तर्कागमानिपुणमत्तद्विपगणाः
शिवा मायीन्द्राख्या न शिवमयुरन्ये च कुमृगाः ॥

Colophon:

शेषाचार्यसुतश्रीमत्संकर्षणकृते शुभे ।
जयतीर्थार्यविजये सर्गोऽजनि चतुर्थकः ॥

इति श्रीमत्कविकुलतिलकश्रीमच्छेषाचार्य(सुतसंकर्षणाचार्य)विरचिते जयतीर्थविजये चतुर्थः सर्गः ॥

आनन्दतीर्थसत्तीर्थे समसेवत हंसराट् ।
तत्त्वातत्त्वपयोनीरभेदवित्स सुमानसः ॥

* * * *

श्रीमन्मध्वकृतान्तसंगतकृतीर्यान्निर्मिता अद्भुताः
सर्वेऽधीत्य सतीर्हि तत्प्रवचनासक्त्या नमन्तेऽनिशम् ।
सोऽसौ श्रीजयतीर्थपूज्यचरणश्च . . . .

Fol. 22*a* is left blank.

(*b*) सरसभारती.

SARASABHĀRATĪ.

Foll. 22*b*—64*b*.

A eulogistic poem on God Viṣṇu: by Vādirāja, who is also stated to have composed a poem entitled Rukmiṇīśavijaya.

Complete in twelve Vilāsas.

Beginning:

करोतु मम कल्याणं हरिर्हयमुखाभिधः ।
गुरुश्च मध्वनामा मे वरदोऽस्तु निरन्तरम् ॥
चार्वपूर्वपदश्रेणीं दुर्वाग्गर्वापहारिणीम् ।
सर्वेष्टकारिणीमुर्वीं कुर्वो सरसभारतीम् ॥

* * * *

सुमतिभिरनुमेयं शुभ्रकायं सखायं
सुखमयमनपायं मुक्त्युपायं विमायम् ।
नृहयमहममेयं ध्येयमाम्नायगेयं
सदयमसदजेयं श्रीसहायं भजेऽहम् ॥

* * * *

अनन्तपुरनाथ ते पदसुपद्मसंवीजनो
भवेद्विजितदुर्जनो दुरिततर्जनः सज्जनः ।
उपैति च परां गतिं सततमुन्नतिं सन्निति
भवन्न स पु(न)र्भवी परिभवी कथं स्याद्भवान् ॥
वादिराजकृते श्राव्ये काव्ये भव्ये सुबुद्धिभिः ।
सेव्ये सरसभारत्यां विलासोऽभूद्धरिप्रियः ॥

Colophon:

इति श्रीवादिराजपूज्यपादविरचितायां सरसभारत्यां प्रथमो विलासः ॥

End:

अतः श्राव्यमिदं काव्यं वस्तुतत्त्वविवेचनात् ।
हरेश्च हरिदासानां सुराणां च मनःप्रियम् ॥

* * * *

अहर्निशं हयग्रीवसेवित्वकृपया कविः ।
महाकाव्यमिद चक्रे वादिराजो महामतिः ॥
लक्ष्मीप्रियाय यश्चक्रे रुक्मिणीशजयं पुरा ।
स चक्रे भारतीप्रीत्यै भारतीशजयं त्वमुम् ॥
श्रियः पत्युर्भियां हर्तुस्त्रयीवेत्तुर्हयास्य ते ।
प्रियाय मे जयाय स्यादियं सरसभारती ॥
नमोऽस्तु पद्मनाभाय पद्माकान्ताय विष्णवे ।
परतत्त्वेऽतिशुद्धाय मध्वाय च नमो नमः ॥
वादिराजकृते श्राव्ये काव्ये भव्ये सुबुद्धिभिः ।
सेव्ये सरसभारत्यां विलासोऽभूद्धरिप्रियः ॥

Colophon:

इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजतीर्थपूज्यचरणविरचिते सरसभारत्याख्यमहाकाव्ये द्वादशो विलासः ॥

The scribe adds—

श्रीमन्मुद्गलवंशभूर्नरहरिर्नामाख्ययो(या)भूद्धर-
स्तस्य श्रीसुत(तन)योऽभवद्धरहरिर्नामाख्य(ह्व)यो(या)सौ हरिः ।
तज्जातः कृष्णनामाभिहितवरयो रामनाम्नोऽस्य शिष्य-
स्तस्येदं पुस्तकं वा लिखितममल(कं) शोभते प्रीतये च ॥

R. No 859.

Paper. 11⅓ × 5¼ inches. Foll. 282. Lines, 15 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa. It is stated on fol. 1*a* that this MS. belonged to one Gambhīrarāja Bhāratīdīkṣita.

भाट्टदीपिकाव्याख्या— प्रभावली.

BHĀṬṬADĪPIKĀVYĀKHYĀ: PRABHĀVALĪ.

A commentary on the Bhāṭṭadīpikā, which is described under No. 4424 of the D.C.S. MSS, Vol. IX: by Śambhubhaṭṭa, son of Bālakṛṣṇa and pupil of Khaṇḍadēva. The introductory stanzas at the beginning of the sixth Adhyāya are the same as those in the third Adhyāya.

Contains from the fifteenth Sūtra (Ahīnādhikaraṇa) of the third Pāda in the third Adhyāya to the end of the same Adhyāya and the sixth Adhyāya complete.

Beginning:

अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥
यो वेदशास्त्रार्णवपारदृश्वा यज्ञादिकर्माचरणेऽतिदक्षः ।
सदा शिवाराधनशुद्धचित्तस्तं बालकृष्णं पितरं नमामि ॥
श्रीखण्डदेवं प्रणिपत्य सद्गुरुं मीमांसकस्वान्तसरोजभास्करम् ।
अत्यन्तसंक्षिप्तपदार्थतत्कृतौ प्रभावलीटिप्पणमातनोम्यहम् ॥
यद्यप्यत्र गुरोः कृतावपि मया ह्युद्भाव्यते काचना
संभूतिस्तदपि प्रचारचतुरे नैषा पुरोभागिता ।
किंतु क्ष्मातिलकाः कुशाग्रधिषणाः सिद्धान्तबद्धादरा
मद्वाक्यं परिहृत्य तत्कृतिमलंकुर्वन्त्विवयं मे मतिः ॥

अत्र च बलाबलाधिकरणसमाप्तिपर्यन्तं मया कृतेन मीमांसाकौस्तुभेन ग्रन्थेन प्रायशस्तदधिकरणसमाप्तिपर्यन्तं भाट्टदीपिका व्याख्यातार्था जातास्ति । अतस्तदन्तमुपेक्ष्याग्रे तद्व्याख्यानं कर्तव्यमित्येवं पूज्यपादानामेवाज्ञया 'अहीनो वा प्रकरणाद्गौणः' इत्यारभ्य टिप्पणमारभ्यते ॥ आहीनो वा ॥ ननु अथातः शेषलक्षणमित्यध्यायादिसूत्रे कः शेषः ? केन हेतुना शेषः ? कथं च विनियुज्यते ? श्रुत्यादीनि च विनियोगे कारणानि तेषां च बलाबलाचिन्तेति पञ्चानामेव शेषप्रकाराणामध्यायार्थत्वेन प्रतिज्ञानस्य

वार्त्तिककृतोक्तत्वाद्बलाबलाधिकरणसमाप्तिपर्यन्तं च प्रतिज्ञाताध्यायार्थस्य कृत्स्नस्यापि निरूपितत्वात् उत्तरचिन्ताजातस्य पूर्वलक्षणानाक्रान्तत्वेन लक्षणासंगतिर्लक्षणान्तरापादकत्वं चापद्येतेत्याशङ्कापरिहाराय बलाबल चिन्ताविषयत्वेन संगतिं दर्शयति—एवमिति। पूर्वाधिकरणोपपादितप्रकारेण श्रुतिलिङ्गादीनां विरोधे इत्यर्थः।

End:

पशुं साधनत्वेन मन्त्रं च प्रकाशकत्वेन स्वीकुर्वता सामर्थ्यादनेन मन्त्रेण प्रकाशितं पशुमालभेतेति विहितं भवति। नच पश्वन्तरोपादाने तथानुष्ठातुं शक्यत इत्यर्थाच्छागेन पशुना यजेतेति छागपशुशब्दयोर्विशेषणविशेष्यभावः सिद्धो भवतीति। अयमेव प्रकारो मूलस्थवाक्यैक वाक्यतापदेन गृह्यते। अध्यायार्थमुपसंहरति—इति निरूपित इति॥

Colophon:

इति श्रीपूर्वोत्तरमीमांसापारावारधुरीणश्रीखण्डदेवान्तेवासिकविमण्डनबालकृष्णसूनुशम्भुभट्टकृतायां भाट्टदीपिकाप्रभावल्यां षष्ठाध्यायस्याष्टमः पादः॥

समाप्तश्च षष्ठोऽध्यायः॥

R. No. **860.**

Paper, 14×4½ inches. Foll. 297. Lines, 9 in a page. Dēvanāgarī. Injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

Wants many leaves in the middle. The last page is left blank. Foll. 1 and 2 contain the errata of the MS.

तत्त्वचिन्तामणिदीधितिप्रकाशिकाटिप्पणम्—न्यायरत्नम्.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀṬIPPAṆAM : NYĀYARATNAM.

Same work as that described under No. 4084 of the D.C.S. MSS., Vol. VIII, which contains only a portion of what is found here. By Raghunātha, a disciple of Rāghavācārya. He refers to Kṛṣṇambhaṭṭa's work as his source.

Contains the Pañcavāda complete

Beginning :

नित्येच्छाकृतिचित्सौख्यं परमाणुकलेबरम् ।
अध्यात्मादिजगद्धेतुं नमामि परमेश्वरम् ॥

द्रव्यं निष्पाद्य तस्मिन् गुणगणमदधत् कर्मजातिं विशेषान्
संबन्धं चाप्यभावं सुरगृहनिरगौ बन्धमोक्षावकार्षीत् ।
एकोऽपि ब्रह्मविष्ण्वीश्वरविविधपदैर्गीयते धर्मभेदात्
तं सर्वज्ञं दयालुं दुरितगिरिपविं मङ्गलायाश्रयामः ॥
कृष्णंभट्टचादिसंदर्भसिन्धुसायासमन्थनैः ।
न्यायरत्नं समुद्धृत्य प्रकटीकरवाण्यहम् ॥
मीमांसान्यायपञ्चास्यराघवाचार्यसूरिणाम् ।
शिष्यस्यैषा कृतिर्भूयाद्रघुनाथस्य संमुदे ॥

इह खलु आन्वीक्षिकीसांख्ययोगवेदान्ता इति चतस्रो विद्याः निःश्रेणिकाभूताः परमपुरुषार्थस्य साधनम् ।

* * * *

अनुमानमेव बहुप्रपञ्चं निरूपयामास चिन्तामणिः । तं च व्याचख्यौ शिरोमणिः । शिरोमणिव्याख्याः सन्ति बह्वयः । तासां संप्रति गादाधर्येव प्रबला, तस्यामेवाध्ययनाध्यापनयोर्बहुशः प्रचारदर्शनात् । गादाधर्यामपि सामान्यनिरुक्तिपञ्चलक्षणीचतुर्दशलक्षणीसिद्धान्तलक्षणावयवपक्षताख्याः पञ्च वादा मुख्याः ।

* * * *

पञ्चवादेषूहापोहकौशल्येच्छावतां कृत कृष्णंभट्टादिविवरणवाक्यानि आलोक्य तदुदितान् कचित्स्वकल्पितांश्च पूर्वपक्षसमाधानसिद्धान्तान् संगृह्य समारभ्यते सामान्यनिरुक्त्यादिक्रमेण न्यायरत्नाभिधेयमभिनवा टिप्पणी । एतां चाधिकोत्क्षेपणेन न्यूनपूरणेन च शोधयन्तु दयालवो विद्वांसो भूषयन्तु च ।

अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते इति मूले । अथशब्दस्य ध्वंसाधिकरणकालवृत्तित्वरूपमानन्तर्यमर्थः । तदेकदेश-ध्वंसे आनन्तर्यावधितया अर्थतो लब्धसद्धेतुनिरूपणस्यानुयोगितयान्वयः ।

See the work described under No. 4084 for the end and colophon.

R. No. **861.**

Paper. $11\frac{5}{8} \times 4\frac{1}{4}$ inches. Foll. 18. Lines, 8 on a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

Fol. 1*a* is left blank.

न्यायामृतविवृतिः.

NYĀYĀMṚTAVIVṚTIḤ.

Foll. 1*b*—18*a*. Fol. 18*b* is left blank.

A commentary on Vyāsayati's Nyāyāmṛta described under No. 4796 of the D.C.S. MSS., Vol. X: by Girisūri, son of Koṇḍubhaṭṭa. In the introduction the author pays his respect to a number of Gurus of the Dvaita school.

Incomplete.

Beginning:

लक्ष्मीवक्षोजकाश्मीरसुपङ्काङ्कितवक्षसे ।
नमोऽस्तु भजकानन्दमूलकन्दाय विष्णवे ।

वेदान्त . . . हृदयगोचरमस्तदोषं
विज्ञानिसेव्यमनपायिसुखैकहेतुम् ।
पूर्णं गुणैरगणितैरनवद्यगन्धै-
र्लक्ष्मीलसद्वितवक्षसमाश्रयेऽहम् ॥

प्रज्ञाभानुर्भानुरन्तर्निशायाः
सद्बोधाब्धेरिन्दुरानन्दसान्द्रः ।
वक्ता ह्ययानादिविद्या विधात्रे
धूतावद्यः पातु मां वाजिवक्त्रः ॥

* * *

येनाबोधि कुशेशयं श्रुतिशिरस्तत्सूत्रजातं परं
तत्त्वं गोभिरकाशि गाढतिमिरं चाखण्डि हृद्देशगम् ।
लोके सज्जनचक्रवाकनिचयः प्रामोदि तेनान्वहं
पूर्णप्रज्ञदिवाकरेण जलजं मा त्याजि मे मानसम् ॥

श्रीमदानन्दतीर्थार्यसंनिबन्धनमानसम् ।
प्रकाशितं येन गोभिस्तं जयार्यरविं भजे ।

श्रीमन्मध्वनिबन्धनामृतभवं सत्तर्कनालं लस-
न्मीमांसानयपत्रमब्जमहिराड्वाणीकनत्कर्णिकम् ।
वेदान्तस्मृतिसारसौरभमितं भृङ्गैः सदा सज्जनै-
र्येन व्यासयतीश्वरेण रचितं न्यायामृतं तं भजे ॥

न्यायामृतरसाभिज्ञं सर्वतन्त्रविशारदम् ।
वादिकुञ्जरहर्यक्षं विजयीन्द्रगुरुं भजे ॥

विद्वन्मण्डलसंश्लाध्यपाण्डित्यप्रतिभान्वितम् ।
रामचन्द्रगुरुं वन्दे मध्वसिद्धान्तदीक्षितम् ॥

श्रीमत्कृष्णपदाम्भोजजुषं हंसकुलोत्तमम् ।
आनन्दतीर्थरसिकं लक्ष्मीवल्लभमाश्रये ॥
दुर्वादिभीषणं शान्तं सर्वशास्त्रेषु कोविदम् ।
लक्ष्मीनाथमुनिं सेवे मम देशिकमन्वहम् ॥
वादिवारणपञ्चास्यो वैष्णवाब्धिसुधाकरः ।
वाञ्छितार्थप्रदो भूयाद्वाग्मी लक्ष्मीपतिर्गुरुः ॥

*　　*　　*　　*

न्यायामृतातिगम्भीरवाक्यानां सत्प्रपञ्चने ।
विबुधा विजयीन्द्राद्याः शक्ता यद्यपि नेतरे ॥
तथापि नापहास्योऽहं बालत्वान्महतामिह ।
पितरौ बालचेष्टां हि मन्वाते कौतुकावहाम् ॥
कुण्डलादिपदेनेयं कोण्डुभट्टतनूभुवा ।
न्यायामृतस्य विवृतिः क्रियते गिरिसूरिणा ॥

इह खलु पदवाक्यप्रमाणपारावारपारिणः सर्वतन्त्रस्वतन्त्रः

*　　*　　*　　*

श्रीमद्व्यासरायतीर्थश्रीमच्चरणः श्रीमदानन्दतीर्थीय

*　　*　　*　　*

न्यायामृताख्यं ग्रन्थं व्याचिकीर्षुः निर्बिभन्त्सितस्वग्रन्थस्य निरन्तरायपरिसमाप्तिप्रचयकैवल्याद्यखिलसाधनतासिद्ध्यै (. . . . .) स्वेष्टदेवतां प्रस्तौति—निखिलेति । लक्ष्मीसहायं नौमीति क्रियाकारकयोजनायां नौमीत्युत्तमपुरुषप्रयोगादेवाहमिति कर्ता लभ्यते ।

End:

अत्र पूर्वोत्तरकालीननिषेधप्रतियोगित्वं सत्यत्वाविरुद्धमिति त्रैकालिको निषेधादरः । मन्मत इति मिथ्यात्वनिर्वचनकर्तुर्ममाद्वैतिनो मत इत्यर्थः ॥

R. No. 862.

Paper. 9 × 3½ inches. Foll. 20. Lines, 8 in a page. Dēvanāgarī. Good.

Purchased in 1913-14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

Fol. 1b is left blank.

सर्वमूलटीकाद्यन्तश्लोकाः.

SARVAMŪLAṬĪKĀDYANTAŚLŌKĀḤ.

Gives the stanzas found both in the beginning and in the end of the various original works written by Ānandatīrtha as well as of the commentaries written thereon by Jayatīrtha

Complete.

Beginning:

गीताभाष्यटीका प्रमेयदीपिका—

गुणगणनिलयं पतिं रमाया जगदघदहनं च वासवीसूनुम् ।
मुनिकुलतिलकं च पूर्णबोधं गुरुमपि परमं गुरुं च मे वन्दे ॥

आनन्दतीर्थभगवत्पादाचार्यविनिर्मितम् ।
व्याख्यास्ये भगवद्गीताभाष्यं तत्करुणाबलात् ॥

End:

जयन्तीनिर्णय —

रोहिण्यामर्धरात्रे तु यदा कृष्णाष्टमी भवेत् ।
जयन्ती नाम संप्रोक्ता सर्वपापप्रणाशिनी ॥

तदन्त्यश्लोक—

सर्वायेति च मन्त्रेण ततः पारणमाचरेत् ।
धारायेति ततः स्वस्थो मुच्यते सर्वकिल्बिषैः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमद्गीताभाष्यादिसप्तत्रिंशद्ग्रन्थाद्यन्तश्लोकमङ्गलाचरणश्लोकाः श्रीमट्टीकाकृत्पू(जय)चरणतट्टीकाद्यन्तनिर्णयश्लोकाः समाप्ताः ॥

गीताभाष्यं सभावं नयविवृतिमनुव्याकृतिं चाणुभाष्यं
भाष्यं सूत्रस्य काव्यं प्रकरणदशकं वेदसारस्य भाष्यम् ।
कल्पद्वन्द्वं सुधाब्धिं स्तुतियुगलमपि स्वीयभावं स्मृतिं च
ऋग्भाष्यं तन्त्रसारं दशमतिरतनोद्धारतार्थस्य भावम् ।

एवं मध्वाचार्यकृताः ३७ ग्रन्थाः ।

सभावं सतात्पर्यम् । काव्यं यमकभारतम् । कल्पद्वन्द्वं यतिप्रणवकल्पं जयन्तीकल्पम् । सुधाब्धिं कृष्णामृतमहार्णवम् । स्तुतियुगलं नृसिंहनखं द्वादशस्तोत्रम् । स्वीयं भावं भारततात्पर्यम् ॥

R. No. 863.

Paper. $10\frac{1}{8} \times 4\frac{1}{4}$ inches. Foll. 14. Lines, 10 in a page. Dēvanāgarī. Injured.

Purchased in 1913-14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

तन्त्रसारव्याख्या—तन्त्रसारार्थसंग्रहः.

TANTRASĀRAVYĀKHYĀ: TANTRASĀRĀRTHASAṄGRAHAḤ.

A commentary on the Tantrasāra of Ānandatīrtha, which work is described under No. 5411 of the D.C.S. MSS, Vol. XI: by a disciple of Chalāri Nṛsiṁhācārya.

Contains from the forty-ninth stanza to the end of the first Adhyāya.

Beginning:

इदानीं कः पूज्यः कथं च तत्पूजा चेति प्रश्नद्वयं प्रतिवक्ति—पूज्य इति । भगवान्नारायण एव पूज्यः । पूजास्थानान्याह—चक्राब्जादिकेति । आदिपदेन भद्रकं तत्तद्देवतीयं यन्त्रं च ग्राह्यम् । तेषां लक्षणं तु स्वयमेव वक्ष्यति । अपिपदात् अग्निसूर्यादौ च । अचले सालग्रामादिचलप्रतिमायां वा पदात् देवालयादिस्थितस्थिरप्रतिमायां च ।

End :

जलं दलं तुलस्या वा . . . ।

आरा(धना)समर्थश्च दद्यादर्चनसाधनम् ।

पश्येद्वान्यकृतां पूजां सोऽपि स्यात्कृतपूजनः ॥ इतिं ॥

Colophon :

इति छलारिनृसिंहाचार्यशिष्येण चरिते तन्त्रसारार्थसंग्र(हे) प्रथमोऽध्यायः ॥

R. No. 864.

Paper. 10⅝ × 4¼ inches. Foll. 181. Lines, 12 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

छान्दोग्योपनिषद्भाष्यटीका—पदार्थकौमुदी.

CHĀNDŌGYŌPANIṢADBHĀṢYAṬĪKĀ : PADĀRTHA-KAUMUDĪ.

A commentary on Ānandatīrtha's Chāndōgyōpaniṣadbhāṣya, which is described under No. 469 of the D.C.S. MSS., Vol. I, Part III : by Vēdēśabhikṣu, a disciple of Vēdavyāsatīrtha.

Complete.

Beginning :

पूर्णानन्दमहाविबोधमखिलं संभासयन्तं रुचा

सर्वत्र प्रभुमीश्वरं गुणानीधिं दिव्याकृतिं केशवम् ।

जन्माद्यस्य यतो हि सर्वजगतो जन्मादिदोषोज्झितं

नित्यं पूर्णविबोधसर्वगुरुणोपास्यं भजे नित्यदा ॥

वेदभेदसुशाखेतं बोधादिफलसंयुतम् ।

भजतामिष्टदं व्यासं सुरद्रुममहं भजे ॥

हृत्तमोनाशकं शास्त्रप्रभया तत्त्वभासकम् ।

फलदं पूर्णबोधाख्यचिन्तामाणिमहं भजे ॥

प्रणम्य चरणौ वाणि याच एतत्तवान्वहम् ।
संनिधिर्मम वाच्यस्तु मानसे च निरन्तरम्
यत्प्रसादं विना तत्त्वमार्गे न गमनं भुवि ।
तं वन्दे पद्मनाभाख्यरविं सज्जनसेवितम् ॥
शास्त्रदुग्धाब्धिमामथ्य बुद्धिमन्दरभूभृता ।
प्राप्ता न्यायसुधा येन तं जयीन्द्रमहं भजे ॥
श्रीमध्वकृतवेदान्तभाष्यं येन प्रकाशितम् ।
वन्दे तं व्यासतीर्थार्यं जयराजनिषेवकम् ॥
विद्याधिराजादिमहामुनीन्द्रा हृद्येव संचिन्तितविष्णुतत्त्वाः ।
उद्योगयुक्ता भगवत्कथायां सद्यो ममानुग्रहमेव कुर्युः ॥
ब्रह्मण्यतीर्थवार्ध्युत्थं व्यासतीर्थसुधाकरम् ।
तात्पर्यचन्द्रिकायुक्तं वन्दे तापत्रयापहम् ॥
रघूत्तममुनीन् विद्यागुरुं परगुरूंस्तथा ।
वन्दे श्रीमध्वशास्त्रार्थविनिर्मलमतीनहम् ॥

निरस्तं हृत्तमो येन प्रशस्तं सन्मनोऽम्बुजम् ।
समस्तं भासितं वन्दे वेदव्यासदिवाकरम् ॥
तथैतत्कृपया श्रीमदाचार्यमुखनिस्सृतम् ।
छन्दोगोपनिषद्भाष्यं व्याकरिष्ये यथामति ॥

न मात्सर्यादिदोषेण न वा विद्यातिगर्वतः ।
किं तु वाचां विशुद्ध्यर्थं यत्नोऽयं न हि दोषभाक् ॥

इह हि नानाविधसांसारिकक्लेशदर्शनेन कुपितफणिफणच्छायासमीकृतापरसुखानां शमदमादिमतामधिकारिणाम्

* * * *

शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति—अत्युद्रिक्तेति । हरिमुपास्महे इति

क्रियाकारकयोजना । श्रुतौ 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति प्रथमतो भगवदुपास्तिविधानादुपास्तिरूपं मङ्गलमनुष्ठितम् ।

End:

नित्यानन्देति । पूर्णाखिलगुणैः नित्यदेत्यनेन न मम मङ्गलाचरणं प्रयोजनोद्देशेनेति सूचयति । तस्मै उपनिषदुक्तगुणाय विष्णवे नमश्चास्तु । त्रिद्विरुक्तिरादरार्थेत्यशेषमतिमङ्गलम् ॥

व्यासं पूर्णमतेर्विदोषहृदयाम्भोजे सदा वासितं
श्रीशं कंजभवादिसर्वविबुधैर्नीचोच्चभावस्थितैः ।
उच्चैर्गेयमनन्तसामविभवैरोङ्कारवाच्यं परं
वन्दे सुन्दरविग्रहं करुणया ज्ञानाभयेतं मुहुः ॥
अगाधेऽस्मिन् भाष्ये सुरवरहरेन्द्रादिविबुधै-
रलं व्यासे(रुये)ये मे कृतिरप(हह)हासास्पदतमा ।
तथापि श्रीव्यासामलमतिपदाशक्तिवशतो
गुरूणां कारुण्यादपि भवतु भूषा कृतिरियम् ॥
छान्दोग्योपनिषद्भाष्यपाश्चिकाकरणेनं यत् ।
पुण्यं भवेदवाप्नोतु सर्वं मम गुरुः स्वयम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमच्छान्दोग्योपनिषद्भाष्यस्य टीकायां वेदव्यासतीर्थपूज्यपादशिष्यवेदेशभिक्षुविरचितायां पदार्थकौमुद्यामष्टमोऽध्यायः ॥

R. No. **865.**

Paper. 13¼ × 5 inches. Foll. 18. Lines, 15 in a page. Dēvanāgarī. Injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

मध्वविजयः—मन्दोपकारिणीसहितः.

MADHVAVIJAYAḤ WITH THE COMMENTARY MANDŌPAKĀRIṆĪ.

A short poem dealing with the life of Madhvācārya, the founder of the Dvaita school of the Vēdānta: by Nārāyaṇapaṇḍita. It is followed by the commentary of Śēṣa, who is a disciple of Chalāri Nṛsiṁhācārya.

Contains the first Sarga complete.

Beginning:

लक्ष्मीनारायणं वन्दे व्यासं मध्वजयादिकान् ।
गुरून् मूलादिपरमान् वन्दे विद्यागुरूंश्च मे ॥
छलारिनरसिंहार्यशिष्यः शेषाभिधो बुधः ।
प्रवक्ति मध्वविजयं मन्दोपकृतये स्फुटम् ॥

अथ 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' इत्युक्तेः हरिभक्तिवत् गुरुभक्तेरपि पुरुषार्थसाधनत्वेन

* * * *

श्रीमन्नारायणपण्डिताचार्यः शिष्टाचारपरम्पराप्राप्तं निर्विघ्नेन परिसमाप्तिप्रचयहेतुं स्वेष्टदेवताप्रणामं विधाय शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति—कान्तायेति ।

कान्ताय कल्याणगुणैकधाम्ने नवद्युनाथप्रतिमप्रभाय ।
नारायणायाखिलकारणाय श्रीप्राणनाथाय नमस्करोमि ॥

कान्ताय मनोहराय; 'कान्तं च कमनं कम्रं कमनीयं मनोहरम्' इति धनंजयः। कल्याणगुणैकधाम्ने कल्याणाः मङ्गलरूपाः; 'कल्याणं मङ्गलं शुभम्' इत्यमरः । गुणाः ज्ञानादयः, कल्याणाश्च ते गुणाश्च कल्याणगुणाः तेषामेकं मुख्यं धाम आश्रयः ।

End:

विश्वं मिथ्या विभुरगुणवानात्मनां नास्ति भेदो
दैत्या इत्थं व्यदधत गिरां दिक्षु भूयः प्रसिद्धिम् ।

आनन्दाद्यैर्भुवि गुणगणैः पूरितो वासुदेवो
मन्दं मन्दं मनसि च सतां हन्त नूनं तिरोऽभूत् ॥

इति श्रीमन्नारायणपण्डिताचार्यविरचिते मध्वविजये अनन्दाङ्के प्रथमः सर्गः ॥

विश्वं मिथ्येति । दैत्याः भुवि जिता मणिमृदादयः । दिक्षु नानादेशेषु । विश्वं प्रपञ्चः । मिथ्या सदसद्विलक्षणः ।
प्रतिसर्गान्त्यश्लोकेषु आनन्दपदाङ्कितमिदं काव्यम् ॥ मन्दाक्रान्ता वृत्तम्, 'मन्दाक्रान्ताम्बुधिरसनगैर्म्भौ नतौ तो गुरू चेत्' इति तल्लक्षणात् ॥

Colophon:

इति श्रीमध्वविजयटीकायां श्रीमच्छलारिनृसिंहाचार्याणां शिष्येण शेषेण विरचितायां मन्दोपकारिण्यां प्रथमः सर्गः ॥

R. No. **866.**

Paper. 12⅛ × 4⅞ inches. Foll. 29. Lines, 12 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

तत्त्वप्रकाशिकाविवृतिः—भावचन्द्रिका.

TATTVAPRAKAŚIKĀVIVṚTIḤ: BHAVACANDRIKĀ

A commentary on the Tattvaprakāśikā of Jayatīrtha, which is described under No. 4813 of the D.C.S. MSS., Vol. X: by Vātivāla Narasiṁha, son of Upēndrabhaṭṭa and disciple of Rāmacandrabhaṭṭa

Begins in the course of the fifth Sūtra of the first Pāda in the third Adhyāya and breaks off in the twenty-seventh Sūtra of the fourth Pāda of the same Adhyāya.

Beginning:

(काकेभ्यो दधिर) क्ष्यतामित्यत्र काकशब्दः स्वार्थमभिधायैव दध्युपघातत्वरूपोपलक्ष्यतावच्छेदकं पुरस्कृत्य काकानां मार्जारादीनां च समुदायमाह, तथात्रापि (अ)ग्नौ होम्यत्वलक्षणमुपलक्ष्यतावच्छेदकं पुरस्कृत्याजह-

लक्षणया श्रद्धा आपः ताभिर्युक्तो जीवश्चेत्येतत्त्रितयमाहेत्यर्थः । उपसंहार इति । इति तु पञ्चम्यामाहुतौ हुतायामापः पुरुषवचसो भवन्तीत्युपसंहार इत्यर्थः ।

End :

विरोध इत्यत आह—सामान्यत इति । तथाचेश्वरस्य फलदातृत्वप्रतिपादकवाक्यानामौपचारिकत्वं न जैमिनिमतमिति भावः ॥

Colophon :

इति श्रीमद्रामचन्द्रतीर्थपूज्यपादानां शिष्येणोपेन्द्रभट्टसूनुना वाति वालनरसिंहेण संगृहीतायां तत्त्वप्रकाशविवृतौ भावचन्द्रिकायां तृतीयाध्यायस्य द्वितीयः पादः ॥

ननूपासना नाम ध्यानम्, न तदिहोच्यते, किंतु ज्ञानमेवेत्याह—उपासना नामेति ।

* * * *

मुक्तस्योपासना कर्तव्येत्याद्य(द्ये) प्रातिस्विकं दोषमुक्त्वा द्वितीयेऽपि प्रतिनियतं दोषमाह—अपिहितत्वादेवेति । सोपाधिकमेवोपासनमित्युक्तरीत्या मुक्तानामुपासनायोगान्मुक्तेः.

R. No. 867.

Paper. 9 × 4 inches. Foll. 45. Lines, 9 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

भागवततात्पर्यनिर्णयव्याख्या—दीपिका.

BHĀGAVATATĀTPARYANIRṆAYAVYĀKHYĀ : DĪPIKĀ.

A commentary on the Bhāgavatatātparyanirṇaya of Ānandatīrtha, which work is described under No. 4823 of the D.C.S. MSS., Vol. X.

Contains Adhyāyas one to twelve in the seventh Skandha.

Beginning :

‘निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान्प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥’

इत्यत्र परमात्मनो दृष्टं यद्बाध्यबाधकस्वरूपत्वं तदुच्यत इति भातीत्यतः प्रमाणेनैव तदभिप्रायमाह—बाध्यादिस्थ इति । हे बाध्यताविंगत इति संबुध्यन्त इत्यर्थः ।

'ज्योतिरादिरिवाभाति संघातान्न विविच्यते ।
विन्दन्त्यात्मानमात्मस्थं मथित्वा कवयो (हि) तत् ॥'

इत्यत्र ज्योतिरादिरिवेत्यनेन किमुच्यत इति न पूर्वोत्तरार्धयोश्च संगतिर्न भातीत्यतः प्रमाणेनैव तदभिप्रायमाह—दधिस्थेति ।

End:

दग्धयोनिरनलो यथा न दहति, योनिभूतारणेर्दग्धत्वात् । तथात्मानं ज्ञात्वा विरमेत्तस्य कार्यं न विद्यत इत्युक्तेरिति भावः । उक्तार्थे प्रमाणमाह नेति ।

Colophon:

इति श्रीमद्भागवततात्पर्यदीपिकायां सप्तमे द्वा(त्रयो)दशोऽध्यायः ॥

'पश्येवासन् यदा विश्वं परे सदसतोऽव्ययः'

इत्यत्रात्मनि स्वस्मिन्निति भातीत्यतो वाभि.

R. No. **868.**

Paper. 9¼ × 4 inches. Foll. 160. Lines, 12 in a page. Dēvanāgarī. Good.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Pal̲l̲ikoṇḍa.

भागवततात्पर्यनिर्णयव्याख्या—दीपिका.

BHĀGAVATATĀTPARYANIRṆAYAVYĀKHYĀ: DĪPIKĀ.

Another commentary on the Bhāgavatatātparyanirṇaya described under No. 4823 of the D.C.S. MSS., Vol. X.

Wants beginning in the second Adhyāya of the eleventh Skandha and breaks off in the thirtieth Adhyāya of the same Skandha.

Beginning:

त्यथो रोदितीत्याद्युक्तमिति भावः । बाह्यलिङ्गप्रदर्शकेषु उभयात्मकेषु बाह्यलिङ्गप्रदर्शनेन तदीयभक्तिर्ज्ञातुं शक्या । आन्तरभक्तेषु तज्ज्ञानं कथमित्यत उक्तम्—मुखप्रसादादिति । येऽपि बाह्यलिङ्गप्रदर्शकास्तेष्वपि मुखप्रसादादिकमेव भक्तिदार्ढ्यज्ञापकम् ।

* * * *

Colophon:

इति श्रीमद्भागवततात्पर्यदीपिकायामेकादशस्कन्धे द्वितीयोऽध्यायः ।

End:

ननु सत्यमनृतं मायीत्युक्तत्वात् मर्त्यमनृतमित्युक्त्या सत्यत्वमेवोक्तं स्यादित्याशङ्क्यात्र सत्यशब्दविवक्षितार्थमाह—सर्वदेति । सर्वदा एकप्रकारत्वाद्ब्रह्म सदा सत्यमुच्यत इत्यर्थः ॥

Colophon:

इति श्रीभागवततात्पर्यदीपिकायामेकादशस्कन्धे एकोनत्रिंशोऽध्यायः॥

* * * *

दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्सा(म्य)मीयुरित्यत्र कोऽनुमानः कवीनामित्यनेन दुर्गम(ा)र्थमिति व्याकरोति—क इति । मानम.

R. No. 869.

Paper. 10 × 4⅞ inches. Foll. 33. Lines, 13 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

Foll. 2, 3 and 4 are wanting.

भगवद्गीता—गीतार्थसंग्रहसहिता.

BHAGAVADGĪTĀ WITH GĪTĀRTHASAṄGRAHA.

The well-known Bhagavadgītā together with a commentary thereon by Rāghavēndrayati, interpreting it in accordance with the views of the Dvaita-Vēdānta.

Breaks off in the sixty-eighth stanza of the second Adhyāya.

Beginning:

लक्ष्मीनारायणं नत्वा पूर्णबोधादिकान् गुरून् ।
कुर्मः श्रीविष्णुगीताया भाष्याद्युक्तार्थसंग्रहम् ॥
'स्त्रीशूद्रब्रह्मबन्धूनां त्रयी न श्रुतिगोचरा ।
इति भारतमाख्यानं कृपया मुनिना कृतम्' ॥ इति

भागवतोक्त्या वेदार्थज्ञानानधिकारिणां स्त्रीशूद्रादीनां धर्मज्ञानद्वारा मोक्षो भवेदिति भगवान् वेदव्यासः संभवसभारण्यविराटोद्योगभीष्मद्रोणकर्णशल्यगदासौप्तिकशान्त्यानुशासनिकाश्वमेधिकमौसलमहाप्रस्थानस्वर्गारोहणभविष्यत्पर्वभेदेनाष्टादशपर्वात्मकं भारतं कृत्वा तत्र भीष्मपर्वणि भारतपारिजातमधुभूतां सर्वभारतार्थसंग्रहभूतां श्रीकृष्णार्जुनसंवादरूपां भगवद्गीतामुपनिबबन्ध । तत्र पूर्वषट्केन ज्ञानोपायोक्तिः ।

* * * *

धर्मक्षेत्रे कुरुक्षेत्रे (. . . .) किमकुर्वत संजय ॥

धर्मेति । धर्मसाधनभूमौ कुरुक्षेत्रे युयुत्सवः युद्धमिच्छन्त एव समवेताः ।

* * * *

Colophon:

इति श्रीमद्गीतार्थसंग्रहे राघवेन्द्रयतिकृते प्रथमोऽध्यायः ॥

End:

प्रजहातीत्यादिनोक्तज्ञानलक्षणस्यासंभवनिरासाय ज्ञानस्य महाप्रयत्नसाध्येन्द्रियनिग्रहसाध्यत्वं विष.

R. No. 870.

Paper. $9\frac{1}{4} \times 3\frac{3}{4}$ inches. Foll. 43. Lines, 9 on a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

तन्त्रसारः—टिप्पणसहितः.

TANTRASÂRAḤ WITH COMMENTARY.

The work Tantrasāra is described under No. 5412 of the D.C.S MSS., Vol. XI. The author of the commentary is not known.

Breaks off in the fifty-sixth stanza of the fourth Adhyāya.

Beginning:

अनन्तगुणसंपूर्णं सर्वदोषविवर्जितम् ।
मदिष्टदेवतां व्यासं भूयो भूयो नमाम्यहम् ॥

श्रीमदानन्दतीर्थार्यश्चिकीर्षिताविघ्नसमाप्त्याद्यनेकप्रयोजनकं स्वकृतं नारायणोत्कर्षकीर्तनरूपमङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति जयतीति ।

जयत्यब्जभवेशेन्द्रवन्दितः कमलापतिः ।
अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः ॥

कमलापतिर्नारायणो जयति । तथा चोक्तम् जयिर्जयाभिभवयोरिति । अत्र रमाग्रहणस्य तत्र तत्रोक्तप्रयोजनमनुसंधेयम् । न(अ)निर्धारितस्वरूपस्योत्कर्षकीर्तनं युक्तम् । नच लक्षणेन विना निर्धारणम् इत्यतो विभवाद्यनन्तलक्षणान्याह अनन्तेति ।

* * * *

Colophon:

इति तन्त्रसारसंग्रहटिप्पण्यां प्रथमोऽध्यायः ॥

End:

तत्र मन्त्राणां फलमाह-मन्त्राः समस्ता इति ।
अध्यायत्रयस्य वैयर्थ्यमाशङ्क्य परिहरति तन्त्रेति ॥

Colophon:

इति टिप्पण्यां तृतीयोऽध्यायः ॥

* * * *

अक्षशब्देनाक्षमालोच्यते । सुबोध इति ज्ञानमुद्रया युक्तः । अनेन शङ्खसहितहस्तं मालायुतहस्तं चाधोहस्ते पुस्तकज्ञानमुद्राभ्यां युक्ते अब्ज-

वद्रक्तत्वादिगुणभवो यस्येति विग्रहः । नस्तः नासिकायाः । अशेषतः अशेषाः ज्ञा.

R. No. 871.

Paper. 14⅓ × 5¾ inches. Foll. 22. Lines, 9 on a page. Dēvanāgar Injured.

Purchased in 1913-14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

न्यायामृतम्.

NYĀYĀMṚTAM.

Same work as that described under No. 4796 of the D.C.S. MSS., Vol. X, which manuscript wants beginning.

Breaks off in the Satvaniruktibhaṅga of the first Paricchēda.

Beginning:

निखिलगुणनिकायं नित्यनिर्धूतहेयं
शुभतममतिमेयं सिद्धसौख्याप्त्युपायम् ।
सकलनिगममेयं सर्वशब्दाभिधेयं
नवजलधरकायं नौमि लक्ष्मीसहायम् ॥
विघ्नौघवारणं सत्याशेषविश्वस्य कारणम ।
करुणासिन्धुमानन्दतीर्थबन्धुं हरिं भजे ॥
अभ्रमं भङ्गरहितमजडं विमलं सदा ।
आनन्दतीथमतुलं भजे तापत्रयापहम् ॥
चित्रैः पदैश्च गम्भीरैर्वाक्यैर्मानेन खण्डितैः ।
गुरुभावं व्यञ्जयन्ती भाति श्रीजयतीर्थवाक् ॥
समुत्सार्य तमस्स्तोमं सन्मार्गं संप्रकाश्य च ।
सदा विष्णुपदासक्तं सेवे ब्रह्मण्यभास्करम् ॥
ज्ञानवैराग्यभक्त्यादिकल्याणगुणशालिनः ।
लक्ष्मीनारायणमुनीन् वन्दे विद्यागुरून्मम ॥
श्रीमध्वशास्त्रदुग्धाब्धिं धीमन्दरमहीभृता ।
आमथ्योद्ध्रियते न्यायामृतं विबुधतृप्तये ॥

विक्षिप्तसंग्रहात्क्वापि क्वाप्युक्तस्योपपादनात् ।
अनुक्तकथनात्क्वापि सफलोऽयं श्रमो मम ॥

ननु मिथ्यैव विश्वम्; तथाहि तत्र विप्रतिपत्तिः ब्रह्म प्रमान्येन च सप्रकारेण वा अबाध्यत्वे सति असद्विलक्षणत्वे सति ब्रह्मान्यत् प्रतिपन्नोपाधौ त्रैकालिकानिषेधप्रतियोगि, नवा ।

End:

न सप्तमः, संयोगादावव्याप्तेः । शुक्तिरूप्यादेरधिकरणाद्यभावेनातिव्याप्तेश्च । नाष्टमः, बाधस्य प्रतिपन्नोपाधौ त्रैकालि.

R. No. **872.**

Paper. 9½ × 4¼ inches. Foll. 34. Lines, 12 on a page. Dēvanāgarī. Injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

तन्त्रसारव्याख्या––गूढवाक्यार्थविवृतिः.

TANTRASĀRAVYĀKHYĀ : GŪḌHAVĀKYĀRTHA-VIVṚTIḤ.

A commentary on the Tantrasāra of Ānandatīrtha.

Wants the first leaf in the first Adhyāya and breaks off in the 133rd stanza of the fourth Adhyāya.

Beginning:

कमन्त्रजपतत्पूजाहोमादेः कर्तव्यत्वात् तदर्थं जपादिकमनुतिष्ठतां 'यावतो ह्यननुष्ठाने कर्मपूर्तिर्न विद्यते । तावत्समस्तमपि सा' इतिकर्तव्यताकं वक्तुं विष्णूदिततन्त्रसारसंग्रहरूपं मङ्गलं सकलपुरुषार्थप्रवर्षकं ग्रन्थं कर्तुकामः स्वयमन्तरायविधुरोऽपि निरन्तरायपरिसमाप्त्यादिफलकं परममङ्गलं श्रीरमानाथस्तवनरूपं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति जयतीति । कमलापतिर्जयति उत्कृष्टो वर्तते । तथाचोक्तम्––जयिर्जयाभिभवयोरित्यादि । सकलवाङ्मनोनियामिकाया रमाया अपि स्तुतेरावश्यकत्वात् नारायण इत्याद्यनुक्त्वा कमलापतिरित्युक्तम् ।

End:

यावत इति । सुफलत्वमेव विवृणोति प्रोच्यत इति ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमत्तन्त्रसारगतगूढवाक्यार्थविवृतौ तृतीयोऽध्यायः ॥

* * * *

तदपेक्षयैव प्रातिलोम्यानुलोमत इत्युक्तिः, न वास्तवापेक्षया । एवं चात्रोक्तप्रातिलोम्येन संहारक्रममपेक्ष्य व्युत्क्रमेण व.

R. No. **873.**

Paper. 11 × 4¾ inches. Foll. 47. Lines, 12 on a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

न्यायामृतव्याख्या—तरङ्गिणी.

NYĀYĀMṚTAVYĀKHYĀ : TARAṄGIṆĪ.

A commentary on the Nyāyāmṛta, for a description of which work see under No 4796 of the D.C.S. MSS., Vol. X: by Rāmācārya, a younger brother of Nārāyaṇa.

Begins towards the end of the third Bhaṅga and breaks off in the tenth Bhaṅga of the first Paricchēda.

Beginning:

. . थमेज्ञानकालवृत्तित्वविशेषणोक्तौ अविद्यानिवृत्त्युत्तरकालीने जीवन्मुक्त्यवस्थोत्पन्ने भोगादावसिद्धिः । अविद्याशे(ले)शसमकालीनत्वोक्तौ घटादावसिद्धिः । अन्यतरसमकालीनत्वोक्तावप्रयोजकत्वम् । प्रत्येकमुक्तिपक्षे पञ्चमप्रकाराविद्यानिवृत्तौ च व्यभिचारः ।

* * * *

व्यासाद्रिसृततर्काम्बुपूरैः पक्षयुगं युजि ।
न्यायामृततराङ्गिण्यां दृश्यत्वं दृश्यतां बुधैः ॥

दृश्यत्वहेतुभङ्गः ॥

End:

एताभ्यां चतुर्होतृपञ्चहोतृमन्त्राभ्यां हविषां पुरोडाशादीनामभिमर्शनं पू(पौ)र्णमास्यमावास्ययोर्भेदेन गृहीतम् । तत्र संसृष्टत्वाद्धविषां सकृदेवाभिमर्शनं सर्वेषां पूर्णमासीहविषाम् । एवममावास्यायामपि सर्वेषां हविषामभिम(र्शनं सकृदेव).

R. No. **874.**

Paper. $12\frac{1}{4} \times 4\frac{1}{4}$ inches. Foll. 129. Lines, 11 on a page. Dēvanāgarī. Slightly injured.

Purchased in 1913-14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

न्यायामृतप्रकाशः.

NYĀYĀMṚTAPRAKĀŚAḤ.

Another commentary on the Nyāyāmṛta.

Begins towards the end of the ninth Bhaṅga and breaks off in the twenty-fourth Bhaṅga of the first Paricchēda.

Beginning:

(अन्यो)न्याश्रयादिति । तत्त्वज्ञाने प्रतियोगिज्ञानप्राप्त्या असत्त्वज्ञानं तज्ज्ञाने तद्धटितसत्त्वज्ञानमित्यन्योन्याश्रय इत्यर्थः । अत एवेति । सत्त्वस्य प्रमाविषयत्वयोग्यत्वप्रयोज्यत्वेन तस्य सत्त्वादन्यत्वादेवेत्यर्थः ।

* * * *

प्रातिभासिककालसंबन्धित्वेन न कालसंबन्धित्वलक्षणस्यारोपितेऽतिव्याप्तिरित्यर्थः ॥

इति सत्त्वनिरुक्तिविवरणम् ॥

End:

न द्वितीय इत्याह—प्रभायामिति । रूपमिति । यतो ज्ञानमेवाज्ञाननाशकं प्रभा च न ज्ञानमिति भावः । तथाच न प्रभादृष्टान्तेन चि.

R. No. **875.**

Paper. 12⅛ × 4¼ inches. Foll. 54. Lines, 22 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913-14 from M.R Ry. Hariyācār of Pallikoṇḍa.

ब्रह्मसूत्रानुव्याख्यानटीका—न्यायसुधा.

BRAHMASŪTRĀNUVYĀKHYĀNAṬĪKĀ: NYĀYA-SUDHĀ.

Foll. numbered 1—4, 49, 50 and 57—99 are wanting.

Same work as that described under No. 4820 of the D.C.S. MSS., Vol. X.

Wants beginning and breaks off at the end of Jyōtiradhikaraṇa in the first Pāda of the first Adhyāya.

End:

तत्र तु भूतादिपादव्यपदेशबलेन प्रकृतस्य ब्रह्मत्वोपपादनमिति उच्यते। एवं.

R. No. **876.**

Paper. 10⅝ × 4¾ inches. Foll. 212. Lines, 17 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913-14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

ब्रह्मसूत्रानुव्याख्यानटीका—न्यायसुधा.

BRAHMASŪTRĀNUVYĀKHYĀNAṬĪKĀ : NYĀYA-SUDHĀ.

Same work as that described under No. 4820 of the D.C.S. MSS., Vol. X.

Contains the Adhyāyas 2, 3 and 4 imperfectly and incompletely. Many leaves are wanting.

Beginning:

तथा नीलापरोक्षज्ञानसमनन्तरं नीलार्थी नियमेन बहिः प्रवर्तते। तेनानुमीयतेऽनेन बहिरर्थ एव साक्षात्कृत इति। न ह्यन्यत्र ज्ञानमन्यत्र प्रवृत्तिर्युज्यते ; अतिप्रसङ्गात्। मध्येऽनुमानं तु निरसिष्यते।

* * * *

तथान्यागमावष्टम्भेन प्रत्यवतिष्ठमानस्तथैव बोधनीय इत्याशयवता मन्त्रावुदाहृताविति सर्वमनवद्यम् ॥

Colophon :

इति श्रीमत्पूर्णप्रमति (भगवत्पाद) सुकृते-
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययतिना ।
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ
द्वितीयेऽध्यायेऽयं समयचरणः पर्यवसितः ॥

श्रीमन्न्यायसुधायां द्वितीयाध्यायस्य द्वितीयः पादः ॥

End :

भगवत्स्वरूपप्रतिपादनेनैव ग्रन्थोपसंहारः समुचितः इत्याशयवान् नित्यापरोक्षभगवन्तं संबोध्य स्तौति—निश्शेषेति । भूतिर्महालक्ष्मीः ॥

वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा चरिता ।
भ्रियतां हृदय सदये कमलामहिलेन रूपेण ॥
न वैदुष्यभ्रान्त्या न च वचनचातुर्यकुधिया
न मात्सर्यावेशान्न च चपलतादोषवशतः ।
परं श्रद्धाजाड्यादकृषि कृतिमाचार्यवचसि
स्खलन्नप्येतस्माज्जगति न हि निन्द्योऽस्मि विदुषाम् ॥
अनुव्याख्यामृताम्भोधेः समुत्पन्नातिनिर्मला ।
इयं न्यायसुधा भौमैर्विबुधैः सेव्यतां सदा ॥

Colophon :

इति श्रीमत्पूर्णप्रमतिभगवत्पादसुकृते-
रनुव्याख्यानस्य प्रगुणजयतीर्थाख्ययातिना ।
कृतायां टीकायां विषमपदवाक्यार्थविवृतौ
चतुर्थेऽध्यायेऽस्मिश्चरमचरणः पर्यवासितः ॥

इति श्रीमन्नायसुधायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

R. No. **877.**

Paper. 11½ × 4 inches. Foll. 158. Lines, 9 in a page. Dēvanāgarī. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

न्यायसुधाव्याख्या—वाक्यार्थचन्द्रिका.

NYĀYASUDHĀVYĀKHYĀ: VĀKYĀRTHACANDRIKĀ.

Same work as that described under R.No. 458 *ante*.

Wants beginning and end in Jijñāsādhikaraṇa.

End:

ननु परिहारान्तरं पूर्वसूत्रान्वेषणेन कृतवता भाष्यकृता अर्थात् प्रकारान्तरं दूषितमेव भवति इत्यतः प्रकारस्य प्रकारान्तरादूषकत्वन्याया-विरोधस्तर्हीत्याशयेनाह—न चेति। एतेनेति पूर्वोत्तरसूत्रानुसारेण सकल-जगज्जन्मादिका.

R. No. **878.**

Paper. 12 × 5 inches. Foll. 88. Lines, 9 in a page. Dēvanāgarī. Injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Pallikoṇḍa.

तत्त्वप्रकाशिकाव्याख्या—भावबोधः.

TATTVAPRAKĀŚIKĀVYĀKHYĀ: BHĀVABŌDHAḤ

A commentary on the Tattvaprakāśikā of Jayatīrtha, which work is described under No. 4813 of the D.C.S. MSS., Vol. X: by Raghūttamayati, a disciple of Raghuvarya.

Wants two leaves in the beginning and breaks off in the fourth Adhikaraṇa of the third Pāda in the first Adhyāya.

Beginning:

नादावशक्तत्वादेव भाष्येण जितत्वं जितमहावैकर्तनाम्बुव्रजत्वे। जित-चन्द्रचन्द्रिकत्वे हेत्वन्तरं निर्दोषमिति। वैकर्तनाम्बुव्रजचन्द्रिकयोः ह्रा-सादिदोषयुक्तत्वादिति। जितासिन्धुराजत्वे हेतुः अमितमिति। अर्थतोऽ-मितत्वं द्रष्टव्यम्, गन्धस्यापारिमितत्वात्।

* * * *

अन्त्ये बद्धश्रुतिलिङ्गप्रापितान्यपरत्वशङ्काविषयप्राणादिशब्दानां समन्वयोक्तिरिति ॥

Colophon :

इति श्रीमद्रघुवर्यपूज्यपादशिष्यरघूत्तमयतिकृते श्रीमज्जयतीर्थश्रीचरणविरचिततत्त्वप्रकाशिकाभावबोधे प्रथमाध्यायस्य प्रथमः पादः ॥

End :

शब्दादेव प्रमितिः। आविनाशित्वसाम्यादित्यत्राक्षरशब्दप्रवृत्तिनिमित्ताविनाशित्वस्येवेशानशब्दस्यापि यौगिकत्वेन तत्प्रवृत्तिनिमित्तप्रेरकत्वस्योभयत्र प्रसिद्धिहेतुत्वे स्फुटमिति पुनः शब्दा ईशानो वज्रो ज्योतिराकाशः इति न्यायविवरणे साधारण्यमात्रमनुवर्त्योक्तामिति भावेनाह—अत्र प्रेरकत्वसाम्येनेति ।

* * * *

अतः ईशानशब्दयुक्तश्रुत्यंशमुदाहरति—अङ्गुष्ठमात्र इति । किं विष्णुरिति । अत्र ईशानो भूतभव्ये.

R. No. 879.

Paper. 9¼ × 4¼ inches. Foll. 53. Lines, 15 in a page. Dēvanāgarī
Very much injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Palli-koṇḍa.

तत्त्वप्रकाशिकाटीका—भावदीपः.
TATTVAPRAKĀŚIKAṬĪKĀ : BHĀVADĪPAḤ.

Similar to the above. By Rāghavēndrayati.

Wants beginning in the third Pāda of the second Adhyāya and breaks off in the fourth Pāda of the fourth Adhyāya.

Beginning :

व्युच्चरन्ति ब्रह्मन् लयमित्यादि श्रुतावुक्तेत्यप्यर्थो दर्शितः । तेन युक्तिविरोधमात्रेण श्रुतेरप्रामाण्यं कथमभिप्रेतमिति निरस्तम् । भाष्योक्त-

स्यावान्तरफलत्वं दर्शयन् तस्यापि नान्तरीयफलं वदन् महाफलमाह—तस्यानादीत्यादिना ।

* * * *

स्वरूपोपाधिवैचित्र्यस्यैवाहष्टानियमपदेनाभिप्रेतत्वान् । विवृतमेतच्चन्द्रिकायाम् । तत्तस्माच्छ्रुतेर्युक्तेश्च सावकाशत्वादित्यर्थः । युक्तो जगत्कारणे नारायण इत्यादिफलोक्तिः ।

Colophon:

इति श्रीमद्भाष्यटीकाभावदीपे राघवेन्द्रयतिकृते द्वितीयाध्यायस्य तृतीयः पादः ॥

अस्य पूर्वपादसाङ्कर्यमुद्भाव्य द्वेधा भेदमाह अत्रापीति । पूर्वत्रापीति । तथैव प्रतिनयं प्रदर्शितत्वात् । अन्यथा तत्र पूर्वपक्षानुदयादिति भावः ।

End:

तथानुस्मृतिरिति फलोक्तिः ॥

Colophon:

इति श्रीमद्भाष्यटीकाभावदीपे राघवेन्द्रयतिकृते चतुर्थाध्यायस्य तृतीयः पादः ॥

* * * *

सम्प्रतिपन्नो बद्धजीवः । हेतोरप्रयोजकत्वनिरासकतया स्मृतिमवतारयति—संसारिणामिति । इत्यत आहेति । विपक्षे स्मृतिविरोध इति भावः । व्युत्क्रमेण भाष्यं व्याचष्टे—अस्त्येवेति । ता यो वेदेति तच्छब्दार्थव्यक्तचर्थं पूर्वशेषमाह—ता वा इति । चत.

R. No. **880.**

Paper. 10×5½ inches. Foll. 34. Lines, 14 in a page. Dēvanāgarī. Injured.

Purchased in 1913–14 from M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

ब्रह्मसूत्रभाष्यव्याख्या—तन्त्रदीपिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : TANTRA-DĪPIKĀ.

A commentary on the Brahmasūtrabhāṣya of Ānandatīrtha: by Rāghavēndrayati.

Begins towards the close of the first Pāda of the second Adhyāya and breaks off in the twenty-seventh Sūtra in the fourth Pāda of the third Adhyāya.

Beginning:

राहित्ये च युक्त्याविरोध उच्यते । सर्वेषां धर्माणां ज्ञानानन्दादि-सद्गुणानां दुःखद्वेषादिदोषाभावानां लेशेऽनुपपत्तेः । ब्रह्म सदा प्राप्तसर्व-सद्गुणम्, तत्प्रेप्सुत्वे सति तत्र शक्तत्वात् सामान्यव्याप्त्या

* * * *

अन्त्यनये सर्वगुणपूर्णत्वं सर्वदोषशून्यत्वं चेत्यादि सिद्धम् । एव-मग्रेऽपि विवेक्तव्यम् । भीषयत्यस्मा . . . .

Colophon:

इति राघवेन्द्रकृततन्त्रदीपिकायां द्वितीये प्रथमः ॥

इतरेषां चानुपलब्धेरित्युक्तहेतुविस्ताररूपत्वात् तदनन्तरं समया-विरोधोऽत्र पाद अभिधीयते ।

End:

इतश्चैवमित्याह - दर्शनाच्च । सत्यो ज्ञानः परमानन्द आत्मा इत्यादिश्रुतौ देवैस्तथोपास्तिः कार्या नान्यैरित्यस्यार्थस्य दर्शनाच्चैव-मित्यर्थः ॥

Colophon:

इति श्रीतन्त्रदीपिकायां तृतीयाध्यायस्य तृतीयः पादः ॥

प्रागुक्तोपासनासाध्यापरोक्षज्ञानस्य विद्यैवेत्यत्र स्वतन्त्रस्यैव मुक्ति-हेतुत्वरूपसामर्थ्यसिद्धावपीह पादे मुक्त्यन्यफलादावपि सामर्थ्यमस्तीत्यु-च्यते ॥

* * * *

किमर्थोऽयं विधिरित्यत उक्तम्—तदित्यादि । तदङ्गतया प्रस्तुतज्ञानाङ्गतया ज्ञानप्रतिष्ठापकतया तेषां शमदमादीनामवश्यानुष्ठेयत्वादित्यर्थः । तपो दमः.

R. No. 881.

Paper. 9¾ × 4¼ inches. Foll. 6. Lines, 11 in a page. Dēvanāgarī. Slightly injured.

Presented in 1913-14 by M.R.Ry. Hariyācār of Paḻḻikoṇḍa.

नवकोटिः.

NAVAKŌṬIḤ.

Same work as that described under No. 5081 of the D.C.S. MSS., Vol. X.

Complete.

R. No. 882.

Paper. 11 × 4¾ inches. Foll. 17. Lines, 13 in a page. Telugu. Good.

Purchased in 1913-14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

Fol. 1*a* gives the title of the work. Foll. 1*b* and 17*b* are left blank.

वृत्तिवार्तिकम्.

VṚTTIVĀRTIKAM.

Foll. 2*a*—17*a*.

A work on poetics treating of the subject of Vṛtti under the three heads Abhidhā, Lakṣaṇā and Vyakti: by Appayadīkṣita.

The MS. contains only the first two of the three Paricchēdas.

Beginning :

विश्वं प्रकाशयन्ती व्यापारैर्लक्षणाभिधाध्वननैः ।
नयनैरिव हरमूर्तिर्विबुधोपास्या सरस्वती जयति ।

वृत्तयः काव्यसरणावलंकारप्रबन्धृभिः ।
अभिधा लक्षणा व्यक्तिरिति तिस्रो निरूपिताः ॥
तत्र क्वचित् क्वचिद्वृद्धैर्विशेषानस्फुटीकृतान् ।
निष्टङ्कयितुमस्माभिः क्रियते वृत्तिवार्तिकम् ॥

तत्र शक्त्या प्रतिपादकत्वमभिधा । सा त्रिधा रूढिर्योगो योगरूढिश्च । अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वं रूढिः । तन्मात्रेण प्रतिपादकत्वं चावयवार्थाप्रतिभासाद्वा, तत्प्रतिभासेऽपि तस्य प्रतिपाद्ये बाधाद्वा ।

End:

नचैवं सर्वत्र विषयविषयिपदसामानाधिकरण्यस्थले समभिव्याहारादभेदप्रतीतेर्वक्तुं शक्यत्वात् क्वचिदपि सारोपलक्षणा न स्यादिति वाच्यम्, इष्टापत्तेः ॥

Colophon:

इति वृत्तिवार्तिके लक्षणावृत्तिनिर्णयो नाम द्वितीयः परिच्छेदः ॥

The scribe adds—

अप्पय्यदीक्षितकृतं वृत्तिवार्तिकनामकम् ।
अलिखद्भार्गवे कृष्णः कृष्णाम्बुजविच(ङ्किमले)क्षणः(?) ॥

R. No. **883.**

Paper. 11 × 4¾ inches. Foll. 17. Lines, 13 in a page. Telugu. Good.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

प्राकृतप्रकाशः—मनोरमावृत्तिसहितः.

PRĀKṚTAPRAKĀŚAḤ WITH THE COMMENTARY MANŌRAMĀVṚTTI.

The text is by Vararuci and the commentary by Bhāmaha. Slightly different from the work described under No. 1551 of the D.C.S. MSS., Vol. III.

Complete in ten Paricchēdas.

The transcription of this manuscript is said to have been completed on Wednesday, the 14th day of the dark fortnight of the Śrāvaṇa month in the year Citrabhānu (Bārhaspatya cycle).

Beginning:

जयति मदमुदितमधुकरमधुररुताकलनकूणितापाङ्गः ।
करविहितगण्डकण्डूविनोदसुखितो गणाधिपतिः ॥
वररुचिराचितप्राकृतलक्षणसूत्राणि लक्ष्यमार्गेण ।
बुद्ध्वा चकार वृत्तिं संक्षिप्तां भामहः स्पष्टाम् ॥

आदेरतः ॥

अधिकारोऽयम् । य(दि)त ऊर्ध्वमनुक्रमिष्यामः आदेरतः स्थाने तद्भवतीत्येवं वेदितव्यम् । आदेरेतदा परिच्छेदसमाप्तेः । अत इति च आ अकारविधानात् । अत इति तकारग्रहणं सवर्णनिवृत्त्यर्थम् ।

End:

आश्चर्यस्याछरिअं । तो दण्डदंशनेषु । शेषं महाराष्ट्रीवत्, 'महाराष्ट्रोद्भवां भाषां विशुद्धं प्राकृतं विदुः' इत्युक्तेः ॥

Colophon:

इति वररुचिविरचितायां प्राकृतमनोरमावृत्तौ भाषाया विभागो नाम दशमः [एव] परिच्छेदः ॥

समाप्तश्चायं ग्रन्थः ॥

R. No. 884.

Paper. $10\frac{5}{8} \times 5\frac{1}{4}$ inches. Foll. 60. Lines, 23 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

प्रौढमनोरमाव्याख्यानम्—लघुशब्दरत्नम्.

PRAUḌHAMANŌRAMĀVYĀKHYĀNAM: LAGHU-ŚABDARATNAM.

By Haridīkṣita. Same work as that described under No. 1403 of the D.C.S. MSS., Vol. III.

Contains up to the end of Kārakaprakaraṇa.

R. No. **885.**

Paper. 11 × 1¾ inches. Foll. 30. Lines, 13 in a page. Telugu. Good.

Purchased in 1913–14 from M.R.Ry. Sītārāma Śāstri of Avanigeḍḍa.

Fol. 1*a* gives the name of the former owner of the MS. as Jōsya Kṛṣṇa Śāstrin.

मुकुन्दानन्दभाणः.

MUKUNDĀNANDABHĀṆAḤ.

A kind of dramatic composition called Bhāṇa treating about the development of the passion of love between Bhujaṅgaśēkhara, also called Mukunda, and his beloved Mañjarī and their subsequent union: by Kāśīpati of Kauṇḍinyagōtra.

Complete.

Beginning:

देवेन्द्रमौलिमन्दारमकरन्दकणारुणाः ।
विघ्नान् हरन्तु हेरम्बचरणाम्बुजरेणवः ॥
वन्दे वन्दारुमन्दारमिन्दुचूडस्य नन्दनम् ।
अमन्दानन्दसंदोहबन्धुरं सिन्धुराननम् ॥
कण्ठालिङ्गनमङ्गलं घनकुचाभोगोपभोगोत्सवं
सौभाग्यं जघनावमर्शमहितं मत्प्रेयसीनां पुनः ।
प्राप्तं कोऽयमितीर्ष्ययेव यमुनाकूले बलाद्यः स्वयं
गोपीनामहरद्दुकूलनिचयं कृष्णः स पुष्णातु नः ॥
चन्द्रे शीतलयत्यलीकनयनं शम्भोः सुधाशीकरै-
र्विष्वग्व्याकुलयत्सु संयमधनान् कान्तादृगन्तेषु च ।
लीलायै परमैक्षवं धनुरिषून् बिभ्रत्प्रसूनात्मनः
स्वच्छन्दं रतिवल्लभो विजयते त्रैलोक्यवीरः स्मरः ॥

(नान्द्यन्ते)

सूत्रधारः—(पुरोऽवलोक्य सप्रमोदम्) अद्य खलु फलितमामूलचूड-मस्मदीय(पु)रातनपुण्यकल्पलताभिः । यत इत एव नूतनपुरपरिसरालं-

कारबधिरागिरिचूडामणेर्भगवतश्चूडेश्वरस्य वसन्तोत्सवदर्शनसमुत्सुकाः सामाजिकाः कल्याणमण्डपमध्यमध्यासते ।

* * * *

साधु भरताचार्यपुत्र साधु, वयमपि चोरात्कस्यापि सरसकवेः सूक्तिमुक्तामणिग्रथितमभिनवं मिश्रभाणमवलोकयितुमुत्कण्ठिताः ।

* * * *

आर्ये,

कौण्डिन्यवंशरत्नस्य कवेः काशीपतेः कृतिः ।
मुकुन्दानन्दनामायं मिश्रभाणः प्रयुज्यते ॥

End:

तथापीदमस्तु भरतवाक्यम्—

वर्षन्तु कामं भुवि वारिवाहा गोब्राह्मणेभ्यः कुशलानि सन्तु ।
हृष्यन्तु सन्तः सुकविप्रबन्धैस्तेषां च शाम्यन्तु खलोपसर्गाः ॥
मुकुन्दानन्दनाम्ना मे भाणेन परितोषितः ।
कमलाकामनः कामं कल्लोलयतु मङ्गलम् ॥
ग्रन्थे श्रीसूर्यसेनस्य निर्णयामृतसंज्ञके ।
आदावस्मिन्नुदाहारः कथितः प्रथितः क्रमः ॥
एकभुक्तादिकानां तु व्रतानां तदनन्तरम् ।

End :

अनारब्धविशुद्ध्यर्थं कूश्माण्डैर्जुहुयाद् घृतम् ।
ग। दद्यात् पञ्चगव्याशी ततः शुध्यति सूतकी ॥

अनारब्धे कर्मणि सूतकविशुद्ध्यर्थं यद्देवा देवहेलनमित्यादिं कूश्माण्ड-संज्ञके घृतं हुत्वा विप्राय गां दत्वा (पञ्च)गव्यं प्राश्य विशुध्यतीति । आ-वश्यके(कं) विवाहादिमङ्गलं कुर्यात् इति मङ्गलम् ॥

बुद्धानामुपकाराय कालव्याकुलचेतसाम् ।
गोपीनारायणेनेदं निर्णीतं निर्णयामृतम् ॥

Colophon :

समाप्तोऽयं निर्णयामृतः ॥

The scribe adds—

दुर्मुखिनामसंवत्सरे दक्षिणायने हेमन्तऋतौ मार्गशीर्षमासे शुक्लपक्षे द्वितीयायां भानुवासरे वेलमूरिवेंकटभट्टस्य पुत्रेण वेंकटेश्वरेण लिखितं निर्णयामृतम् ॥

Fol. 140*b* contains a few lines from Rāmārcanacandrikā. The remaining leaves contain a few lines from विष्णुपञ्चकव्रत, मीनचैत्रमासविवाहविषय, अनावृष्टिपरिहार, समुद्रस्नानविधि and काम्य-वृषोत्सर्जनाविधि.

R. No. **968.**

Palm-leaf. 15 × 1¼ inches. Foll. 31. Lines, 6 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. L. Rāmacandra Śāstri of Marripālem.

श्रौतप्रयोगः.

ŚRAUTAPRAYŌGAḤ.

According to Āpastamba. Similar to the work described under No. 1084 of the D.C.S. MSS., Vol. II.

Contains चातुर्मास्य, साकमेध, वरुणप्रघास, पशुबन्ध and सोत्रामणि.

R. No. **969.**

Paper. 12⅝ × 8½ inches. Foll. 174. Lines, 23 in a page. Telugu. Fair.

Purchased in 1913–14 from M.R.Ry. L. Rāmacandra Śāstri of Marripālem.

(*a*) कालनिर्णयः—सटीकः.

KĀLANIRṆAYAḤ WITH COMMENTARY.

Foll. 1*a*—13*a*.

A treatise on Dharma-Śāstra, similar to the work described under No. 3106 of the D.C.S. MSS., Vol. VI: by Sudarśana, son of Dēvarāya Bhaṭṭōpādhyāya Sōmayājin.

Complete in the following four Prakaraṇas :—

१. संवत्सरादिनिरूपण.
२. षड्विधदैवद्विविधपित्र्यनिर्णय.
३. तिथिव्रतनिर्णय.
४. संक्रान्त्यादिनिर्णय.

Beginning :

श्रीकण्ठो वृषभाचलस्थितिरलं कालस्तमोमज्जग-
त्त्राणानन्तधरावनेष्टविलसन्मूर्तिश्चतुर्वर्गदः ।

कालं कालविभागमागमविधिं सृष्टिं च धत्ते स्म यः
पायात्तस्य सुदर्शनं स्मृतितदा(परा)नानन्दयच्छाश्वतम् ॥

वृषभाचले स्थितिर्यस्य सः वृषभाचलस्थितिः अलमत्यन्तं काळः कृष्णवर्णः तमोस(म)त् अज्ञानशा(ना)शकः

* * * *

तस्य देवस्य सुदर्शनं नः पायात् ।

चान्द्रादिसंवत्सरनिर्णयमाह—

चान्द्रश्चैत्रमुखोऽथ सौर उदितो मेषादिकः सावनो
व्योमाङ्गत्रिदिनः कुषष्टिदिवसः संवत्सरो गौरवः ।
चान्द्राब्दो विगुरुः स्फुटेन मलिनो मध्यात्तु मानादयं
ह्याचार्यो यदि सोऽधिको गुरु स पश्चेष्ठा प्रतिष्ठा हरेत् ॥

चान्द्रमानसंवत्सरः चैत्रमुखः चैत्रमासादिः । अथ अनन्तरम् । सौरः सौरमानसंवत्सरः ।

End :

अमावास्याव्यतीपातपौर्णमा(स्य)ष्टकासु च ।
विद्वान् श्राद्धमकुर्वाणः प्रायश्चित्तीयते द्विजः ॥
देवानुद्दिश्य क्रियते यत् तद्दैविकमुच्यते ।
तन्नित्यश्राद्धवत्कुर्यात् द्वादश्यादिषु यत्नतः ॥ इति ।

Colophon :

इति देवरायभट्टोपाध्यायसोमयाजिपुत्रेण कृते सुदर्शनाख्ये(न) कालनिर्णये तृतीयप्रकरणं समाप्तम् ॥

चतुर्थप्रकरणे पर्वप्रतिपत्सन्धौ यागनिर्णयः—

पादं पार्वणमन्तिमं प्रतिपदं चैवेष्टिकालं विदुः
सन्धिश्चेद्दिनमध्यमे यदि पुरा भूते तदन्वाहितः ।
प्रातः सन्धिदिने मखः प्रतिपदि त्विष्टेः समाप्तिः परे
सन्धौ च प्रति(प)द्धि यागदिवसश्चान्वाहितः पर्वणि ॥

* * * *

अस्य कालस्याष्टधा विभक्तस्याह्नः पञ्चमे भागे । अत एव विष्णुः—

मध्याह्ने त्वथ संप्राप्ते अलंकृत्वात्मनो गृहे ।
पितृदेवमनुष्याणां शिष्टं भूतस्य दाप्यते ॥ इति

Colophon :

सुदर्शनकालनिर्णयः समाप्तः ॥

(*b*) तर्पणदर्पणः.

TARPAṆADARPAṆAḤ.

Foll. 13*b*—16*a*. Fol. 16*b* is left blank.

A treatise dealing with the offering of libations of water to the manes of one's deceased ancestors.

Complete.

Beginning :

नित्यनैमित्तिकप्राप्ते नित्यं न परिलङ्घयेत् ।
पूर्वं नैमित्तिकं चैव पश्चान्नित्यं समाप(च)रेत् ॥
दर्शमासिकयोः प्राप्ते मासिकं पूर्वमाचरेत् ।
दर्शे प्रत्याब्दिके चैव आब्दिकं पूर्वमाचरेत् ॥

* * * *

पितृमातृमातामहानामन्तरे अपुत्रविषये तर्पणविधौ अयं क्रमः—
आदौ पिता (. .) वृद्धिनः ।

असन्तानवते देयमिति सन्तानमिच्छति ।
यदि पुत्रवते देयं तस्य सन्तानहा भवेत् ॥
पुत्रेषु विद्यमानेषु नान्यो वै कारयेत्तथा ।

End :

अपुत्रविषये अयं क्रमः—

आदौ पिता तथा माता सा पत्नी जननी तथा ।
मातामहाः सपत्नीका आत्मपत्नी तदन्तरम् ॥

सुतभ्रातृपितृव्याश्च मातुलाः सहभार्यकाः ।
दुहिता भगिनी चैव दौहित्रो भागिनेयकः ॥
पितृष्वसा मातृष्वसा जामाता भावुकः स्नुषा ।
श्वशुरः स्यालकश्चैव स्वामिनो गुरुवृद्धिनः ॥

सप्त गोत्राणि—

पिता माता च भार्या च भगिनी दुहिता तथा ।
पितृष्वसा मातृष्वसा सप्त गोत्राः प्रकीर्तिताः ॥

(*c*) धर्मप्रवृत्तिः.

DHARMAPRAVṚTTIḤ.

Foll. 17*a*—134*a*. Fol. 134*b* is left blank.

By Nārāyaṇa. Same work as that described under No. 2758 of the D.C.S. MSS., Vol. V.

Breaks off in the Dattaputraprakaraṇa.

This manuscript is said to have been copied by Śrīdhara Vēṅkaṭasubbayya for the use of M.R.Ry. Maṇḍigāla Veṅkaṭarāya Śāstri, who was a District Munsiff in Vayalpad and other places in the Cuddapah district, the copying having been completed on Wednesday, the full-moon day of the month of Māgha in the year Śukla.

(*d*) मासिश्राद्धप्रयोगः.

MĀSIŚRĀDDHAPRAYŌGAḤ.

Foll. 135*a*—141*a*. Fol. 141*b* is left blank.

According to Āpastamba.

Similar to the work described under No. 3756 of the D.C.S. MSS., Vol. VII.

Complete.

(*e*) षष्ट्यब्दपूर्तिशान्तिः.

ṢAṢṬYABDAPŪRTIŚĀNTIḤ.

Foll. 142*a*—143*b*.

Similar to the work described under R. No. 65(*m*) *ante*.

Complete.

(*f*) अश्वत्थोपनयनविवाहविधिः.

AŚVATTHŌPANAYANAVIVĀHAVIDHIḤ.

Foll. 144*a*—146*a*.

Similar to the work described under R. No. 65(*l*) *ante*.

(*g*) चित्रगुप्तव्रतकल्पः.

CITRAGUPTAVRATAKALPAḤ.

Foll. 146*b*—148*a*.

On the observance of a vow on the full-moon day when the moon is in the constellation Citrā, to propitiate Citragupta, who is said to be somewhat like a clerk of Yama, the god of death, for securing the accomplishment of one's desires and for removing one's sins.

Complete; as found in the Skāndapurāṇa.

Beginning:

एवंगुण (. .) तिथौ इह जन्मनि जन्मान्तरेषु मनोवाक्कायकर्मभिः ज्ञानतोऽज्ञानतश्च संभावितानां पापानां समस्तपापक्षयार्थं सर्वाभीष्टसिद्ध्यर्थं चित्रानक्षत्रयुक्तायां पौर्णमास्यां स्कन्दपुराणोक्तप्रकारेण यमधर्मराजचित्रगुप्तव्रतं करिष्ये ।

सिंहासने समायुक्तौ स्वर्णनूपुरधारिणौ ।
चित्रवस्त्रधरौ देवौ ध्यायेदीप्सितसिद्धये ॥

ध्यानम्—

End:

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तास्ते यान्ति परमां गतिम् ॥

Colophon:

इति श्रीस्कान्दपुराणे शिवकुमारसंवादे चित्रगुप्तव्रतकल्पः संपूर्णः ॥

Foll. 148*b*—166*b* and 171*b*—174*b* are left blank. Foll. 167*a*—171*a* give a table of the contents of the MS.

R. No. **970.**

Paper. 9½ × 7⅝ inches. Foll. 190. Lines, 17 in a page. Telugu. Much injured.

Purchased in 1913–14 from M.R.Ry. L. Rāmacandra Śāstri of Marripālem.

बृहज्जातकम्—सटीकम्.

BṚHAJJĀTAKAM WITH COMMENTARY.

A well-known treatise on horoscopy by Varāhamihira. The commentary is called Subōdhārthinī. This work has been printed, but with a different commentary.

Contains Adhyāyas one to six complete and breaks off in the seventh Adhyāya.

Beginning:

आत्मायते वासरपोऽखिलानां मार्गायते जन्मविवर्जितानाम् ।
दीपायते यो जगतामभीष्टं ददातु नः सोऽन्यतरानपेक्षम् ॥
या हो(रा) रचिता वराहमिहिराचार्येण नानार्थिनी
तासां मद्गुरुदेवताननसरोजन्यप्रसादागतम् ।
एकार्थं परिगृह्य तस्य रचये टीकां सुबोधार्थिनीं
माद्दृग्मन्दधियामनुग्रहकृते लोकोपकाराय च ॥

अथाचार्येणास्य शास्त्रस्याविघ्नेन परिसमाप्त्यर्थमादिमेन श्लोकेनेष्टदेवतानमस्कारः क्रियते—

मूर्तित्वे परिकल्पितः शशि(श)भृतो वर्त्मापुनर्जन्मना-
मात्मेत्यात्मविदां क्रतुं च यजतां भक्ता(र्ता)मरज्योतिषाम् ।
लोकानां प्रलयोदयस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः ॥

मूर्तेर्भावो मूर्तित्वं मूर्तिः शरीरं तस्मिन् मूर्तित्वे शरीरत्वे परिकल्पितः पर्यवस्थापितः तस्य शशभृतः शशं बिभर्तीति शशभृत् ।

* * * *

Colophon:

इति बृहज्जातके होराशास्त्रे श(रा)शिप्रभे(दो) नाम प्रथमोऽध्यायः ॥

End:

शेषवर्गजम्—

भादिवर्गसतिपद्यसंगुणं जायते बलमरिष्टकारणः ।
भङ्गकर्तुरपि सप्तवर्गजं तद्धि सर्वबलसंयुतिस्तयोः ॥

इति इत्यवं बलाबलं ज्ञात्वारिष्टं वारिष्टभङ्गं वा वदेत् ॥

Colophon:

इति होराशास्त्रे सद्योमरणाध्यायः षष्ठः ॥

आयुर्दायाध्यायो व्याख्यायते—

अथायुर्दायानां भेदा वा(द्वा)त्रिंशत्सन्ति । तत्र पैण्ड्यायुर्दायानां द्वादश ध्रुवरश्म्यंशकाष्टकवर्गाणां भेदाः प्रत्येकं चत्वारः । विषयायुर्दायस्य भेदौ द्वौ । नक्षत्रांशकदाययोश्च भेदौ द्वौ । एवं द्वात्रिंशद्भेदाः ।

तदाह पाराशर्यः—

पैण्ड्यो द्वादशधा प्रोक्तो ध्रुवरश्मिसमुद्भवौ ।
अंशकाष्टकवर्गौ द्वौ प्रत्येकं तु चतुर्विधौ ॥

* * * *

गोसिंहादिगुणकारं कृत्वा स्थितं यत्तत्सलिलादिकं सलिलं शोधयेत् । अङ्कुशादिकं चेदङ्कुशं विशोधयेत्.

R. No. **971.**

Paper. 13 × 8½ inches. Foll. 344. Lines, 24 in a page. Telugu. Fair.

Purchased in 1913–14 from M.R.Ry. L. Rāmacandra Śāstri of Maṟṟipālem.

Foll. 126 and 127 are left blank.

काशीखण्डव्याख्या—पदयोजना.

KĀŚĪKHAṆḌAVYĀKHYĀ: PADAYŌJANĀ.

By Vēṅkaṭanārāyaṇa of Kōlacalama family.

Same work as that described under No. 2293 of the D.C.S. MSS., Vol. IV, Part I.

Almost complete in 100 Adhyāyas.

R. No. 972.

Palm-leaf. $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 69. Lines, 6 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni of Pedakallepalli.

ऋक्प्रातिशाख्यव्याख्या—पार्षदव्याख्या.
ṚKPRĀTIŚĀKHYAVYĀKHYĀ: PĀRṢADAVYĀKHYĀ.

Contains Paṭalas one to six complete and the seventh incomplete.

Same work as that described under No. 883 of the D.C.S. MSS., Vol. II. This does not seem to be a gloss on Uvaṭa's commentary as stated therein, but appears to be a commentary on the Ṛkprātiśākhya, different from Uvaṭa's, except in the first two Vargas which are apparently attributed to Viṣṇumitra-Kumāra, son of Vēdamitra of Campā.

Foll. *8b* and *24b* are left blank.

It is stated that the manuscript belonged to one Bhūsarla Gaṅgādhara Śāstrin. The following additional stanza is found in the beginning :—

विघ्नेश विधिमार्ताण्डचन्द्रेन्द्रोपेन्द्रवन्दित ।
नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते ॥

R. No. 973.

Palm-leaf. $17\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 114. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni of Pedakallepalli.

आपस्तम्बश्रौतसूत्रभाष्यवृत्तिः.
ĀPASTAMBAŚRAUTASŪTRABHĀṢYAVṚTTIḤ.

Same work as that described under No. 1061 of the D.C.S. MSS., Vol. II.

Contains Praśnas ten to fourteen.

कौशिकरामेण कृतायां धूर्तस्वामिभाष्यदीपिकायां सोमोपोद्घातो नाम दशमः प्रश्नः समाप्तः ॥

R. No. **974.**

Palm-leaf. 17⅜ × 1⅜ inches. Foll. 76. Lines, 8 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni.

(*a*) आह्निकविधिः.

ĀHNIKAVIDHIḤ.

Foll. 1*a*—36*b*.

On the daily duties to be performed by a twice-born: by Tryambakasūri, son of Jagannātha and a disciple of Rāmacandra The concluding stanza of the work gives the date of composition.

Wants beginning; otherwise complete.

This manuscript work is said to have been copied by Subbarāyan, the fourth son of Raṅgayya, the copying having been completed on Thursday, the 10th day of the bright fortnight in the year Āṅgirasa.

Beginning:

अथ स्मृत्याचमनप्रकारः—आसीन आसने भूमौ पादौ निक्षिप्य अन्तर्जानुः प्राङ्मुख उदङ्मुखो वा हृदयंगमाः आपः फेनबुद्बुदादिरहिताः गोकर्णाकृतिहस्तेन(त्रि)वारं पिबेत् । अङ्गुष्ठमूलेन त्रिवारमोष्ठौ परिमृजेत् । द्विरित्येके । मध्यमाङ्गुलीभिस्तिसृभिरोष्ठावेकवारं परिमृजेत् । द्विरित्येके ।

End:

शयानस्य निद्राकालमाह—

प्रदोषपश्चिमौ यामौ वेदाभ्यासरतो नयेत् ।
यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते ॥

शयननिषेधश्चोक्तो मार्कण्डेयेन—

शून्यालये श्मशाने च एकवृक्षे चतुष्पथे ।
महादेवगृहे चापि मातृसद्मनि न स्वपेत् ॥

* * * *

नान्यो विमुक्तये पन्था मुक्त्वाश्रमविधिं स्वकम् ।
तस्मात् कर्माणि कुर्वीत तुष्टये परमात्मनः ॥ इति ।

Colophon:

इत्याह्निकविधिः समाप्तः ॥

आह्निकस्य विधिं सम्यगकरोत् त्र्यम्बकः सुधीः ।
जगन्नाथस्य तनुजो जगदीशस्य तुष्टये ॥
विभवे वत्सरे मासि आश्विने शुक्लपक्षके ।
तृतीयायां गुरोर्वारे समाप्तस्त्वाह्निको विधिः ॥

इति श्रीरामचन्द्रकरुणाकटाक्षवीक्षणाधिष्ठानत्र्यम्बकसूरिणा विरचितोऽयमाह्निकविधिः समाप्तः ॥

(*b*) सन्ध्यावन्दनमन्त्रभाष्यम्.

SANDHYĀVANDANAMANTRABHĀṢYAM.

Foll. 37*a*—70*b*. The remaining foll. are left blank.

By Kṛṣṇapaṇḍita. Same work as that described under No. 2885 of the D.C.S. MSS., Vol. V.

Incomplete.

R. No. **975.**

Palm-leaf. 18 × 1⅝ inches. Foll. 41. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni of Pedakallepalli.

Foll. 7*b*, 34*b* and 41*b* are left blank.

(*a*) आपस्तम्बश्रौतसूत्रप्रयोगप्रदीपिका.

ĀPASTAMBAŚRAUTASŪTRAPRAYŌGAPRADĪPIKĀ.

Foll. 1*a*—21*a*.

By Tālavṛntanivāsin. Same work as that described under No. 1071 of the D.C.S. MSS., Vol. II.

Contains the sixteenth Praśna complete.

(*b*) आपस्तम्बश्रौतसूत्रव्याख्या.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Foll. 21*a*—41*a*. Fol. 41*b* is left blank.

By Kapardisvāmin. Same work as that described under No. 1067 of the D.C.S. MSS., Vol. II, but with colophon.

Contains the seventeenth Praśna complete.

इत्यापस्तम्बविवरणे कपर्द्याचार्यकृते सूत्रभाष्ये द्वितीयोऽग्निः समाप्तः ॥

R. No. 976.

Palm-leaf. 16¾ × 1¼ inches. Foll. 39. Lines, 6 in a page. Telugu. Much injured.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni of Pedakallepalli.

प्रातिशाख्यव्याख्यानम्—त्रिभाष्यरत्नम्.

PRĀTIŚĀKHYAVYĀKHYĀNAM: TRIBHĀṢYARATNAM.

Same work as that described under No. 932 of the D.C.S. MSS., Vol. II.

Breaks off in the seventh Adhyāya.

R. No. 977.

Palm-leaf. 16 × 1⅛ inches. Foll. 58. Lines, 7 in a page. Telugu. Good.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni of Pedakallepalli.

Fol. 1 contains a few lines from वरुणप्रघासकारिका.

(*a*) सौत्रामणिप्रयोगः.

SAUTRĀMAṆIPRAYŌGAḤ.

Foll. 2*a*—7*b*.

Same work as that described under No. 1114 of the D.C.S. MSS., Vol. II.

Complete.

Fol. 8 contains a few lines from मैत्रावरुणप्रयोग.

(b) आपस्तम्बश्रौतप्रयोगप्रदीपिका.

ĀPASTAMBAŚRAUTAPRAYŌGAPRADĪPIKĀ.

Foll. 9a—44b.

By Tālavṛntanivāsin. Same work as that described under No. 1071 of the D.C.S. MSS., Vol. II.

Contains the fifteenth Praśna complete.

(c) आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Foll. 45a—56b.

Similar to the work described under No. 1093 of the D.C.S. MSS., Vol. II.

Contains Atyagniṣṭōma, Jyōtiṣṭōma, Atirātra, Aptōryāma, Sarvapṛṣṭhāptōryāma and Ēkādaśinī.

Foll. 57 and 58 contain a portion treating of Praṇavasvara.

R. No. 978.

Palm-leaf. 18 × 1½ inches. Foll. 44. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni of Pedakallepalli.

(a) पूर्वप्रायश्चित्तम्—वाहिनीपतीयम्.

PŪRVAPRĀYAŚCITTAM: VĀHINĪPATĪYAM.

Foll. 1a—36a. Fol. 36b is left blank.

Similar to the work described under No. 1082 of the D.C.S. MSS., Vol. II. The author calls himself a servant of Śaṅkara.

Incomplete.

The copying of this manuscript work is said to have beeu completed on Thursday, the 5th day of the bright fortnight of the month of Kārttika in the year Plava.

Beginning:

शुक्तौ रजतवद्यत्र मायया दृश्यते जगत् ।
तद्ब्रह्माहमिति ज्ञेयं सच्चिदानन्दविग्रहम् ॥
देशकालवयोऽवस्था विद्या सामर्थ्यमेव च ।
ब्राह्मणानां समालोच्य ग्रन्थान् सर्वान् (वि)निर्मितान् ॥
आलोच्य सुलभान् पक्षांस्तत्र (तत्र) विकल्पितान् ।
संगृह्य सुखबोधाय कुर्वे शङ्करकिंकरः ॥

सर्वपापक्षयहेतुत्वात् प्रथमं ब्रह्मानुसन्धानमाह—शुक्तौ रजतवदिति । अयमाशयः—श्रौतानां कर्मणामपचारादिषु शृङ्गग्राहिकया प्रायश्चित्तानि वक्ष्यन्ते । तानि तथैव चरितव्यानि । यत्र तु प्रायश्चित्तं नोक्तम्, उक्तमपि न प्रतीयते वा तत्र तत्र सर्वत्र ब्रह्माहमिति भावयेत् । तदेव च सर्वप्रायश्चित्तम् ।

End:

अथो अन्नस्य कीलाल उपहूता गृहेषु नः । क्षेमाय वः शान्त्यै प्रपद्ये शिवं शग्मं शंयोः शंयोः । बिभ्रद्वसुवनाः सुवौ(मे)धा गृहानागां मनसा मोदमानः । इरां वहतो घृतमुक्षमाणास्तेष्वहं सुमनाः संविशामि ॥

(*b*) आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Foll. 37*a*—44*b*.

Same work as that described under No. 1042 of the D.C.S. MSS., Vol. II.

Contains the ninth Praśna incomplete

R. No. **979.**

Palm-leaf. 17¼ × 1½ inches. Foll. 75. Lines, 8 in a page. Telugu. Good.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni. of Pedakallepalli.

Foll. 8*b* and 9*a* are left blank.

आश्वलायनश्रौतप्रयोगप्रदीपिका.

ĀŚVALĀYANAŚRAUTAPRAYŌGAPRADĪPIKĀ.

By Mañcanabhaṭṭa. Same work as that described under No. 1034 of the D.C.S. MSS., Vol. II

Contains the first six Adhyāyas.

This MS. is said to have belonged to Vēṅkaṭēśan, son of Maddūri Candraśēkhara, and its copying completed on Saturday, the 10th day of the dark fortnight of the month of Āṣāḍha in the year Pramōda.

R. No. **980.**

Palm-leaf. 16⅝ × 1⅜ inches. Foll. 49. Lines, 8 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni of Pedakallepalli.

(*a*) आपस्तम्बश्रौतसूत्रव्याख्या.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Foll. 1*a*—40*a*. Fol. 40*b* is left blank.

By Dhūrtasvāmin Same work as that described under No. 1060 of the D.C.S. MSS., Vol. II.

Contains Praśnas ten to twelve complete and breaks off in the first Paṭala of the thirteenth Praśna.

(*b*) आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Foll. 41*a*—49*b*.

Similar to the work described under No. 1084 of the D.C.S. MSS., Vol. II.

Contains उेंत्सगष्टि, सर्वतामुखे, अग्निष्टोम, उक्थ्य and अतिरात्र.

R. No. 981.

Palm-leaf. $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 35. Lines, 8 in a page. Telugu. Good.

Purchased in 1913–14 from M.R.Ry. P. Ādinārāyaṇāvadhāni of Pedakallepalli.

(*a*) ग्रहलाघवम्.

GRAHALĀGHAVAM.

Foll. 1*a*—4*a*. Fol. 4*b* is left blank.

By Viśvanātha. Same work as that described under R. No. 199 *ante*.

Contains the first three Adhyāyas.

Colophon:

इति श्रीसकलागमाचार्यवर्यकेशवसांवत्सरात्मजगणेशदैवज्ञविरचिते ग्रहलाघवे सिद्धान्तरहस्ये मध्याध्यायः प्रथमः ॥

* * * *

इति श्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविराचिते ग्रहलाघवे पञ्च-होरास्पष्टोदाहृतिस्तृतीयोऽध्यायः ॥

(*b*) जातकपद्धतिः.

JĀTAKAPADDHATIḤ.

Foll. 5*a*—8*a*.

A work similar to the one described under R.No. 374(*a*) *ante* and consisting of forty stanzas: by Kēśava, a Brahmin of Nandigrāma.

Complete.

Beginning:

नत्वा विघ्नपशारदाच्युतशिवब्रह्मार्कमुख्यग्रहान्
कुर्वे जातकपद्धतिं स्फुटतरां ज्योतिर्विदां प्रीतये ।
यन्त्रैः स्पष्टतरोऽत्र जन्मसमयो वेद्योऽत्र खेटाः स्फुटा
यत्पक्षे हि घटन्त उद्यम इदंस्तर्क्षे न षड्भिः स च ॥

करशरयुगसप्ताभ्रेभ्रषड्वह्निषट्क-
द्वितुरगसहितश्चेद्ब्रह्मतुल्यद्विकुण्डः ।
इह स भवति कल्पात्तद्वदङ्काद्रिभूमि-
नगयुगखगपद्माङ्कभूयः कृतोऽब्धिः ॥

* * * *

तत्कालिकोऽर्कोऽयनभागयुक्तस्तद्भोग्यभागैरुदयो हतः स्वः ।
भाग्न्युद्धृतस्तं रविभोग्यकालं विशोधयेदिष्टघटोपलेभ्यः ॥

End:

नन्दिग्रामे केशवो विप्रवर्यो योऽभूद्धोराशास्त्रसंघं विलोड्य ।
तेनोक्तेयं पद्धती जातकीया चत्वारिंशद्वृत्तबद्धा सुबोधा ॥
ग्रहभागा मुनिगुणितास्त्रिशद्भक्ता भवेत्सप्तांशाः ।
ओजे स्वराशिपूर्वं युग्मे विन्द्यात्सप्तमभागात् ॥

Colophon:

इति श्रीकेशवदैवज्ञकृतायां जातकपद्धतौ दशान्तर्दशाध्यायः स-
माप्तः ॥

(*c*) जातकसारः.

JĀTAKASĀRAḤ.

Foll. 8*b*—10*a*.

Similar to the above. The subject is introduced as having been taught by Īśvara to Dēvī.

Complete.

Beginning:

श्रीदेव्युवाच—

देवदेव महादेव सर्वज्ञ शशिभूषण ।
ज्यौतिषार्णवपीयूषं संक्षेपेण वदस्व मे ।
अनुग्रहार्थं लोकस्य मयि कारुण्यवत्सल ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि सावधानेन चेतसा ।
सप्तविंशतिऋक्षाणां राशयो द्वादश स्मृताः ।
राहुकेत्वोश्च सर्वेऽपि राशयः स्वगृहाः स्मृताः ॥
जन्मकाले तु संप्राप्ते लग्नं निश्चित्य पण्डितः ।
तस्मिन् काले खेचराणां चारं निश्चित्य योजयेत् ॥

End:

शैशवावस्थकाले तु स्वल्पदोषश्च हानिकृत् ।
इतरावस्थकाले तु रोगरूपेण बाध्यते ॥

Colophon:

इति श्रीउमामहेश्वरसंवादे जातकसारः संपूर्णः ॥

Foll. 10*a* and 10*b* contains a few lines on the same subject.

(*d*) सुभाषितानि.

SUBHĀṢITĀNI.

Foll. 11*a*—14*b*.

Similar to the work described under R. No. 441 *ante.*

Beginning:

समस्तदेवमस्तकप्रशस्तमौलिगारुड-
प्रभाविभासिताङ्घ्रिकाम्बुजद्वयो रमाधिपः ।
उषःप्रभाकरांशुकस्फुटीकृताब्जलोचनः
फणीन्द्रशैलनायकः शुभानि नः करोतु सः ॥

* * * *

कुसुमानि लिखन्तु नाम चित्रे कतिचित्कालविशेषरूढशिक्षाः ।
सुरभित्वममूनि किं लभन्ते कथमेतेषु रसं पिबन्ति भृङ्गाः ॥

End:

आरामाधिपतिर्विवेकविकलो नूनं सा नीरसा
वात्याभिः परुषीकृता दश दिशश्चण्डातपो दुःसहः ।
एवं धन्वनि चम्पकस्य सकले संहारहेतावपि
त्वं सिञ्चन्नमृतेन तोयद कुतोऽप्याविष्कृतो वेधसा ॥

(*e*) सर्वार्थचिन्तामणिः.

SARVĀRTHACINTĀMAṆIḤ.

Foll. 15*a*—18*b*.

By Vēṅkaṭēśa. Same work as that described under R. No. 912(*c*) *ante*.

Contains the first Adhyāya complete.

(*f*) लम्पाकम्.

LAMPĀKAM.

Foll. 19*a*—20*b*.

A treatise on astrology and divination laying down certain rules for inferring the replies to be given from the peculiar posture assumed by the person who puts the question, etc.

Incomplete.

Beginning:

नमस्ते शूलहस्ताय चन्द्रार्धधृतमौलये ।
त्वत्प्रसादात्प्रवक्ष्यामि लम्पाकं लोकभूषणम् ॥

आदावेतच्छास्त्रस्य प्रष्टुरङ्गस्पर्शनवशाद्राशिज्ञानमाह—

अण्डाङ्घ्रिकुक्षिवक्षोदोःशिरोर्वङ्गानि दक्षिणे ।
क्रमाद्वामे च कौर्प्यादि व्युत्क्रमां तां विनिर्दिशेत् ॥

End:

लग्नेशनो राहुयुतोऽथवा स्यात्पिशाचबाधां प्रवदन्ति सन्तः ।
बलेन निश्चित्य वेदेद्ग्रहाणां तत्प्राश्निके जन्मनि तद्गुणांस्तु ॥

(*g*) ज्ञानप्रदीपकम्.

JÑĀNAPRADĪPAKAM.

Foll. 21*a*—22*b*.
Similar to the above.
Complete.

Beginning:

वन्दे गङ्गाधरसुतं चन्द्रलेखावतंसिनम् ।
विधिदं सर्वविद्यानां वन्दे दन्तावलम्ब(लान)नम् ॥
ज्ञानप्रदीपकं नाम शास्त्रं लोकोपकारकम् ।
प्रश्नादर्शं प्रवक्ष्यामि सर्वशास्त्रानुसारतः ॥
भूतं भव्यं वर्तमानं शुभाशुभनिरीक्षणम् ।
पञ्चप्रकारमार्गं च चतुष्केन्द्रं बलाबलम् ॥
आरूढच्छत्रवर्गं च उदयादिबलाबलम् ।
क्षेत्रं दृष्टिं नरं नारीं युग्मं वंशं च वर्णकम् ॥
मृगादिपररूपाणि किरणान्योजनानि च ।
अयो रसं तथा धान्यं परीक्ष्य कथयेद्बुधः ॥
चरस्थिरोभयान् राशींस्तत्प्रदेशस्थलानि च ।
निशादिवससन्ध्याश्च कालदेशस्वभावकान् ॥

End:

नष्टद्रव्यप्रश्ने—

सूर्यभं चन्द्रनक्षत्रं प्रहरेण समन्वितम् ।
दिक्संख्याप्रयुते चैव अर्कैः स विभजेत्पुनः ॥
एकेन भूतले द्रव्यं द्वितीये भाण्डभाजने ।
तृतीये जलमध्यस्थं चतुर्थे धान्यराशये ॥

पञ्चशेषं तु यो जाते तूलस्थं निश्चितं भवेत् ।
षष्ठे गोमयमध्यस्थं नभःस्थं सप्तमं भवेत् ॥
अष्टमं वस्त्रबन्धं च . . . . ।
स्वग्रामस्थं तु नवमे ग्रामाद्बाह्यं तथा दशे ।
एकादशे परैर्हृतं द्वादशेऽन्यगृहे भवेत् ॥

(*h*) विजयभैरवी.

VIJAYABHAIRAVĪ.

Foll. 23*a*—29*a*.

Similar to the above.

Complete.

Beginning:

ज्ञानानन्दमयं देवं (. . . .) हयग्रीवमुपास्महे ॥
अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम् ।
सफलं ज्यौतिषं शास्त्रं चन्द्रार्कौ तत्र साक्षिणौ ॥
स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तकं स्मृतम् ।
द्वितीयं जातकं स्कन्धं तृतीयं संहिताभिधम् ॥
स्कन्धत्रयात्मके शास्त्रे प्रश्नशास्त्रं शिखा तथा ।
तदज्ञो वा सभामध्ये हंसमध्ये बको यथा ॥
नाडी तु वामा हिमदीधितेः सा स्याद्भास्करी दक्षिणनाडिका च।
चन्द्रस्य नाड्यामथवार्कनाड्यामदः समीरः प्रदिशत्यवश्यम्॥
चन्द्रस्य नाडी वहति यदा च तदा रवेः स्यात्प्रविशत्यवश्यम् ।
यशःसमृद्धि कुशलं जयश्च निर्गच्छतः स्यात्फलवैपरीत्यम् ॥

End:

अथ धान्यादिव्रीहिप्रश्नः—

व्रीहीकाजयशर्मलाभकुगिरौ मित्राणि सर्वं शुभं
गोराये प्रियबुद्धनानिलपरे लाभादिनाशादिकम् ।
रय्यागे कलहः श्रियश्च बलगे साङ्गानि सर्वागमौ
राराराविपदः परागकलहौ लेखाय शोकापहा ॥

Colophon:

इति विजयभैरवी समाप्ता ॥

(*i*) प्रश्नार्या.

PRAŚNĀRYĀ.

Foll. 29*b*—31*b*.

A work on astrology and divination in seventy stanzas in the Āryā metre: by Bhaṭṭōtpala.

Complete.

Beginning:

रविशशिकुजबुधगुरुसितरविजगणेशौ प्रणम्य भक्त्याऽऽौ ।
वक्ष्येऽहं(च)स्फुटतरप्रश्नज्ञानं हिताय दैवविदाम् ॥
दशभेदं ग्रहगणितं जातकमवलोक्य निरवशेषमपि ।
यः कलयति शुभमशुभं तस्य न मिथ्या भवेद्वाणी ॥
रम्यतरे भूभागे संपूज्य ग्रहगणं सनक्षत्रम् ।
पश्चात्प्रश्नविधानं कुर्यादेवं समाप्नुयात्सिद्धिम ॥

* * * *

उदयनिमित्तैर्वर्णैः प्रश्नाद्भूतैर्बहिःस्थितैः शकुनैः ।
वक्तव्यं शुभमशुभं प्रष्टुस्तात्कालिकं जातम् ॥

End:

भट्टोत्पलेन शिष्यानुकम्पया सर्वशास्त्राणि ।
आर्यासप्तत्यैवं प्रश्नज्ञानं समासतो रचितम् ॥

Colophon:

इति भट्टोत्पलविरचिता प्रश्नार्या समाप्ता ॥ प्रश्नार्यासप्ततिः समाप्ता ॥

Fol. 32 contains a few lines regarding **ग्रहयज्ञ.** Foll. 33*a*—35*a* give some passages regarding **मुहूर्तनिर्णय.** Fol. 35*b* is left blank.

R. No. 982.

Palm-leaf. 16 × 1½ inches. Foll. 68. Lines, 7 in a page. Telugu. Much injured.

Presented in 1913-14 by M.R.Ry. P. Adinārāyaṇāvadhāni of Pedakallepalli.

On fol. 1*a* the former owner of the manuscript is stated to be Veṅgala Sītārāma Śāstri.

सोमपञ्चकम्.

SŌMAPAÑCAKAM.

Similar to the work described under No. 1116 of the D.C.S. MSS., Vol. II. This manuscript is said to have been copied by Vempaṭi Vēṅkaṭanārāyaṇa, the copying having been completed on Tuesday, the 7th day of the dark fortnight of the Śrāvaṇa month in the year Prabhava.

Wants the beginning.

Beginning:

. . . समिधो यज्ञायुरनुसंचरन्। उपवेषं मेक्षणं धृष्टिस्संभरामि सुसम्भृता शुल्ब इध्मं संभरति ।

* * * *

आग्नीध्रे हविर्धाने वा यजमानं जागरयन्ति । प्राग्वंशे पत्नी आग्नीध्रे एतां रात्रिमृत्विजो वसन्ति यजमानो राजानं गोपायति ॥

महारात्रे ब्रह्मणा सह बुद्ध्वाचान्तोऽध्वर्युः अग्ने नय (. . .) विधेम । अग्नीध्रमण्टपमभिमृशति ।

End:

विष्णव इदम् । सा यावद्रात्रीष्टिः संतिष्ठते । अथ सायमग्निहोत्रं जुहोति काले प्रातर्होमं संतिष्ठते अग्निष्टोमोऽग्निष्टोमः ॥ उक्थ्यः षोडश्यतिरात्रः ॥

R. No. 983.

Palm-leaf. 16⅝ × 1¼ inches. Foll. 255. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

रामायणदीपिका.

RĀMĀYAṆADĪPIKĀ.

By Vaidyanāthadikṣita. Same work as that described under No. 1900 of the D.C.S. MSS., Vol. IV, Part I.

The Ayōdhyākāṇḍa complete.

End:

उच्छिष्टमशुचि प्रमत्तमसावधानयुक्तमितीव एवमेव मार्गोपदेशपूर्वकमिति यावत् । कृतस्वस्त्ययनः कृतमङ्गलाशीर्वादः ॥

Colophon:

इति श्रीवैद्यनाथदीक्षितविरचितायां श्रीरामायणदीपिकायामयोध्या-काण्डे एकोनविंशतिशततमः सर्गः ॥

R. No. **984**.

Palm-leaf. $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 105. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1913–14 by M.R.Ry. Śrīnīvāsa Pāṭrācāriyar of Kumbakonam.

स्मृतिकौमुदी.

SMṚTIKAUMUDĪ.

By Rāya-Madanapāla. Same work as that described under No. 2771 of the D.C.S. MSS., Vol. V.

Wants the beginning; otherwise complete.

R. No. **985**.

Palm-leaf. $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 222. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

अघनिर्णयसारः.

AGHANIRṆAYASĀRAḤ.

By Dharmarāja. Same work as that described uuder R No. 344 *ante*.

Incomplete.

R. No. **986.**

Palm-leaf. $15\frac{1}{4} \times 1\frac{3}{4}$ inches. Foll. 88. Lines, 8 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakōṇam.

(*a*) पुरुषसूक्तभाष्यम्.
PURUṢASŪKTABHĀṢYAM.

Foll. 1*a*—6*b*.

By Sāyaṇācārya. Same work as that described under No. 209 of the D.C.S. MSS., Vol. I, Part II.

Complete.

(*b*) रुद्रप्रश्नभाष्यम्.
RUDRAPRAŚNABHĀṢYAM.

Foll. 6*b*—21*b*.

By Sāyaṇācārya. Same work as that described under No. 129 of the D.C.S. MSS., Vol. I, Part II.

Almost complete.

(*c*) बृहदारण्योपनिषद्दीपिका.
BṚHADĀRAṆYŌPANIṢADDĪPIKĀ.

Foll. 22*a*—66*b*.

A commentary on the Bṛhadāraṇyōpaniṣad, for a description of which work see under No. 633 of the D.C.S. MSS., Vol. I, Part III: by Śaṅkarānanda.

Contains the sixth Adhyāya complete.

Beginning:

पञ्चमाध्याये मधुकाण्डार्थो जल्पकथयोक्तः । तस्यैवेदानीं महता व(त)कर्णे निर्णयार्थं वादकथारूपः षष्ठोऽध्याय आरभ्यते । आख्यायिका तु आचार्यविध्यर्था । जनको नामतः । ह किल । वैदेहः विदेहानामधि-

पतिः। कदाचित् सर्वजनावसरार्थं राजा आसने आसांचक्रे उपविष्टवान्। अथ तदवसरानन्तरम्। ह किल।

* * * *

Colophon:

इति षष्ठस्याध्यायस्य प्रथमं ब्राह्मणम्॥

End:

पूर्वोत्तरपक्षाभ्यां निर्णीतस्यापि कथामन्तरेण निर्णय इति प(क्ष)मवलम्ब्य मधुकाण्डार्थः

* * * *

यद्यपि ब्रह्मविद्यायां न किमपि परिशिष्टमस्ति, तथापि क्रममुक्तार्थान्युपरि सर्वशेषाश्चोङ्कारदमादयः प्राणादीनां गुरूणा(मा)श्रमध(र्मफ)लारम्भो विरुद्धः॥

Colophon:

इति षष्ठाध्यायस्य षष्ठं ब्राह्मणम्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यश्रीशङ्करानन्दभगवतः कृतौ बृहदारण्योपनिषद्दीपिकायां षष्ठाध्यायः समाप्तः॥

समाप्तं पञ्चमयाज्ञवल्कीयकाण्डम्॥

(*d*) छान्दोग्योपनिषद्भाष्यम्.

CHĀNDŌGYŌPANIṢADBHĀṢYAM.

Foll. 67*a*—88*b*.

By Śaṅkarācārya. Same work as that described under No. 464 of the D.C.S. MSS., Vol. I, Part III.

Contains the sixth Adhyāya complete.

R. No. **987.**

Palm-leaf. 14 × 1⅜ inches. Foll. 50. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

तत्त्वचिन्तामणिदीधितिव्याख्या—मनोहरा.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ : MANŌHARĀ.

A commentary on the Tattvacintāmaṇidīdhiti of Raghunātha Śirōmaṇi-Bhaṭṭācārya, for a description of which work see under No. 4002 of the D.C.S. MSS., Vol. VIII.

Wants the beginning in the Kēvalānvayī and breaks off in the Avayava.

Beginning:

विशेषणम्। अतो नञर्थे न दोषः। क्रियाप्रातिपदिकार्थयोरिति दृष्टान्ततयोक्तम्; यथा तण्डुलान् पचति इत्यत्र द्वितीयार्थकर्मत्वद्वारा-तण्डु . . . . पाकान्वयः

* * * *

अत्र प्रतियोगीत्याद्यप्रवेशेन लाघवात्साध्यवदन्यावृत्तित्वमेव व्याप्तिः; ननु साध्याभाववदवृत्तित्वं स्वाधिकरणावृत्तिसाध्याभाववत्त्वं वा; प्रतियोगीत्यादि-प्रवेशेन गौरवात्। तत्राप्यवृत्तित्वस्य संबन्धविशेषेण वाच्यतया जलं जाति-मदित्याद्यसंग्राह्यमेव नीलेतररूपवानित्यादौ च विशेष(ण)विशेष्यसंबन्ध एव हेतुरिति दिक्॥

Colophon:

इति केवलान्वयिमनोहरम्॥

End:

अत्र व्यतिरेकिणोऽर्थापत्तित्वेनानुमानत्वानङ्गीकारात् दीधितिकृता व्यतिरेकिपरामर्शस्यानुमितिहेतुत्वोपपादने यत्नो न कृत इति ज्ञेयम्। केवलान्वयिकेवलव्यतिरेकिखण्डनोद्धारसिद्धाञ्जने प्रपञ्चित इतीहोपरम्यते॥

Colophon:

इति शिरोमणिमनोहरे व्यतिरेकिनिरूपणं संपूर्णम्॥

मूलोक्तन्यायलक्षणे वक्ष्यमाणदूषणगणग्रासात् स्वयं निर्दुष्टं तल्लक्ष-(णमाह)—उचितेति । आनुपूर्व्या औचित्यं कथकसंप्रदायासिद्धम् ।

* * * *

भिन्नत्वस्यैव सम्यक्त्वात्, अखण्डाभावपरतया वैयर्थ्यपरिहारेऽपि अनति-प्रयोजनत्वात् । अत आह—वस्तु.

R. No. **988.**

Palm-leaf. 6⅓ × 1½ inches. Foll. 76. Lines, 8 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

स्मृतिसङ्ग्रहः.

SMṚTISAṄGRAHAḤ.

This work purports to be a summary of the various Smṛtis. Incomplete.

Beginning:

. . . . अशक्तौ मुमूर्षुर्मन्त्रस्नानमाचरेत् । तत ऊर्ध्वपुण्ड्रंत्रि-पुण्ड्रं वा यथाचारं बिभृयात् । तुलसीदलं रुद्राक्षं च बिभृयात् । तुल-सीदलयुक्तं सालग्रामजलं गङ्गाजलं वा पिबेत् । ततः स्वपापानुसारेण परिषदनुज्ञापूर्वकं द्वादशाब्दकृच्छ्रं षडब्दकृच्छ्रमब्दकृच्छ्रं वा प्रति(निधि)-ना कुर्यात् ।

* * * *

सर्वज्येष्ठस्य रोगादिना अशक्तौ अग्निदानमात्रं कुर्यात् । इतरत्सर्वं विद्य-मानेषु ज्येष्ठः कुर्यात् ।

End:

कनीयसः कर्म समाप्तं चेत् पुरो ज्येष्ठः समागतश्चेत् तस्मिन् दिने श्राद्धमेकं परिसमाप्य पश्चात् दशाहान्त.

R. No. 989.

Palm-leaf. 16 × 1⅛ inches. Foll. 14. Lines, 6 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

नारदस्मृतिः.

NĀRADASMṚTIḤ.

Same work as that described under R. No. 785(*b*, *ante*.

Breaks off in the second Adhyāya.

R. No. 990.

Palm-leaf. 14 × 1 inches. Foll. 21. Lines, 4 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

दत्तसंग्रहः.

DATTASAṄGRAHAḤ.

By Bhīmasēna. This appears to be the original from which the work described under R.No. 761 *ante* is a copy made for the library.

Incomplete.

R. No. 991.

Palm-leaf. 16 × 1¼ inches. Foll. 50. Lines, 7 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

स्मृतिमुक्ताफलम्.

SMṚTIMUKTĀPHALAM.

By Vaidyanāthadīkṣita. Same work as that described under No. 2788 of the D.C.S. MSS., Vol. V.

Contains the Kālanirṇaya complete.

R. No. 992.

Palm-leaf. 15⅝ × 1⅜ inches. Foll. 99. Lines, 7 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

न्यायसिद्धान्तमञ्जरीटीका—आमोदः.

NYĀYASIDDHĀNTAMAÑJARĪṬĪKĀ : ĀMŌDAḤ.

By Subrahmaṇya. Same work as that described under R. No. 574 *ante*, but with the beginning and the colophon given below.

Contains the Pratyakṣa Paricchēda.

Beginning :

यत्पादपङ्कजरजांसि नतालिकेषु
विद्याविरोधिलिपिदुष्टपिशाचिकायाः ।
उच्चाटनाचरितचूर्णमयानि भान्ति
तं छन्नकृष्णगुरुमभ्रजमानतोऽस्मि ॥

* * * *

निर्विघ्नपरिसमाप्तिकामनया कृतं मङ्गलं शिष्यशिक्षायै प्रतिपादयन् शिष्यावधानार्थं चिकीर्षितं प्रतिजानीते—प्रणम्येति । ननु मङ्गलस्य कथं निर्विघ्नपरिसमाप्तिफलकत्वमिति चेदत्र प्राञ्चः—मङ्गलस्य शिष्टाचारत्वेन फलसाधनत्वं तावत्सिद्धम् । फलं च दृष्टे संभवत्यदृष्टकल्पनायोगात् उपस्थितत्वाच्च समाप्तिरेव फलं कल्प्यते ।

Colophon :

आमोदाख्यां व्याख्यां मञ्जर्या युक्तिपुञ्जसुन्दर्याः ।
सुब्रह्मण्योऽकार्षीत् तत्र प्रत्यक्षरूपणं जातम् ॥

R. No. 993.

Palm-leaf. 14⅝ × 1¼ inches. Foll. 68. Lines, 5 in a page. Grantha. Good.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

The first two foll. are left blank.

आपस्तम्बगृह्यप्रयोगप्रदीपिका.

ĀPASTAMBAGṚHYAPRAYŌGAPRADĪPIKĀ.

Foll. 3*a*—67*b*. Fol. 68 is left blank.

Similar to the work described under R. No. 502 *ante*. By Tālavṛntanivāsin, also known as Āṇḍapiḷḷai.

Complete.

Beginning:

गृह्यस्य प्रयोगो वक्ष्यते—अथ कर्माण्याचाराद्यानि गृह्यन्ते । अथात्रानन्तरम् आचारात् यानि गृह्यन्ते कर्माणि ज्ञायन्ते कर्तव्यत्वेन तानि कार्याणि। कुत्र ? उदगयन (. . .) हेषु कार्याणि उदगयनादयः प्रसिद्धाः । पुण्याहस्तु देवस्य सवितुः प्रातः प्रसवः प्राण इत्यस्मिन्ननुवाके पञ्च पुण्याहाः उक्ताः ।

End:

तत्र श्लोकः—

अनुक्तमभ्युक्तमयुक्तियुक्तव्यभे(मथे)तरोक्तं बहुयुक्तियुक्तम् ।
तत्सर्वमार्यैः परिशोधनीयं गृह्यप्रयोगाद्यनुबन्धनं च ॥

Colophon:

इत्यष्टमः पटलः ॥

एषा त्रैविद्यनाथेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

गृह्याण्डपिल्लै समाप्तम् ॥

R. No. 994.

Palm-leaf. 10⅝ × 1¼ inches. Foll. 129. Lines, 8 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

(*a*) सीताविजयः.

SĪTĀVIJAYAḤ.

Foll. 1*a*—10*b*.

Similar to the work described under R. No. 48 *ante*. Complete ; as found in the Vāsiṣṭhōttararāmāyaṇa.

Beginning :

शुक्लाम्बरधरं (. . . .) विघ्नोपशान्तये ।
शतानन्दो महामौनिर्वसिष्ठं सत्यवादिनम् ।
अपृच्छद्रामचरितं सीताविजयसंज्ञितम् ॥

वसिष्ठः—

शतास्यो नाम दनुजः (सीतया) निहतः पुरा ।
वक्ष्यामि शृणु तत्त्वेन तदाख्यानं महामुने ॥
रावणस्य च वृत्तान्तं कुम्भजेन महात्मना ।
श्रुत्वा (रामः प्रहृ)ष्टोऽभूद्भ्रातृभिर्मुनिभिः सह ॥
उवाच रामं तत्काले नभोवाणी महाद्भुता ।
प्रहृष्टोऽसि विभो राम द . . . . त्रतः ॥
शतास्यो नाम दनुजः सर्वलोकभयंकरः ।
शाकद्वीपान्तरे रम्ये दधिसागरवेष्टिते ॥
मायापुरेऽद्यापि वस(त्ययं रिपु)जिगीषया ।
रामस्तद्वचनं श्रुत्वा विस्मयाकुलमानसः ।
पृष्टवान् कुम्भसंभूतं वार्तां शतमुखस्य तु ॥

अगस्त्यः—

* * * *

काश्यपस्य दनुर्भार्या तत्तनूजः शताननः ।
ऋतुकालप्रयुक्तेन मातृदोषेण तत्सुतः ॥

* * * *

Colophon :

इति वासिष्ठोत्तररामायणे सीताविजये . . . .

* * * *

तं सीतया राघवेण दत्तं बुधमनोहरम् ।
हारं धृत्वा पवनजस्तारागणसमान्वितः ॥
सु . . . . . . देवगणालयः ॥

Colophon:

इति श्रीमद्वासिष्ठोत्तररामायणे सीताविजये शतास्यवधो नाम द्वादशोऽध्यायः ॥

End:

अयोध्यां पालयामास बहुवर्षगणान् विभुः ।
ततो वैकुण्ठमगमद्भ्रातृभिः सीतया सह ॥
य इदं पुण्यमाख्यानं यः पठेत्सततं नरः ।
स मुक्तः सर्वपापेभ्यो वैकुण्ठे मोदते सुखम् ॥

Colophon:

इति श्रीवासिष्ठोत्तररामायणे सीताविजये विश्वरूपप्रदर्शनं नाम त्रयोदशोऽध्यायः ॥

(*b*) स्मृतिमुक्ताफलम्.

SMṚTIMUKTĀPHALAM.

Foll. 11*a*—57*b*.

Same work as that described under No. 2788 of the D.C.S. MSS., Vol. V.

Contains the Kālanirṇaya complete.

(*c*) स्मृतिदीपिका.

SMṚTIDĪPIKĀ.

Foll. 58*a*—94*b*.

A treatise on Dharma-Śāstra said to have been composed after consulting various works on Smṛti: by Aṇṇādīkṣita, son of Kṛṣṇa Śāstrin of Puttūr village.

Contains the Śraddhakāṇḍa incomplete.

Beginning:

प्रणिपत्य जगन्नाथं पुण्डरीकाक्षमव्ययम् ।
सर्वस्मृतीः समालोक्य वक्ष्यते स्मृतिदीपिका ॥

अथेदानीं श्राद्धभेदप्रकरणमारभ्यते—तत्र श्राद्धं नामादनीयस्य वा द्रव्यस्य प्रेतोद्देशेन पित्रोरुद्देशेन वा श्रद्धया त्यागः । तदुक्तं ब्रह्माण्डे—

देशे काले च पात्रे च श्रद्धया विधिना च यत् ।
पितनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम् ॥

* * * *

Colophon:

इति श्रीमत्पुत्तूरग्रहारस्थब्रह्मज्ञानिकृष्णशास्त्रिसूनुना अण्णादीक्षितेन विरचितायां स्मृतिदीपिकायां श्राद्धकाण्डे उपोद्घातप्रकरणम् ॥

End:

तण्डुलं प्रतिगृह्यान्नं यः पचेन्मोहतो यतिः ॥
तदन्नं मांसतुल्यं स्याद्भुक्त्वा सद्यः पतत्ततः ।
यतेर्भैक्षं सोमपानतुल्यमित्याह वै मनुः ॥
सुरापानसमं प्रोक्तं भैक्षतण्डुलमित्यथ ।
तद्वर्जयेन्मोक्षकाङ्क्षी भैक्षमेव समाहरेत् ॥

(*d*) दक्षस्मृतिः.

DAKṢASMṚTIḤ.

Foll. 95*a*—97*a*.

Same work as that described under No. 2626 of the D.C.S. MSS., Vol. V.

Contains the seventh Adhyāya.

(*e*) काश्यपधर्मशास्त्रम्.

KĀŚYAPADHARMAŚĀSTRAM.

Foll. 97*a*—100*a*.

Similar to the above. By Kāśyapa. This treats of the duties and the religious rites of a house-holder or married man.

Complete.

Beginning:

अथातः काश्यपीयान् गृहस्थधर्मान् व्याख्यास्यामः—आहिताग्निः स वा निरतो हुताग्निहोत्री स्नाता ऋतुकालगामी देवपितृमनुष्यभूतब्रह्मयज्ञादीन् सेवमानः एकाद्वित्रिचतुर्णां ब्राह्मणानामकुर्वाणो व्रतनियमहोमजप्यपरो मातृपितृभक्तो दारापत्यपोषकः

* * * *

अस्य धर्मो भवति। कूपभेदतटाकविप्रदेवतायतनभेदने प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य चतस्र आज्याहुतीर्जुहुयात्।

End:

काश्यपीयमिदं धर्मशास्त्रं ज्ञानप्रदं शुभम्।
अधीत्य ब्राह्मणो याति ब्रह्मलोकमपि ध्रुवम्॥

Colophon:

इति दक्षप्रजापतिप्रोक्तं काश्यपीयं धर्मशास्त्रं समाप्तम्॥

(*f*) वृद्धशातातपस्मृतिः

VṚDDHAŚĀTĀTAPASMṚTIḤ

Foll. 100*a*—104*a*.

Similar to the above. It is attributed to Śātātapa, the elder.

This Smṛti mainly deals with the expiatory ceremonies prescribed for transgressions, pollution, etc., and also with Śrāddha or offerings to the manes of the dead ancestors.

Complete.

Beginning:

वृद्धशातातपप्रोक्तं स्मृतितन्त्रविनिश्चितम्।
संक्षेपेण प्रवक्ष्यामि यावदर्थोपलब्धये॥

मूत्ररेतःसमुत्सर्गे यो भुञ्जीत पिबेत वा।
त्रिरात्रं तत्र कुर्वीत प्रायश्चित्तं विशुद्धये॥

मूत्रं कृत्वा व्रजन् यस्तु स्मृतिभ्रंशाज्जलं पिबेत् ।
अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति ॥

End:

वृद्धशातातपो ह्येतदुक्तवानृषिसत्तमः ।
अध्येतव्यं प्रयत्नेन ब्राह्मणैः श्रेय ईप्सुभिः ॥
इति वृद्धशातातपप्रोक्तं धर्मशास्त्रमनुत्तमम् ।
अधीत्य ब्राह्मणो याति ब्रह्मणः सद्म शाश्वतम् ॥

(*g*) वृद्धयमस्मृतिः.
VṚDDHAYAMASMṚTIḤ.

Foll. 104*b*—1?0*a*.

Similar to the above. Describes mainly the duties and rules of conduct relating to the different castes and to the various stages of life. It is attributed to Yama, the elder.

Complete in eight Adhyāyas.

Beginning:

नारदाद्याश्च मुनयो धर्मं धर्मभृतां वरम् ।
प्रणम्य सुखमासीनं वृद्धं ज्ञानविदां वरम् ॥
पप्रच्छुर्वैदिकं कर्म सर्वलोकोपकारकम् ।
सर्वपापक्षयकरं श्रवणाज्ज्ञानदं महत् ॥

यमः—

महर्षे संप्रवक्ष्यामि यमो नत्वा त्रिलोचनम् ।
संगृह्य सर्वशास्त्राणि सर्वलोकोपकारकम् ॥
वर्णाश्रमयुतं धर्ममखिलं शास्त्रसंग्रहम् ।
सुप्त्वोत्था(य) उषः प्रातराचम्याथ हरिं स्मरेत् ॥

* * * *

Colophon:

इति वृद्धयमस्मृतौ धर्मशास्त्रे प्रथमोऽध्यायः ॥

End:

तस्मात्सर्वप्रयत्नेन श्राद्धं यत्नेन रक्षयेत् ।
एवं संशोध्य मतिमान् श्राद्धं कुर्याद्विधानतः ॥
एवं शास्त्रं यमेनोक्तमध्येतव्यं प्रयत्नतः ।
अध्येता ब्रह्मणो लोकं याति नास्त्यत्र संशयः ॥

Colophon:

इति यमस्मृतौ अष्टमोऽध्यायः ॥

(h) अगस्त्यस्मृतिः.
AGASTYASMṚTIḤ.

Foll. 120*b*—129*a*.

Similar to the above. Lays down rules for the acts and religious rites which a Brahman should perform from the time he rises from his bed to the time he goes to sleep. It is attributed to Agastya.

Complete.

Beginning:

अगस्त्यं मुनिमासीनमात्मध्यानपरणायम् ।
अभिसंगम्य मुनय इदं वचनमब्रुवन् ॥
भगवन्सर्ववर्णानामाश्रमाणां च नित्यशः ।
यथावद्धर्ममाचक्ष्व क्रमेण मुनिसत्तम ॥

अगस्त्यः—

शृणुध्वं मुनयः सर्वे धर्मान् वक्ष्यामि शाश्वतान् ।
वेदोक्तानखिलान् सूक्ष्मान् धर्मकामार्थमोक्षदान् ॥

ब्राह्मे मुहूर्ते उत्थाय निद्रां त्यक्त्वा प्रसन्नधीः ।
प्रक्षाल्य पादा पाणी च मुखं चाद्भिः समाहितः ॥

End:

संस्मरन् देवदेवेशं स्वपेद्दान्तो दृढव्रतः ।
. . . . तया सहा समाविशेत् ॥
निषिद्धदिवसे गच्छन् पतत्येव न संशयः ।
एवं गृहस्थधर्माश्च मयागस्त्येन चोदिताः ॥
पावनाः प्रत्यहं वि . . . . . ।

Colophon:

इत्यगस्त्यस्मृतिः संपूर्णा ॥

Fol. 129*b* contains a few lines regarding कर्तृक्रम.

R. No. **995**.

Palm-leaf. 16¼ × 1¼ inches. Foll. 33. Lines, 6 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

(*a*) अघपञ्चषष्टिः—सव्याख्या.

AGHAPAÑCAṢAṢṬIḤ WITH COMMENTARY.

Foll. 1*a*—18*b*.

The text here is the same as that described under No. 3002 of the D.C.S. MSS., Vol. V, but the commentary is different.

Complete, but wants three leaves in the middle numbered 8, 16 and 17.

Beginning:

कलानिधिः कौशिकवंशवार्धेः
श्रीवी(षि)नाथो विबुधो मथित्वा ।
धीमन्दरेण स्मृतिदुग्धसिन्धुं
ददाति सिद्धान्तसुधां बुधेभ्यः ॥

इह खल्वाखिललोकोपकारार्थं वीदि(षि)नाथशास्त्री नाम कश्चिद्द्विपाश्चिदाशौचसिद्धान्तनिर्णयं नाम ग्रन्थं चिकीर्षन् सकलशास्त्रोक्तसिद्धान्तरीत्य

स्वयं प . . . . विशिष्टेष्टदेवतानमस्काररूपं मङ्गलमाचरन् स्वग्रन्थे प्रेक्षावत्प्रवृत्तिसिद्धये विषयप्रयोजने निर्दिशन् स्वचिकीर्षितं प्रतिजानीते—कलानिधिरिति । वीदि(षि)नाथाख्यो विबुधः विशेषेण बुध्यत इति विबुधः विद्वान् ।

End:

द्वे प्रजे आहत्य विंशतिजना जाताः । एषां मृतौ प्रतियोगिनीनां स्त्रीणां दिनमहोरा(त्रमघं)भवति ॥

Colophon:

इति विष्टि(वीषि)नाथविरचितमघविवेचनं समाप्तम् ॥

Foll. 19 and 20 are left blank.

(*b*) **अघविवेचनम्.**

AGHAVIVĒCANAM.

Foll. 21*a*—28*a*.

By Rāmacandrādhvarin. Same work as that described under No. 3006 of the D.C.S. MSS., Vol. V.

Complete.

(*c*) **अघदीपिका.**

AGHADĪPIKĀ.

Foll. 28*a*—33*a*. Fol. 33*b* is left blank.

Similar to the above.

Complete.

Beginning:

पादे(दो)नचतुर्घटिकारूपसन्ध्याकालरहिता रात्रिस्त्रियामा । तां त्रियामां त्रेधा विभज्य आद्ये भागद्वये जननभ(म)रणरजोदर्शने जाते पूर्वदिनं ग्राह्यम् । उत्तरभागे परदिनम् । मातुर्योनिसम्बन्धेषु पितुश्च सप्तमात्पुरुषाद्यावता वा संबन्धो ज्ञायते तेषां प्रेतेषु उदकोपस्पर्शनम् ।

End :

उपरागे तु आशौचिभिर्दानादि[देया]देयमेव। रे(प्रे)तस्य वहनालंकारादि कर्म कुर्वेत एककालमाशौचम्। तद्गृहवासे त्रिरात्रम्। तत्र भक्षणे दशरात्रम्। इदं च यत्यनाथादिव्यतिरिक्तविषयम्। तद्विषये सद्यः शौचम्॥

Colophon :

इति अघदीपिका संपूर्णा॥

R. No. **996.**

Palm-leaf. 16¼ × 1⅓ inches. Foll. 47. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1913–14 from M. R. Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

Foll. 32*b*, 37*b* and 42*b* are left blank.

पित्र्यम्.

PITRYAM.

On the religious ceremonies to be performed in relation to a parent or ancestor, when he is in imminent danger of death as well as after death This work is based upon previous authoritative Smṛtis from which quotations are given ; by Rāmānujadīkṣita.

Complete.

Beginning :

नत्वा श्रीरामपादाब्जं सर्वसंपत्करं शुभम्।
पित्र्यं नाम प्रवक्ष्यामि श्रीरामानुजदीक्षितः॥

कृच्छ्रप्रतिनिधिं कुर्याद्गोभिरेव सवत्सकैः।
गवामभावे निष्कं स्यात्तदर्धं पादमेव वा॥

पादहीनं न कर्तव्यमिति शातातपोऽब्रवीत्।

विज्ञानेश्वरोऽपि—

प्राजापत्याक्रियाशक्तौ धेनुं दद्याद्विचक्षणः।
धेनोरभावे दातव्यं तन्मूल्यं नात्र संशयः॥

* * * *

योे मृत्युकाले संप्राप्ते गां ददाति पयस्विनीम् ।
गवा दर्शितमार्गस्तु ब्रह्मलोके महीयते ॥

End:

एकां गां तदभावे निष्कं निष्कार्धं तदर्धं वा आचार्याय दद्यात् ॥
इति द्वितीयः पटलः ॥

अथास्य प्रेतस्याक्षिकर्ण . . . . . सप्तप्राणस्थानेषु हिरण्यशकलान् निदध्यात् ।

* * * *

अथ ब्रह्ममेधानधिकारिणः । अयं देवतान्तरभक्तानां न कार्य इत्याह दक्षः—

देवतान्तरभक्तानां ब्रह्ममेधं न कारयेत् ।
कारयेद्यदि मोहेन नरके पतति ध्रुवम् ॥

नारदः—

नारायणपदाम्भोजविमुखा ये नराधमाः ।
ब्रह्ममेधविधानेन तेषां नास्ति हि संस्कृतिः ॥

हारीतः—

केशवार्पितचित्तानां ब्रह्ममेधविधिर्भवेत् ।
देवतान्तरभक्तानां न कार्यमिति हि श्रुतिः ।

Colophon:

इति श्रीरामानुजदीक्षितकृतं पित्र्यं समाप्तम् ॥
सर्वस्मृतीः समालोक्य सर्वांश्चैव निबन्धनान् ।
पित्र्यं नाम कृतं तेन श्रीरामानुजयज्वना ॥
पित्र्यं संपूर्णम् ॥

R. No. 997.

Palm-leaf. 17¼ × 1⅜ inches. Foll. 91. Lines, 8 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

The first two foll. contain a few stanzas regarding Śrāddha.

संग्रहः.

SAṄGRAHAḤ.

A brief summary dealing with the details connected with the performance of religious ceremonies to the manes of one's dead ancestors and with the determination of proper time for the performance of certain religious rites. The manuscript is said to have been copied by one Ponnammāḷ in the month of Āni of the year Vikāri.

Wants beginning in the Śrāddhakāṇḍa and breaks off in the Kālanirṇaya.

Beginning:

पञ्चाक्षराष्टाक्षररामषडक्षरीमन्त्रा(न्)जपेत् ।
उपक्रमे जपादेस्तु कर्मणः प्रयतोऽपि सन् ।
आचम्यैव तु कुर्वीत अन्यथा तन्निरर्थकम् ॥
प्राणस्य संशये शुद्धे दक्षिणाग्रकुशास्तृते ।
मुमूर्षुं याम्यशिरसं शाययित्वा जपेच्छ्रुतौ ॥

ब्रह्मविदाप्नोति परम्, भृगुर्वै वारुणिः इत्येतावनुवाकौ ब्रह्मविदो दक्षिणकर्णे जपति। इतरेषामायुषः प्राणं संतन्विति ।

श्राद्धकर्तृक्रमस्तूक्तश्लोकक्रमेण गण्यते ।
प्रमीतपितृकार्येषु कर्तारस्त्वौरसा मताः ॥
तेषु ज्येष्ठकनिष्ठाया ज्येष्ठापुत्रो युगोद्भवे ।
पाश्चात्यो ज्येष्ठ इत्येके जन्मज्येष्ठ इतीतरे ॥

* * * *

Colophon:

इति श्राद्धकाण्डसंग्रहे एकोद्दिष्टविधिः ।

*   *   *   *

इति श्राद्धकाण्डे संग्रहे मध्यमाः क्रियाः परिसमाप्ताः ॥

End:

उपवीति आचम्य ये के चास्मत्कुले जाताः इति स्नानवस्त्रं निवीती निष्पीड्य बाहुप्रकोष्ठे निक्षिप्य उपवीती द्विराचामेत् । एकैकस्य तर्पणस्य सप्ताष्ट वा तिला ग्राह्याः ;

तिलभोजी तिलस्नायी तिलहोमी तिलोदकी ।
तिलदाता तिलोभुक्त्वा(द्धर्ता)षट्तिलो नावसीदति ॥

बहुस्मृतीः समालोक्य श्राद्धकाण्डस्य संग्रहे ।
उत्तराश्च क्रियाः प्रोक्ताः समीक्ष्यन्तां बुभुत्सुभिः ॥

कालः कर्माङ्गभूतः । तदाह व्यासः—

यत्तिथौ यत्र नक्षत्रे यत्र वारे च य . . . ।
. . . . पालयंस्त्रिदिवं व्रजेत् ॥

तीथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता ।
निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥

दर्शे तिलोदं दद्यादित्यादिविधिः ।

*   *   *   *

प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्तमपि लभ्येत सोपोष्या तु महाफला ॥

*   *   *   *

समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेत् ।
इत्यतिक्रान्ताशौचस्मरणात् ॥

R. No. 998.

Palm-leaf. 15½ × 1⅜ inches. Foll. 71. Lines, 6 in a page. Grantha. Much injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

The first eight foll. contain the last portion of the Kālanirṇayaprakaraṇa of the Smṛtimuktāphala.

आपस्तम्बपितृमेधप्रश्नभाष्यम्.

ĀPASTAMBAPITṚMĒDHAPRAŚNABHĀṢYAM

Foll. 9*a*—71*b*.

By Gōpālayajvan. Same work as that described under No. 1238 of the D.C.S. MSS., Vol. II.

Wants beginning in the first Paṭala and contains up to the end of the fourth Paṭala.

R. No. 999.

Palm-leaf. 15½ × 1¼ inches. Foll. 155. Lines, 6 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

श्रुतप्रकाशिकाव्याख्या —भावप्रकाशिका.

ŚRUTAPRAKĀŚIKĀVYĀKHYĀ : BHĀVAPRAKĀŚIKĀ.

A commentary on the Śrutaprakāśikā, for a description of which work see under No. 4963 of the D.C.S. MSS., Vol X. By Raṅgā-Rāmānujamuni.

Breaks off in the Jijñāsādhikaraṇa.

Beginning:

(अतसीगुच्छ)सच्छायमश्चितोरःस्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ।

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं च स्वाचार्यस्य वरदगुरोरिष्टदेवतारूपं हस्तिगिरीश्वरं भगवन्तं वरदप्रणतार्तिहरनामभ्यां

प्रख्यातेष्टप्राप्त्यनिष्टपरिहारलक्षणपुरुषार्थदातृभावमतएव शरण्यं शरणमुपगच्छति—वरदं द्विरदाद्रीशामिति। द्विरदाद्रीशमित्यनेन सौलभ्यमुक्तम्।

दिङ्नागैरर्चित . . . पुरा विष्णुः सनातनः।
ततो हस्तिगिरिर्नाम ख्यातिरासीन्महागिरेः॥

इति पुराणवचनेन दिङ्नागानां तिरश्चामप्यर्चनीयोऽभूत्तत्रेति प्रतीतेः। श्रीनिधिं करुणानिधिमिति पदद्वयेन शरण्यत्वोपयुक्ते सामर्थ्यकारुणिकत्वे अभिहिते। श्रीनिधेर्हि देयद्रव्येषु न दुर्लभं किंचिद्वस्त्वस्तीति नेष्टप्रापणे देयद्रव्याभावकृत(म)सामर्थ्यमस्ति। 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा' इति श्रीनिधेरप्रमेयतेजोनिधित्वेन।

End:

गानशब्दस्य बहिराज्याधिकरणन्यायेन गीतिमात्रवाचित्वात् युक्तं तत्र संनिहितदुन्दुभ्यादिगानवाचित्वम्। इह तु आदेशशब्दस्य क्वचिदपि शिष्यो गुरुमादिदेशेत्यादिप्रयोगाभावेन साधारणोच्चारणाद्यर्थकत्वाभावादुपदेशातिदेशशब्दयोरिवादेशोपदेश.

R. No. **1000.**

Palm-leaf. 16 × 1 inches. Foll. 125. Lines, 7 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

Fol. 111*b* is left blank.

स्मृतिसंग्रहः.

SMṚTISAṄGRAHAḤ.

Similar to the work described under R. No. 658 *ante*.

Contains the Varṇāśramadharma incomplete.

R. No. **1001.**

Palm-leaf. 16½ × 1½ inches. Foll. 70. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

The first two leaves contain an index of the contents of the work.

(*a*) श्राद्धसंग्रहः.

ŚRĀDDHASAṄGRAHAḤ.

Foll. 3*a*—58*a*.

A short treatise dealing with details in connection with the performance of ceremonies to the manes of one's dead ancestors.

Complete.

Beginning:

. . . देवौ महादेवौ सर्वज्ञौ सर्वमङ्गलौ ।
सर्वेष्टदौ प्रणम्याथ वक्ष्यते श्राद्धसंग्रहः ॥
गर्भाधानं(पुंसवनं सीमन्तोन्नयनं जनिः) ।
नामान्नप्राशनं चौलमुपनीतिर्व्रतानि च ॥
चत्वारि स्नानमुद्वाहः पञ्च यज्ञाश्च दैहिकाः ।
एकोनविंशत्संस्काराः कर्मण्यो यैर्भ(वेद् द्वि)जः ॥

दैहिकाः देहशुद्धिकराः ।

पाकयज्ञा हविर्यज्ञाः सौमिका एकविंशतिः ।
एतैश्च संस्कृतो विद्वान् देवलोकं समर्हति ॥

End:

सत्यव्रतः—

भूरिश्राद्धं परदिने न कुर्याद्यादि मोहितः ।
पितृघाती स विज्ञेयः कल्पान्तं नरकं व्रजेत् ।
तस्मात्परेद्युः कर्तव्यं भूरिश्राद्धं विशेषतः ।

इति ॥

(*b*) **एकादशीश्राद्धविचारः.**

ĒKĀDAŚĪŚRĀDDHAVICĀRAḤ.

Foll. 58*a*—59*b*.

An investigation into the propriety of performing the Śrāddha on the Ēkādaśī day. The author comes to the conclusion that it should be performed on that day.

Complete.

Beginning:

उपवासदिने श्राद्धप्राप्तौ कथं भोजनमिति तत्राह—

उपवासो यदा नित्यश्राद्धं च प्रकृतं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥

पितृभुक्तान्नशेषाघ्राणपूर्वकमुपवासकरणे कर्तुरभोजनवर्जनं भोजननिवृत्तिरूपोपवासश्च द्वयं संभवेत् । तथाच श्रुतिः—अवघ्रेयमेव तन्ने(न्नै)वाप्राशितं नैव प्राशितमिति । ननु

आशौचमध्ये यच्छ्राद्धमाशौचान्ते विधीयते ।
तद्वदेकादशीश्राद्धं द्वादश्यामेव कारयेत् ॥

इति

* * * *

एकादशीतिथौ कथं श्राद्धकर्तृत्वं[वा] श्राद्धभोक्तृत्वं वा कथमिति चेत्, मैवम्, यथा श्रुतिस्मृत्योर्विरोधे श्रुतिरेव बलीयसी तथा स्मृतिपुराणयोर्विरोधे स्मृतेरेव बलीयस्त्वात् ।

End:

उपवासदिने श्राद्धार्थं मम विशिष्टा ब्राह्मणाः कथं संभवेयुरिति कामनायुक्तो यः कर्ता तस्य कामनापूर्त्यर्थं निमन्त्रितेन विशिष्टेन ब्राह्मणेन निरुपाधिना यत्कृतं श्राद्धभोजनं तत् उपवासव्रतघ्नं न भवतीत्यर्थः । तस्मान्नोक्तदोषलेश इति ॥

Foll. 59*b*—60*a* contain a few stanzas regarding श्राद्धपिण्ड. Fol. 60*b* is left blank.

(c) एकोद्दिष्टादिश्राद्धभोक्तृप्रायश्चित्तम्.

EKŌDDIṢṬĀDIŚRĀDDHABHŌKTṚPRĀYAŚCITTAM.

Foll. 61*a*—64*b*.

On the expiatory rites to be performed by a Brahmin for having partaken of the meals offered to one's dead ancestor after having been duly selected to represent him on the 11th day ceremony performed after his death.

Complete.

Beginning:

एकोद्दिष्टादिश्राद्धभोजने प्रायश्चित्तं स्मृत्यर्थसारे--

एकोद्दिष्टे द्विजो भुङ्क्ते सचेलं स्नानमाचरेत् ।
गायत्र्या शतवारं तु अभिमन्त्र्य जलं पिबेत् ॥
सन्ध्यामात्राधिकारी च नान्यकर्मणि कुत्रचित् ।
परेद्युर्मृत्तिकास्नानं कुर्यादष्टदिनात्परम् ॥
द्विसहस्रं तु गायत्रीं जपंश्चेन्नित्यकर्मसु ।
अर्हो भवेद् द्विजः पश्चादष्टोत्तरसहस्रकम् ॥

End:

किंच धर्मप्रवृत्तौ विशेष उक्तः—

चतुर्थादिषु गर्भेषु गर्भदीक्षां न (कारयेत्) ।
तीर्थयात्रा श्राद्धभुक्तिर्वपनं नैव दोषकृत् ।
चतुर्थादिषु गर्भेषु षष्ठमासात्परं त्यजेत् ॥
वपनं दूरयात्रां च श्राद्धभोजनमेव च ।
तत्पूर्वं नैव दोषोऽस्ति गालवो मुनिरब्रवीत् ॥

(d) यतिशिबिकारोहणादिनिषेधः.

YATIŚIBIKĀRŌHAṆĀDINIṢĒDHAḤ.

Foll. 65*a*—66*b*.

A pamphlet giving quotations from various sources to show that a Sannyāsin or ascetic should not ride on a palanquin etc.

Complete.

Beginning:

देवलः—

नास्तिकं भिन्नमर्यादं चण्डालं पतितं शवम् ।
वाहनस्थं यतिं चैव दृष्ट्वा सूर्यं निरीक्षयेत् ॥

यमः—

सकेशविधवां नारीं शिबिकास्थं यतिं तथा ।
चण्डालं पतितं म्लेच्छं दृष्ट्वा चक्षुर्निमीलयेत् ॥

End:

तत्त्वसंगरसंहितायाम्—

वैष्णवश्रीविवृद्ध्यर्थं माठपत्यं न कारयेत् ।
अज्ञानात्कुरुते भिक्षुः पतत्येव न संशयः ॥

(e) यतिस्थितिगतिनिरूपणम्.

YATISTHITIGATINIRŪPAṆAM.

Foll. 67*a*—70*a*.

A tract with quotations from authoritative sources determining the time when a Sannyasin may travel as well as when he should necessarily halt. By Sudarśanāryādhvarin, son of Śrīnivāsārya.

Complete.

Beginning:

सदाचार(रे सु)मनसां यतीनामूर्ध्वरेतसाम् ।
निरूप्येते स्थितिगती पूर्वग्रन्थानुरोधतः ॥

गौतमः—

ऊर्ध्वरेता ध्रुवशीलो वर्षासु ।

मनुः—

ग्रैष्महैमन्तिकान्मासानष्टौ प्रायेण पर्यटेत् ।
दयार्थं सर्वभूतानां वर्षास्वेकत्र संविशेत् ॥

End:

कुटीचकबहूदकादिव्यवस्थितधर्मलेखनवत् चातुर्मास्यव्रतं न व्यव-

स्थिततया लिखितं किंतु सर्वसाधारणतयैव लिखितमित्यतः सर्वैरेव यतिभिः चातुर्मास्यमनुष्ठेयमित्यनवद्यम् ॥

सुदर्शनार्याध्वरिणा श्रीनिवासार्यसूनुना ।
निरूप्येते स्थितिगती सतां संयमिनां मुदे ॥

एतदनुष्ठानप्रकारश्चान्यत एवावगन्तव्यः । विस्तरभयान्न लिखित इति ध्येयम् ॥

R. No. **1002.**

Palm-leaf. 15⅜ × 1½ inches. Foll. 51. Lines, 7 in a page. Grantha. Injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

(*a*) पुत्रस्वीकारनिर्णयः.

PUTRASVĪKĀRANIRṆAYAḤ.

Foll. 1*a*—18*a*.

By Rāmapaṇḍita of Śrīvatsagōtra. Same work as that described under No. 3182 of the D.C.S. MSS., Vol. VI.

Complete.

(*b*) संस्कारकौस्तुभः.

SAṀSKĀRAKAUSTUBHAḤ.

Foll. 18*b*—35*a*.

By Anantadēva. Same work as that described under No. 3226 of the D.C.S. MSS., Vol. VI.

Complete, but wants one leaf numbered 25 in the middle.

(*c*) दत्तपुत्रविषयः.

DATTAPUTRAVIṢAYAḤ.

Foll. 35*a*—39*b*.

Similar to the work described under No. 3168 of the D.C.S. MSS., Vol. VI.

Incomplete.

(*d*) दत्तपुत्रविषयः.

DATTAPUTRAVIṢAYAḤ.

Size, $8\frac{1}{4} \times 1$ inches. Foll. 40*a*—45*b*. Lines, 4 in a page.

Similar to the above.

Incomplete.

(*e*) पुत्रस्वीकारप्रयोगः.

PUTRASVĪKĀRAPRAYŌGAḤ.

Size, $10\frac{1}{2} \times \frac{7}{8}$ inches. Foll. 46*a*—51*b*.

Similar to the work described under No. 3687 of the D.C.S. MSS., Vol. VII.

Complete.

R. No. **1003.**

Palm-leaf. $14\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 77. Lines, 8 in a page. Grantha. Very much injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

(*a*) शुल्बाग्निनिधिदीपिका.

ŚULBĀGNINIDHIDĪPIKĀ.

Foll. 1*a*—37*b*.

A work giving details such as measurement, mode of arrangement of bricks, etc., for the construction of a sacrificial altar for keeping the sacred fire : by Śrīnivāsa, son of Vāsudēvasūrin.

Complete.

Beginning :

अधिरू . . . . लानामधीश्वरम् ।
आश्रयं स . . . माश्रये कमलां . . ॥
. . . . (आपस्त)म्बाय नौम्यहम् ।
सूत्रार्थगहनग्रन्थध्वान्तपङ्कजबन्धवे ॥

. . . तिरम्यानां कपर्दिस्वामि . . ।
. . . . . भाष्यतत्त्वार्थविज्ञानपि ।
* * * *
सूनुना श्रीनिवासेन शुल्बाग्निनिधिदीपिका ।
. . . जातवह्नीनामुच्यते विधिः ॥
वेदिमानं च सर्वेषामग्निमानपुरःसरम् ।
करणानीष्टकानां च धिष्ण्य . . . . ॥
इष्टकाभिः कृतो धिष्ण्यो वह्निरित्यभिधीयते ।
अथोच्यते निर्णयोऽग्नेर्भाष्यकारसमीरितः ॥
. . . . . तानेत्याह सूत्रकृत् ।
अग्निष्टोमादिसूत्राभ्यां वेद्यग्न्योर्विनिवेशतः ॥
* * * *
अच्छावाकीयधिष्ण्यान्ते ब्रह्मणः सदनं क्षिपेत् ।
* * * *
अष्टाङ्गुलप्रमाणाभिर्द्विशतं पूरयेदिह ।
आत्मरीत्या नवोदीच्यः प्राच्यः स्युः पक्षपुच्छयोः ।
उद्धृत्य पञ्चमींष . . . . . ।

Colophon:

इति श्रीनिवासविरचितायां शुल्बाग्निनिधिदीपिकायां प्रथमाग्नेः प्रथमः प्रस्तारः ॥

End:

शिष्टैवाङ्गुलिषट्कं तु दक्षिणे चोत्तरेऽपि च ।
सपादैकाङ्गुलोने तु त्र्यरत्ना यूपशङ्कवः ॥
विधाभ्यासे तु सर्वत्र . . . . . . ।
. . . . . चतुर्थांशं तद्वेदेः प्रक्रमो भवेत् ॥
नवैकादशिनी वेदिः साग्निचित्ये विधीयते ।
तदग्न्याप्ता तदा वेदिर्न तदेति विधीयते ॥

Colophon :

. . . कुलजलधिकौस्तुभश्रीवास(सु)देवसूरिसूनुश्रीनिवासविर-
चितायां शुल्बाग्निनिधिदीपिकायामेकादशिनीवेदिमानकारिका समा(सा) ॥

विलम्ब्यब्दे मार्गशीर्षे मासि पक्षेऽतिमेचके ।
भानुवारविशाखर्क्षसंयुजि द्वादशीतिथौ ॥
श्रीवत्सवंशजातस्य . . . . ।
सूनुना श्रीनिवासेन सुधिया निर्मितामिमाम् ॥
अष्टादशचिदग्नीनां प्रयोगविधिरूपिणीम् ।
गूढभावार्थगम्भीर . . . . . ।
. . . श्रौतिवृन्दैर्भावज्ञैः सूक्ष्मबुद्धिभिः ।
सुसंप्रदायविद्भिश्च विज्ञेयां कारिकांव . . ॥
. . ध्वरिणः सूनुः श्रीनिवाससुधीश्वरः ।
स्वहस्तेनातिवेगेन संपूर्णामलिखत् स्वयम् ॥

(*b*) आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Foll. 38*a*—54*b*.

Same work as that described under No. 1042 of the D.C.S. MSS., Vol. II.

Contains the eighth Praśna complete.

Fol. 55*a* is left blank. Foll. 55*b* and 56 contain a few lines regarding Cāturmāsya.

(*c*) चातुर्मास्यप्रयोगः.

CĀTURMĀSYAPRAYŌGAḤ.

Foll. 56*b*—77*b*.

On certain details connected with the Cāturmāsya sacrifice which has to be performed in the course of four lunar months.

Beginning:

चातुर्मास्यानां प्रयोगः—चातुर्मास्यानीति समुदायनाम . . . फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजेत । तयोः पूर्वस्यां चतुर्दश्यां प्रातरग्निहोत्रं हुत्वा प्राणानायम्य संकल्पः चातुर्मास्यैर्यक्ष्ये ।

End:

तस्य कर्म पञ्चसांवत्सरिकैश्चातुर्मास्यैः . . . . आसजतीत्यादिशुनासीर्यैर्व्यहा . . . .

Colophon:

• चातुर्मास्यानि समाप्तानि ॥

R. No. 1004.

Palm-leaf. $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 61. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1913–14 from M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

व्यवहारविषयः.

VYAVAHĀRAVIṢAYAḤ.

Similar to the work described under No. 3217 of the D.C.S. MSS., Vol. VI.

Incomplete.

R. No. 1005.

Palm-leaf. $15\frac{1}{2} \times 1\frac{5}{8}$ inches. Foll. 116. Lines, 10 in a page. Grantha. Much injured.

Presented in 1913–14 by M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

पराशरस्मृतिव्याख्या—माधवीया.

PARĀŚARASMṚTIVYĀKHYĀ : MĀDHAVĪYĀ.

By Mādhavācārya. Same work as that described under No. 2646 of the D.C.S. MSS., Vol. V.

Wants the beginning of the first Adhyāya and breaks off in the second Adhyāya.

R. No. 1006.

Palm-leaf. 16⅓ × 1½ inches. Foll. 102. Lines, 7 in a page. Grantha. Injured.

Presented in 1913–14 by M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

(*a*) अघपञ्चषष्टिः—सव्याख्या.

AGHAPAÑCAṢAṢṬIḤ WITH COMMENTARY.

Foll. 1*a*—14*a*. Fol. 14*b* is left blank.

By Rāmacandra. Same work as that described under No. 3003 of the D.C.S. MSS., Vol. V.

Complete.

(*b*) स्मृतिमुक्ताफलम्.

SMṚTIMUKTĀPHALAM.

Foll. 15*a*—96*a*. Fol. 96*b* is left blank.

By Vaidyanāthadīkṣita. Same work as that described under No. 2793 of the D.C.S. MSS., Vol. V.

Contains the Āśaucakāṇḍa complete.

Fol. 97 contains a few stanzas on पुत्रस्वीकार.

(*c*) प्रातःकालस्मरणीयश्लोकाः.

PRĀTAḤKĀLASMARAṆĪYAŚLŌKĀḤ.

Foll. 98*a*—99*a*. Fol. 99*b* is left blank.

Similar to the work described under R. No. 673(*k*) *ante.*

Complete.

(d) षष्ट्यब्दपूर्तिशान्तिः.

ṢAṢṬYABDAPŪRTIŚĀNTIḤ.

Foll. 100*a*—102*b*.

Similar to the work described under No. 3450 of the D.C.S. MSS., Vol. VII.

Complete.

R. No. **1007.**

Palm-leaf. 18 × 1⅝ inches. Foll. 128. Lines, 6 in a page. Grantha. Much injured.

Presented in 1913–14 by M.R.Ry. Śrīnivāsa Pāṭrācāriyar of Kumbakonam.

The leaves are in disorder.

तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

By Gadādhara. Same work as that described under No. 4040 of the D.C.S. MSS., Vol. VIII.

Contains the Anumānakhaṇḍa without beginning and end.

R. No. **1008.**

Srītāla. 11⅛ × 1¾ inches. Foll. 55. Lines, 8 in a page. Grantha and Tamil. Good.

Purchased in 1913–14 from M.R.Ry. (Vādyār) Sāmi Aiyaṅgār of Kumaṭṭittaḍal (Tanjore district).

(*a*) अधिकारसंग्रहदीपिका.

ADHIKĀRASAṄGRAHADĪPIKĀ.

Foll. 1*a*—32*a*. Fol. 32*b* is left blank.

Herein the Tamil stanzas found at the end of each of the Adhikāras of the Rahasyatrayasāra of Vēdāntadēśika are given with a metrical translation thereof in Sanskrit and with a Sanskrit commentary. By Raṅgācārya, son of Vēṅkaṭācārya of Kauśika-gōtra, who expressly refers to Sārāsvādinī as being useful for clearing up doubts and difficulties in the present work.

Complete.

Beginning:

नमः श्रीवरदार्याय श्रीमद्वेङ्कटसूरये ।
तद्गुरुभ्यश्च सर्वेभ्यः श्रियै तद्वल्लभाय च ॥
त्रय्यन्तसूरिर्मे दद्यादज्ञान्धज्ञानदृक्पथः ।
रहस्यत्रयसारोक्तगाथासु विमलां धियम् ॥
श्रीमद्रहस्यत्रयसारसम्यग्व्याख्यानतोऽज्ञान् स्वजनानवन्तम् ।
वेदान्तरामानुजसंयमीन्द्रं तच्छात्रगोपालगुरुं च नौमि ॥
श्रीमद्रहस्यत्रयसारतत्तदधिक्रियासंग्रहचारुगाथाः ।
श्लोकात्मना लेखयति स्वदासं तदर्थबोधाय तुरङ्गवक्त्रः ॥
श्रीमत्सारास्वादिनीव्याख्ययार्थान्
बुद्ध्वा तासां दीपिकां कौशिकोऽयम् ।
दासः श्रीमद्वेङ्कटाचार्यपुत्रो
रङ्गाख्यस्तल्लब्धबोधः करोति ॥
गाथापदानां सर्वेषां व्याख्यानस्थपदान्वितैः ।
स्वशब्दैरुच्यतेऽत्रार्थस्तात्पर्यार्थांशसंयुतः ॥
संशयाः परिहाराश्च तात्पर्यार्थाश्च कृत्स्नशः ।
सारास्वादिनीव्याख्यायां द्रष्टव्यास्तद्बुभुत्सुभिः ॥

* * * *

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

சீரொன்று தூப்பிற்றிருவேங்கடமுடையான்
பாரொன்றச்சொன்ன பழை மொழிக
ளோரொன்று தானேயமையாதோ தாரணியில்
வாழ்வார்க்கு வானேரப் போமளவும் வாழ்வு.
பொய்கை முனி பூதத்தார் பேயாழ்வார் தண்பொருநல்வருங்
குருகேசன் விட்ணு சித்தன்
துய்யகுலசேகர நம்பாணநாதன் தொண்டரடிப்பொடி
மழிசைவந்தசோதி

வையமெல்லாமறை விளங்கவாள் வேலேந்து மங்கையர்கோ
னென்றிவர்கள் மகிழ்ந்துபாடுஞ்
செய்யத்தமிழ்மாலைகள் நாம் தெளியவோதித்தெளியாத
மறை நிலங்கள் தெளிகின்றோமே.

कासाराद्या मुनीन्द्रास्त्रय इह मुनिवाहश्च भक्ताङ्घ्रिरेणुः
शीताम्भस्ताम्रपर्णीतटभवकुरुकाधीश्वरो विष्णुचित्तः
शुद्धो राज्ञां कुले शेखर इति मषिशैभक्तिसारप्रदेशे
संभूतज्योतिरात्मा सकलजगति चाम्नायसम्यक्प्रदीप्त्यै ॥
खड्गं कुन्तं च मङ्गेत्युदितपुरजनाधीश्वरः संदधच्चे-
त्येतैः प्रीत्या सुगीता द्रमिडसुभणितीर्माल्यवच्छ्रीधरेण ।
मूर्ध्ना श्लाघ्याश्च ऋज्वीर्वयमतिकृपणाः सार्थमभ्यस्य नीत्या
स्मृत्या चानिश्चितार्थश्रुतितलमकलङ्कं हि विद्मो यथावत् ॥

End:

வெள்ளைப்பரிமுகர் தேசிகராய் விரகாலடியோம்
உள்ளத்தெழுதிய தோலையிலிட்டமையாமிவற்கென்
கொள்ளத்துணியினுங்கோதென்றிகழியினுங்கூர்மதியீர்
எள்ளத்தனையுகவாதிகழாதெனெழின்மதியே.

श्वेताश्वानन एव देशिकतयोद्धूयोपदेशेन यल्ले-
खिन्या हृदि मेऽलिखत्तदलिखं पत्रेऽस्य किं दूषणम् ।
सद्भिस्सङ्ग्रहणेऽप्यसार इति चासद्भिः कृतेऽनादरे
दीप्ता सूक्ष्मधियस्तिलांशमपि मे हृष्येन्न दुःख्येन्न धीः ॥

हे सूक्ष्मधियः । श्वेताश्वानन एव देशिकत(या) उद्धूय उपदेशेन लेखिन्या मे हृदि यत् अलिखत् तत् अहं पत्रे अलिखम् । अस्य दूषणं किम् ? सद्भिः सङ्ग्रहणेऽपि असद्भिः असार इति अनादरे कृते सति च मे दीप्ता धीः तिलांशमपि न हृष्येत् न दुःख्येत् इत्यन्वयः ।

अधिक्रियासंग्रहदीपिका मया हृदि स्थितेनाश्वमुखेन कारिता ।
सुखेन तस्यार्थबुभुत्सुभिर्बुधैर्निरीक्ष्यतां कारुणिकैर्विमत्सरैः ॥

(*b*) अधिकारसंग्रहदीपिका.

ADHIKĀRASAṄGRAHADĪPIKĀ.

Foll. 33*a*—55*b*.

Same work as the above, but with the addition of the following stanzas at the end.

Complete.

अधिकारसंग्रहपदार्थबोधनी(नीं)
निजदासरङ्गशिशुना हृदि स्थितः ।
इयवक्त्र एव ललित(ता)मकारय-
द्रमिडानभिज्ञविबुधैर्निरीक्ष्यताम् ॥
क्व वेदान्तगुरुप्रोक्तगाथार्थाः श्रुतिमौलिगाः ।
सर्वज्ञज्ञानविषयाः क्वाहमत्यन्तमन्दधीः ॥
तथापि तद्बुभुत्सा मां प्रेरयत्यतिसाहसे ।
रविसाध्ये तमोनाशे (खद्योतः किं न सज्जते) ॥
कौशिको रङ्गदासः श्रीवेङ्कटेशगुरोः सुतः ।
. . . . . श्लोकान् व्याख्योक्तरीतितः ।

R. No. 1009.

Palm-leaf. 15½ × 1¼ inches. Foll. 5. Lines, 6 in a page. Grantha. Good.

Purchased in 1913–14 from M.R.Ry. Sāmi Aiyaṅgār of Kummaṭṭittaḍal (Tanjore district).

आत्मार्पणस्तुतिः.

ĀTMĀRPAṆASTUTIḤ.

Same work as that described under No. 11232 of the D.C.S. MSS, Vol. XIX, wherein this work has been described as Śivastōtra, which is incomplete and not complete as stated therein.

Complete in 50 stanzas.

End:

आत्मार्पणस्तुतिरियं भगवन्निबन्धः
स्वामिन्ननन्यमनसा न मया तथापि ।
वाचापि केवलतया शरणं प्रणीतो
दीनो वराक इति रक्ष कृपानिधे माम् ॥

Colophon:

आत्मार्पणस्तुतिः संपूर्णा ॥

R. No. **1010.**

Palm-leaf. 16¾ × 1¼ inches. Foll. 17. Lines, 5 in a page. Grantha. Good.

Purchased in 1913–14 from M.R.Ry. Sāmi Aiyaṅgār of Kummaṭṭittaḍal (Tanjore district).

भाषाकुसुममञ्जरी.

BHĀṢĀKUSUMAMAÑJARĪ.

An elementary treatise in dialogue form for learning Sanskrit: by Trikālajña.

Beginning:

त्रिकालज्ञकवीन्द्रेण भाषाकुसुममञ्जरी ।
रचितेयं चिरं जीयात्सज्जनभ्रमरप्रिया ॥

सखे भवन्तमभिवादयामि । आयुष्मान् भव, कस्माद् देशादागतो भवान् । आर्य, इदानीं दक्षिणदेशादागतोऽहम् । सखे, भवता के के देशा दृष्टाः ।

End:

अद्य खलु कृतार्थोऽस्मि । भवन्तु भवतः प्रस्तुतोचितानि व(च)-नानि । इतः परं सकलव्यवहारपटुता भवतामेव सुधारसमधुराणि वचांसि उदीर्य . . . . भवन्तः सङ्गे प्रीतिं कुर्वन्तु ॥

R. No. **1011.**

Palm-leaf. 14¼ × 1½ inches. Foll. 19. Lines, 9 in a page. Grantha. Good.

Purchased in 1913–14 from M.R.Ry. (Vādyār) Sāmi Aiyaṅgār of Kummaṭṭittaḍal (Tanjore district).

हाटकेश्वरमाहात्म्यम्.

HĀṬAKĒŚVARAMĀHĀTMYAM.

Same work as the one described under R. No. 36 *ante.*

Begins towards the end of the 3rd Adhyāya and ends in the 32nd Adhyāya.

R. No. **1012.**

Palm-leaf. 15¼ × 1¼ inches. Foll. 102. Lines, 7 in a page. Grantha. Good.

Purchased in 1913–14 from M.R.Ry. (Vādyār) Sāmi Aiyaṅgār of Kummaṭṭittaḍal (Tanjore district).

त्यागराजस्तवव्याख्या.

TYĀGARĀJASTAVAVYĀKHYĀ

A commentary by Tyāgarājādhvarin on the hymn composed by himself in praise of Tyāgarāja, a form of Śiva worshipped at Tiruvālūr in the Tanjore district. The author refers in the introduction to Viriñcipuram in the North Arcot district, which is said to be due west of Conjeeveram. He was living at Mannārguḍi in the Tanjore district in the latter part of the nineteenth century and was otherwise known as Mahāmahōpādhyāya Rāju Śāstriyaḷ.

Contains 131 stanzas.

Beginning:

श्रीमार्गबन्धौ श्रितलोकबन्धौ कान्ते सुगन्धौ करुणैकसिन्धौ ।
तारल्यमुत्सृज्य तनोति सङ्गं मन्मानसं मन्मथदर्पभङ्गे ॥
वल्मीकक्षेत्रवास्तव्यस्त्यागराजाध्वरी सुधीः ।
स्वकृतं त्यागराजस्य स्तवं व्याख्यत्सविस्तरम् ॥

अस्ति तावत् क्षीरतरङ्गिणीतीरे पुरहरविहारस्थानं काञ्चीनगरात् पश्चिमभागे विरिञ्चिपुरं नाम प्रसिद्धं महत्क्षेत्रम् । तत्र च मार्गसहायसंज्ञको

भगवान् मरकतवल्लीसंज्ञिकया देव्या सह भक्तानुग्रहैकतत्परः संततं संनिधत्ते। स चास्माकदीक्षितवंश्यानां कुलदैवतम्। अतः प्रथमं तमनुसंदधानः स्तौति—मरकतेति। मरकतमणिमयलतावाचिना मरकतवल्लीशब्देन हरितवर्णत्वादिसाधर्म्यात् गौण्या वृत्त्या अम्बिकोच्यते।

End:

स्तोतुमिति। हे महेश अहं मौढ्यात् मूढभावात् स्तुतिप्रकारानभिज्ञानादित्यर्थः। स्तोतुं न शक्नोमि। तर्हि तूष्णीमास्यतामिति चेत् वाचं न यच्छामि वाग्यमनं तूष्णींभावं न प्राप्नोमि; कुतः? अजितेन्द्रियत्वात् वाङ्मनसरूपेन्द्रियजयाभावात्, वाङ्मनसयोश्चापल्यादिति यावत्। इत्युभयत्राप्याकुलात्मानं दौस्थ्यापन्नचित्तं मां स्वानवीणां पटुवैणिक इव त्वमवीवदः वादितवानसि। अहो मयि तव परमकरुणेति भावः॥

R. No. **1013.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{8}$ inches. Foll. 36. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1913–14 by M.R.Ry. (Vādyār) Sāmi Aiyaṅgār of Kummaṭṭittaḍal (Tanjore district).

(*a*) हनूमदष्टोत्तरशतनामावलिः.

HANŪMADAṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 1*a*—2*b*.

Similar to the work described under No. 8784 of the D.C.S. MSS., Vol. XVII.

Complete.

This work is said to have been copied by a scribe named Lōkanāthan.

(*b*) लक्ष्मीसहस्रनामावलिः.

LAKṢMĪSAHASRANĀMĀVALIḤ.

Foll. 3*a*—21*b*.

Same work as that described under No. 8872 of the D.C.S. MSS., Vol. XVII.

Complete.

This work is said to have been copied by a scribe named Lōkanāthan, the copying having been completed on the first day of the month of Mārgaḷi in the year Pramāti.

(*c*) रामसहस्रनामावलिः.

RĀMASAHASRANĀMĀVALIḤ.

Foll. 22*a*—36*b*.

Same work as that described under No. 8969 of the D.C.S. MSS., Vol. XVII.

Incomplete.

R. No. **1014**.

Palm-leaf. 14⅜ × 2 inches. Foll. 73. Lines, 10 in a page. Grantha. Good.

Presented in 1913-14 by M.R.Ry. (Vādyār) Sāmi Aiyaṅgār of Kummaṭṭittaḍal (Tanjore district).

Fol. 39*b* is left blank.

वेदान्तदीपः.

VĒDĀNTADĪPAḤ.

By Bhagavadrāmānuja. Same work as that described under No. 5011 of the D.C.S. MSS., Vol. X.

Wants three leaves numbered 6, 52 and 53 in the middle and breaks off in the first Sūtra of the first Pāda of the fourth Adhyāya.

R. No. **1015**.

Palm-leaf. 17 × 1⅜ inches. Foll. 132. Lines, 8 in a page. Grantha. Good.

Presented in 1913-14 by M.R.Ry. (Vādyār) Sāmi Aiyaṅgār of Kummaṭṭittaḍal (Tanjore district).

भागवतव्याख्या—भावार्थदीपिका.

BHĀGAVATAVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

By Śrīdharācārya Same work as that described under No. 2201 of the D.C.S. MSS., Vol. IV, Part I.

Breaks off in the eighth Adhyāya of the third Skandha.

R. No. **1016.**

Śrītāla. 14⅝ × 1¾ inches. Foll. 101. Lines, 13 in a page. Grantha. Slightly injured.

Purchased in 1913–14 from M.R.Ry. T. P. V. Rāghavācāriyar of Srirangam.

रामायणव्याख्यानम्— अमृतकतकम्.

RĀMĀYAṆAVYĀKHYĀNAM: AMṚTAKATAKAM.

Same work as that described under No. 1890 of the D.C.S. MSS., Vol. IV, Part I.

Begins towards the end of the fourth Sarga and ends in the 106th Sarga of the Ayōdhyākāṇḍa. This manuscript is said to have belonged to Paravastu Vēṅkaṭācāriyar of Srirangam.

Beginning:

योगेन जीवर्णापाकरणं च जातमित्युक्तम् । आदत्तमित्यनेनान्नभूतानीत्यादिना च शेषः प्रसिद्धः । यद्भवं कर्तुमर्हसीति ।

* * * *

राज्यफलमर्थो धर्मश्च । तच्च प्राप्नुहि । त्वदर्थमिति न स्वप्रयोजनाय । अभ्यनुज्ञाप्येति लक्षणद्वारेति शेषः । जानातेर्ज्ञपेर्वा हेतुमण्ण्यन्तात् ल्यप् ॥

Colophon:

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे चतुर्थः सर्गः ॥

End:

निगमे पुरे भवा नैगमाः पौराः 'निगमो निश्चये वेदे पुरे पाथि वणिक्पथे' वै. नैगमयूथानां वल्लभास्तथा । विसंज्ञा विचित्ता अश्रुकला अश्रुप्रचुराश्च तथा । मृगमाणः ॥

Colophon:

इति श्रीमद्रामायणामृतकतकटीकायामयोध्याकाण्डे षडधिकशततमः सर्गः ॥

R. No. 1017.

Palm-leaf. $14\frac{1}{2} \times 1\frac{7}{8}$ inches. Foll. 80. Lines, 11 in a page. Grantha. Good.

Purchased in 1913–14 from M.R.Ry. T. P. V. Rāghavācāriyar of Srirangam.

रामायणव्याख्या—मुक्ताहारः.

RĀMĀYAṆAVYĀKHYĀ : MŪKTĀHĀRAḤ.

The commentary of Gōvindarāja on the Kiṣkindhākāṇḍa of the Rāmāyaṇa is called by the name of Muktāhāra.

This manuscript is said to have been copied at Anantaśayana by Āsūri Bhāṣyakārar of Srirangam, the copying having been completed on Friday, the 6th day of the bright fortnight, *i.e.*, the 17th day of the Vṛṣabha month in the year Vikṛti.

Contains the Kiṣkindhākāṇḍa complete.

Beginning :

काहं मन्दमतिर्गभीरमधुरं रामायणं तत् क च
व्याख्यानेऽस्य परिश्रमन्नहमहो हासास्पदं धीमताम् ।
को भारोऽत्र मम स्वयं कुलगुरुः कोदण्डपाणिः कृपा-
कूपारो रचयत्यदः सपदि मज्जिह्वाग्रसिंहासनः ॥

एवं पूर्वस्मिन् काण्डे दीनजनरक्षणरूपो धर्मोऽनुष्ठापितः । अथ किष्किन्धाकाण्डे मित्रसंरक्षणधर्मोऽनुष्ठाप्यते । पूर्वस्मिन् काण्डे मोक्षप्रदत्व-रूपं परत्वचिह्नमुपदर्शितम् । अत्रासंख्येयगुणगणाकरत्वं प्रतिपाद्यते । वस्तुतस्तु प्रथमे काण्डे श्रीमत्त्वं प्रणवोदीरितमुक्तम् । द्वितीये सर्वजनव्या-मोहविषयत्वोक्त्या नारायणशब्दार्थः । तृतीये पञ्चवटीवासपर्यन्तवृत्तान्तेन मुनिजनकैङ्कर्योक्त्या नमःशब्दार्थ उक्तः । अथ मारीचदर्शनवृत्तान्तमारभ्य चेतनोज्जीवनप्रकारः प्रदर्श्यते ।

* * * *

सतामित्यादि । पद्मोत्पलझषैः कमलेन्दीवरमत्स्यैः आकुलां तां पम्पा-ख्यां पुष्करिणीं सरसीं गत्वा मुखनयनकटाक्षविशेषवत्याः कान्तायाः स्मार-

कत्वेन व्याकुलेन्दियः मोहं प्रसादं च प्राप्तः स रामः तादृशधैर्यविशिष्टोऽपि सौमित्रिसहित आश्वासकान्तरपुरुषसहितोऽपि विललाप ।

End:

उद्घातसमूहः पान्थहीनः पान्थसमूहहीनः अभूदिति शेषः । वेगसमाहितात्मा वेगविषये समर्पितमनाः । मनः समाधाय मनः समाहितं कृत्वा ॥

Colophon:

इति श्रीगोविन्दराजस्य कृतौ श्रीरामायणव्याख्याने श्रीमुक्ताहाराख्याने सप्तषष्टितमः सर्गः ॥

इत्थं शठारिगुरुवर्यपदारविन्द-
सेवारसाविर्भ(धिग)तसर्वरहस्यबोधः ।
गोविन्दराजविबुधः प्रमुदे बुधानां
कैष्किन्धकाण्डविषयां विततान टीकाम् ॥

R. No. 1018.

Śrītālā. 14×1⅝ inches. Foll. 178. Lines, 10 in a page. Grantha. Good.

Purchased in 1913–14 from M.R.Ry. T. P. V. Rāghavācāriyar of Srirangam.

रामायणव्याख्या—रामानुजीया.

RĀMĀYAṆAVYĀKHYĀ: RĀMĀNUJĪYĀ.

Same work as that described under No. 1886 of the D.C.S. MSS., Vol. IV, Part I.

Wants the beginning in the Ayōdhyākāṇḍa and breaks off in the second Sarga of the Āraṇyakāṇḍa.

R. No. 1019.

Śrītāla. 15×2⅜ inches. Foll. 38. Lines, 11 in a page. Grantha. Slightly injured.

Purchased in 1913–14 from M.R.Ry. T. P. V. Rāghavācāriyar of Srirangam.

Fol. 1*a* gives a few miscellaneous stanzas regarding पाञ्चरात्र.

बृहद्ब्रह्मसंहिता.

BṚHADBRAHMASAṀHITĀ.

This is a Saṁhitā of the Pāñcarātrāgama and the subjects dealt herein are apparent from the names of the Adhyāyas given below :—

१. संप्रदायप्रवृत्तिकथन.
२. सुदर्शनवरदानगीता.
३. श्रीवत्सयोगप्रभाव.
४. रहस्योपदेश.
५. पिशाचत्वमोचन.
६. अष्टाक्षरमन्त्रमहिमा.
७. वैष्णवधर्मकथन.
८. महालक्ष्म्याराधन.
९. महालक्ष्मीव्रताभिधान.

Contains the first nine Adhyāyas complete.

This manuscript is said to have belonged to Paravastu Raṅgācāriyar of Srirangam.

Beginning:

ज्ञानानन्दस्वरूपाय कल्याणगुणराशये ।
प्रपन्नपारिजाताय सिन्धुजापतये नमः ॥
एकदा मन्दरद्रोण्यामासीनः कमलासनः ।
द्वयमावर्तयन्मौनी वैष्णवं रूपमुद्वहन् ॥
दिदृक्षवो महाभागा मुनयो नारदादयः ।
आगताः परया भक्त्या गायन्तो यज्ञपूरुषम् ॥

* * * *

ब्रह्मोवाच—

शृण्वन्तु पुत्रा वचनं मदीयं गोप्यं परं भूतहिताय सत्यम् ।
कर्ता न चाहं जगतो भवन्तो विमोहिता दुस्तरयाजया हि ॥

* * * *

श्रीवत्सकौस्तुभौ नित्यौ हृत्कण्ठनिलये स्थितौ ।
को विशेषोऽनयोः पार्श्वे प्रभारूपेण वर्तते ॥

शरीरे ते महाराज तिष्ठन्ति ह्यनपायिनः ।
अहं च भगवन्नाथ हृदयैकनिकेतना ॥
यथा ज्ञातास्मि भगवन्नेतन्मह्यं समादिश ॥

Colophon:

इति पाञ्चरात्रे महोपनिषदि बृहद्ब्रह्मसंहितायां ब्रह्मनारदसंवादे संप्रदायप्रवृत्तिकथनं नाम प्रथमोऽध्यायः ॥

End:

तस्मिन् सिंहासने देव्या यन्त्रं संचिन्तयेन्मुदा ।
* * * *
एवं विचिन्त्या जलजातकृताधिवासां
वैकुण्ठनाथरमणीमनुनीय वाचः ॥
. . . कुसुमावलिना सखीभिः
सीमन्तिनीभिरभितः परितोषणीया ॥

Colophon:

इति पाञ्चरात्रे महोपनिषदि बृह(द्ब्रह्मसंहि)तायां श्रीवत्सचरिते महालक्ष्मीव्रताभिधानं नाम नवमोऽध्यायः ॥

श्रीनारायणः—

R. No. **1020.**

Palm-leaf. 15¼ × 1½ inches. Foll. 21. Lines, 6 in a page. Grantha Injured.

Purchased in 1913–14 from M.R.Ry. T. P. V. Rāghavācāriyar of Srirangam.

(*a*) गरुडपञ्चाक्षरीकल्पः.

GARUḌAPAÑCĀKṢARĪKALPAḤ.

Foll. 1*a*—9*b*.

Similar to the work described under No. 7810 of the **D.C.S.** MSS., Vol. XV.

Complete.

(*b*) श्रीसूक्तविधानम्.

ŚRĪSŪKTAVIDHĀNAM.

Foll. 10*a*—16*a*. Fol. 16*b* is left blank.

On the mode of repeating the hymn in praise of the goddess Lakṣmī, the repetition whereof is held to enable a person to remove all kinds of annoyances and troubles, to accomplish all his desires and to obtain wealth and prosperity.

Beginning:

लक्ष्मीसूक्तजपविधानम्—

आदौ षोडशवारमघमर्षणम् । ततो देवनागारे शुचिप्रदेशे वा पद्मासन उपविश्य गुर्वादीन् नमस्कृत्य देशकालौ संकीर्त्य मम समस्तक्लेशनिवारणार्थं सकलमनोरथसिद्धिपूर्वकमहदैश्वर्यप्राप्तिकामः श्रीमहालक्ष्मीप्रीत्यर्थं श्रीसूक्तजपमहं करिष्ये—अस्य श्रीहिरण्यवर्णामिति पञ्चदशर्चस्य सूक्तस्य

* * * *

सकलसंपत्प्राप्त्यर्थं श्रीसूक्तजपे विनियोगः ।

End:

मुक्ताफलानि नारङ्गीफलानि स्तोत्रपूर्वकम् ।
वीजयुक्तेन मन्त्रेण होमः सर्वफलप्रदः ॥

Colophon:

इति मुक्तावल्यां श्रीसूक्तविधानं समाप्तम् ॥

(*c*) अम्बिकाकवचः.

AMBIKĀKAVACAḤ.

Size, 10 × 1 inches. Foll. 17*a*—21*b*.

Addressed to the goddess Ambikā or Pārvatī for securing one's protection.

Beginning:

जयेश्वर्यग्रतः पातु पृष्ठतो विजयेश्वरी ।
अजिता वामतः पातु दक्षिणां मेऽपराजिता ॥
ब्राह्मणी पातु केशाग्रं शिवा पातु शिरो मम ।
अम्बिका मेऽलिकं (पातु) मुखं है(म)वती तथा ॥

End:

अथर्वणधनुर्धारिणी सर्वमन्त्रा स्त्रीयोगबलपराक्रमशालिनी ॥
ध्यायेत्कालाभनीलां विपलितवदनां काकनासां विकर्णी
संमार्जन्युल्कशूर्पे धृतमुसलकरां वक्रदन्तां विषान्धाम् ।
ज्येष्ठां निर्वाणवेषां प्रकटितनयनामूर्ध्वकेशामुदारां
शु . . स्तनभरयुगलां निष्कृपां शत्रुहन्त्रीम् ॥

R. No. 1021.

Palm-leaf. 17 × 1½ inches. Foll. 110. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1913–14 from M. R. Ry. Śēṣādryācārya of Kumbakonam.

रामायणतत्त्वदर्पणः.

RĀMĀYAṆATATTVADARPAṆAḤ.

A treatise bringing out certain important inner truths culled out from the Rāmāyaṇa. The particular subjects dealt herein are evident from the titles of the Prakāśas which are given below.

Begins in the second Prakāśa and breaks off in the 14th Prakāśa.

१. रामायणस्य वेदस्वरूपत्वादिकथनम्.
२. विभीषणशरणागत्यादिनिरूपणम्.
३. रामस्य परब्रह्मत्वादिकथनम्.
४. रामस्य नारायणस्वरूपत्वादिकथनम्.
५. रामस्य सर्वमुक्तिप्रदातृत्वकथनम्.
६. रामस्य मनुष्यत्वनिराकरणम्.
७. रामस्य नियोज्यत्वनिरासनिरूपणम्.
८ रामस्य परमपवित्रत्वकथनम्
९. रामस्य कल्याणगुणस्वरूपनिरूपणम्.
१०. रामोपासनकथनम्.
११. नवविधभक्तिकथनम्.
१२. रामावतारनिरूपणम्.

Beginning:

ननु गायत्रीस्वरूपत्वं न संभवति, किं तु वेदस्वरूपत्वमेव । कुतः ? 'वेदोपबृंहणार्थाय तावग्राहयत् प्रभुः' 'इति, रामायणं वेदसंज्ञं श्राद्धेषु श्रावयेद्बुधः' इति ।

* * * *

स्कान्दवचनेन च तस्य वेदस्वरूपत्वेन वेदावतारत्वेन च बहुधा उपपादितत्वादिति चेत् सत्यम्, गायत्र्या वेदोपादानतया तेषां तद्विस्तरत्वेन मृद्घटयोरिव तयोरत्यन्ताभेदाभिप्रायेण तथा कथनं न दोषाय ॥

* * * *

Colophon:

इति श्रीरामायणतत्त्वदर्पणे रामायणस्य वेदस्वरूप(त्वा)दिकथनं नाम द्वितीयः प्रकाशः ॥

End:

'इत्युक्त्वा पायसे साक्षात्प्रविष्टोऽन्तरधीयत' इति । एवं विरोधाभावात्पायसमपरिच्छिन्नविष्णुस्वरूपम् । तस्माद्रामः परिपूर्णो न जात इति सर्वं रमणीयम् ॥

Colophon:

इति श्रीमद्रामायणतत्त्वदर्पणे अवतारनिरूपणं नाम त्रयोदशः प्रकाशः ॥

प्राक् यदुपवर्णितमनेकस्त्रीसमवेतत्वं तदेव विशेषतो निरूपयितुमाह— हृष्टा इत्यादिना ।

हृष्टाः खलु भविष्यन्ति रामस्य परमाः स्त्रियः ।

* * * *

अपि शापादहं घोरां प्रविष्टो राक्षसीं तनूम् । इत्यादिना ॥

R. No. **1022.**

Palm-leaf. 13¼ × 1⅛ inches. Foll. 151. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1913-14 from M. R. Ry. Śēṣādryācārya of Kumbakonam.

The first fol. contains a few stanzas in praise of God Śiva.

(*a*) शीतलास्तोत्रम्.

ŚĪTALĀSTŌTRAM.

Foll. 2*a*—3*b*.

Same work as that described under No. 7397 of the D.C.S. MSS., Vol. XIV.

Complete.

(*b*) शिवरहस्यसंग्रहः.

ŚIVARAHASYASAṀGRAHAḤ.

Foll. 4*a*—151*a*. Foll. 27*b*, 130*b* and 141*b* are left blank.

A work purporting to be a summary of the truths relating to Śaivism contained in the various Aṁśas of the Śivarahasya, which work is differeut from the Śivarahasyakhaṇḍa of the Skāndapurāṇa.

Contains the first six Aṁśas, but wants the end of the first Aṁśa.

Beginning :

गात्रे कलत्रे पुत्रे वा मित्रे वा स्नेहवर्जिताः ।
विरक्तास्तद्वदास्मभ्यं रहस्यं शाम्भवं मुदा ॥
पथ्यं शैवरहस्यसारमधुना पेपीयतां मुक्तये
पञ्चास्यध्यानपूता द्विजवरतिलकाः पञ्चपापैर्विहीनाः ।
वेदेषु प्रथितं च पञ्चकतया भूतेषु पञ्चस्वपि
कोशे पञ्चकतोऽ(न्ति)मैकवसतेः शम्भोः कृपा कारणम् ॥

* * * *

हरिन्मणिकृतं वरं हरितगोपुरं पश्चिमे
विराजिततलाङ्कणैर्वृषललामशृङ्गप्रभैः ।

हरिन्मणिरसप्रभावितरत्नसौधोत्तमं
वरप्रकरसुन्दरप्रकटवप्रप्राकारकम् ॥

परदेवतावर्णनम् ॥

* * * *

Beginning of the second Aṁśa—

अगजाननपाथोजविकासनदिवाकरम् ।
विघ्नाद्रिकुलिशं श्रीमद्गेशं (द्गणेशानं) नमाम्यहम् ॥
अग्निरित्यादिभिर्मन्त्रैर्विभूत्युद्धूलनं तथा ।
त्रियम्बकैश्च गिरिजे भस्मनाप्यवगुण्ठनम् ॥

* * * *

Colophon:

इति श्रीशिवरहस्ये द्वितीयांशश्लोकसारसंग्रहः समाप्तः ॥

End:

तस्य प्रीतिकरं साक्षाद्बिल्वैर्लिङ्गस्य पूजनम् ।
तस्य भक्त्यैव सर्वेषां मोचनं भवपाशतः ॥

* * * *

तस्य प्रीतिकरं साक्षात् तन्नाम्नां स्मृतिरेव हि ।
एतावच्छैवधर्मं हि शम्भोः प्रियकरं महत् ॥

Colophon:

षष्ठांशश्लोकसंग्रहः समाप्तः ॥

R. No. 1023.

Palm-leaf. 17¼ × 1⅝ inches. Foll. 93. Lines, 8 in a page. Grantha. Injured.

Purchased in 1913–14 from M. R. Ry. Śēṣādryācārya of Kumbakonam.

भवानन्दीयव्याख्या—सर्वोपकारिणी.

BHAVĀNANDĪYAVYĀKHYĀ : SARVŌPAKĀRIṆĪ.

A short commentary by Mahādēva on Bhavānanda's commentary on the Dīdhiti of Raghunāthaśirōmaṇi. The commentary here given is stated to be shorter than another on the same work by the same author.

Contains the Anumānakhaṇḍa which breaks off in the Siddhāntalakṣaṇa.

Beginning:

त्रिपुरारातिपादाब्जनखचन्द्रसमुद्गताः ।
कान्तयः शुभदाः सन्तु ममाज्ञानतमोभिदः ॥
यदालम्बनतो मूर्खस्तार्किकाणां धुरंधरः ।
बुधो भवति तं वन्दे गुरुं श्रीकण्ठदीक्षितम् ॥
भवानन्दकृता व्याख्यानुमानमणिदीधितेः ।
व्याख्यायते निगूढार्था महादेवेन तत्त्वतः ॥
भ(भा)वानन्दीप्रकाशस्तु वस्तुतो रचितो मया ।
अतः संक्षेपतः कुर्वे व्याख्या(ख्यां) सर्वोपकारिणी(म्) ॥

प्रारिप्सितनिर्विघ्नपरिसमाप्तिकामनया कृतं गुरुनमस्काररूपं मङ्गलं [वि]शिष्यशिक्षायै निबध्नंश्चिकीर्षितं प्रतिजानीते—नमस्कृत्येति । सारमिति निगूढमित्यस्य विशेष्यम् । ननु परमात्मन इत्यत्र नमस्कार्यतावच्छेदकतयोपात्तं परमत्वं न परममहत्परिमाणवत्त्वम्, तस्यातिप्रसक्ततया नमस्कार्यतावच्छेदकत्वासंभवात् । अत आह – सर्वोत्कृष्टात्मन इति ।

* * * *

Colophon:

इति श्रीमहादेवविरचितायां सर्वोपकारिण्यां भवानन्दी(य)व्याख्यायां संगतिग्रन्थः समाप्तः ॥

End:

आहुरिति । तेन लघुरूपेण साध्यतानवच्छेदकत्वघटितलक्षणं विहाय प्रतियोगिताधर्मिकोभयाभावघटितलक्षणकरणेन । प्रामादिक इति । न च सद्धेतौ व्याप्तिभ्रमादनुमित्युदयेन तत्र एतादृशज्ञानस्य हेतुतया न प्रामादिकत्वमिति वाच्यम्, वास्तवव्याप्त्याभिप्रायेण प्रामादिक(त्व)स्योक्तत्वात् । अव्याप्यवृत्तिसाध्यक इति ।

R. No. **1024.**

Palm-leaf. 16 × 1¾ inches. Foll. 61. Lines, 11 in a page. Grantha. Injured.

Presented in 1913–14 by M.R.Ry. Śēṣādryācārya of Kumbakonam.

Foll. 40*b*, 41*a*, 50 to 54 and 61*b* are left blank.

मीमांसाकौस्तुभः.

MĪMĀṂSĀKAUSTUBHAḤ.

By Khaṇḍadēva. Same work as that described under No. 4445 of the D.C.S. MSS., Vol. IX.

Contains the second Pāda and two Sūtras of the fourth Pāda in the first Adhyāya and twelve Sūtras of the third Pāda in the third Adhyāya.

R. No. **1025.**

Palm-leaf. 17 × 1¼ inches. Foll. 238. Lines, 6 in a page. Grantha. Injured.

Presented in 1913–14 by M.R.Ry. Śēṣādryācārya of Kumbakonam.

Fol. 1 gives the contents of the manuscript.

(*a*) **स्तोत्ररत्नभाष्यम्.**

STŌTRARATNABHĀṢYAM.

Foll. 2*a*—131*b*.

By Vēdāntadēśika. Same work as that described under R. No. 317 *ante*.

Complete.

(*b*) रहस्यरक्षा.

RAHASYARAKṢĀ.

Foll. 132*a*—209*a*. Fol. 209*b* is left blank.

By Vēdāntadēśika. Same work as that described under No. 5348 of the D.C.S. MSS., Vol. XI.

Gadyatrayādhikāra complete.

(*c*) गीतार्थसंग्रहरक्षा.

GĪTĀRTHASAṄGRAHARAKṢĀ.

Foll. 210*a*—238*b*.

By Vēdāntadēśika. Same work as that described under No. 4881 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **1026.**

Palm-leaf. 16×1¼ inches. Foll. 131. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Kastūri Raṅgācārya of Mannargudi.

भागवतव्याख्या—शुकपक्षीया.

BHĀGAVATAVYĀKHYĀ: ŚUKAPAKṢĪYĀ.

By Sudarśanasūri. Same work as that described under No. 2228 of the D.C.S. MSS., Vol. IV, Part I

Contains the Skandhas seven to twelve complete.

R. No. **1027.**

Palm-leaf. 18×1⅝ inches. Foll. 77. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Kastūri Raṅgācārya of Mannargudi.

दयाशतकम्—सव्याख्यानम्.

DAYĀŚATAKAM WITH COMMENTARY.

The text is by Vēdāntadēśika and the commentary by Rāmānujācārya. The text and the commentary are the same as

those described under Nos. 10000 and 10012, respectively, of the D.C.S. MSS., Vol. XVIII.

Complete.

On the last fol. the name of the former owner of the manuscript is stated to be Cakravarti Śrīnivāsan.

End:

दीनालम्बनदिव्यदम्पतिदयायाः कल्लोलकोलाहलं तरङ्गकलकलं क्षाम्यति सहते न कापि क्षाम्यतीत्यर्थः, तिरस्करोतीति यावत्। आलम्बनपदं नित्यनपुंसकम्। श्रीनिवासत्वात् दिव्यदम्पतीत्युक्तिः॥

R. No. **1028.**

Palm-leaf. 17¾ × 1½ inches. Foll. 104. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1913–14 from M.R.Ry. Kastūri Raṅgācārya of Mannargudi.

(*a*) **कठवल्ल्युपनिषत्प्रकाशिका.**

KAṬHAVALLYUPANIṢATPRAKĀŚIKĀ.

Foll. 1*a*—41*b*. Fol. 42 is left blank.

A commentary on the Kaṭhavallyupaniṣad written by Raṅgarāmānujamuni in accordance with the views of the Viśiṣṭādvaita school of the Vēdānta expounded by Rāmānuja.

Complete.

Beginning:

येनोपनिषदां भाष्यं रामानुजमतानुगम्।
रम्यं कृतं प्रपद्ये तं रङ्गरामानुजं मुनिम्॥

अतसीगुच्छसच्छायमञ्चितोरःस्थलं श्रिया।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम्॥

व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि।
व्याख्यास्ये विदुषां प्रीत्यै कठवल्लीर्यथामति॥

उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ । उशन् कामयमानः 'वश कान्तौ इत्यस्माच्छतरि 'ग्रहिज्या'—इत्यादिना संप्रसारणम् । हवै इति वृत्तार्थस्मरणार्थौ निपातौ । फलमिति शेषः । वाजश्रवसः वाजेनान्नेन दानादिकर्मभूतेन श्रवः कीर्तिर्यस्य स वाजश्रवाः, तस्यापत्यं वाजश्रवसः । रूढिर्वा वाजश्रवस इति । स किल ऋषिर्विश्वजिता सर्वस्वदक्षिणेन यजमानः तस्मिन् क्रतौ सर्ववेदसं सर्वस्वं ददौ दत्तवानित्यर्थः ।

End:

यथा बुद्धेरात्मा महान् पर इत्यत्रात्मशब्दसामानाधिकरण्यान्न तन्त्रसिद्धं महत्तत्वं गृह्यते एवमव्यक्तमपि आत्मनः परत्वेनाभिधानात् न कापिलतन्त्रसिद्धं गृह्यत इति स्थितम् । अत इयमुपनिषत्सर्वापि परमात्मपरेति त्रिभिरधिकरणैर्निर्णीतम् ॥

क्षेमाय यः करुणया क्षितिनिजराणां
भूमावजृम्भयत भाष्यसुधामुदारः ।
वामागमाध्वगवदावदतूलवातो
रामानुजः स मुनिराद्रियतां मदुक्तिम् ॥

Colophon:

इति रङ्गरामानुजमुनेः कृतिषु कठवल्ल्युपनिषत्प्रकाशिका समाप्ता ॥

यतीन्द्रकृतभाष्यार्था यद्व्याख्यानेन दर्शिताः ।
व्यासं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम् ॥
येनोपनिषदां भाष्यं(. . . .) रङ्गरामानुजं मुनिम् ॥

(*b*) तैत्तिरीयोपनिषत्प्रकाशिका.

TAITTIRĪYŌPANIṢATPRAKĀŚIKĀ.

Foll. 43*a*—91*a*. Fol. 91*b* is left blank.

By Raṅgarāmānujamuni. Same work as that described under No. 513 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(c) कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Foll. 92*a*—97*b*.

Same work as that described under No. 334 of the D.C.S. MSS., Vol. I, Part III.

Complete.

The remaining foll. are left blank.

R. No. **1029.**

Palm-leaf. 11 × 1¾ inches. Foll. 37. Lines, 8 in a page. Grantha and Tamil. Much injured.

Purchased in 1913-14 from M.R.Ry. Kastūri Raṅgācārya of Mannargudi.

(a) अधिकारसङ्ग्रहदीपिका.

ADHIKĀRASAṄGRAHADĪPIKĀ.

Foll. 1*a*--29*b*.

By Raṅgācārya. Same work as that described under R. No. 1008 *ante*.

Complete.

(b) अधिकारसङ्ग्रहदीपिका.

ADHIKĀRASAṄGRAHADĪPIKĀ.

Foll. 30*a*—37*b*.

Same work as the above.

Incomplete.

R. No. **1030.**

Palm-leaf. 14⅜ × 1½ inches. Foll. 35. Lines, 10 in a page. Grantha. Injured.

Purchased in 1913-14 from M.R.Ry. Kastūri Raṅgācārya of Mannargudi.

The first two foll. are left blank.

(a) गीतार्थसङ्ग्रहरक्षा.

GĪTĀRTHASAṄGRAHARAKṢĀ.

Foll. 3*a*—18*b*.

By Vēdāntadēśika. Same work as that described under No. 4880 of the D.C.S. MSS., Vol. X.

Complete.

(*b*) अष्टश्लोकी—सव्याख्या.

ASṬAŚLŌKĪ WITH COMMENTARY.

Foll. 19*a*—28*a*. Fol. 28*b* is left blank.

The text is by Parāśarabhaṭṭāraka and the commentary by Śrīvatsāṅka Nārāyaṇamuni. The author states that he collects in one place here the meanings of stanzas and words of this hymn explained by Vēdāntācārya in his Rahasyatrayasāra and various other works.

Complete.

Beginning :

श्रीपराशरभट्टार्यः(. . . .) श्रेयसे मेऽस्तु भूयसे ॥

स्वयं व्यक्ते रङ्गधाम्नि तल्पे वातूलतूलके ।
प्रादुर्भूतौ प्रपद्येऽहं दंपती जगतां पती ॥
तत्त्वोपायपुमर्थानां व्यक्त्यै भट्टपराशरैः ।
अष्टश्लोकीं विरचितां व्याकरोमि यथामति ॥

परमकारुणिकैर्भट्टपराशरैः शब्दादिविषयमोहार्णवमग्नानां संसारिणामुज्जीवनार्थं रहस्यत्रयस्य तत्त्वहितपुरुषार्थप्रतिपादकत्वप्रकारः श्रीमदष्टश्लोक्या प्रदर्शितः । यद्यपि वेदान्ताचार्यैः श्रीरहस्यत्रयसारादिषु तत्र तत्रास्पष्टश्लोकपदतात्पर्यं विप्रकीर्णं प्रतिपादितमिति तत्र वक्तव्यं नावशिष्यते, तथापि बुद्धिसौकर्यार्थं तदेव तात्पर्यमेकत्र लिख्यते । श्रीमदष्टाक्षरमन्त्रः द्वयं चरमश्लोकश्चेत्येतत् रहस्यत्रयमित्युच्यते ।

* * * *

अकारार्थ इति—

अकारार्थो विष्णुः(. . . .) मर्थं समदिशत् ॥

त्रयीसारः ऋग्वेदादिरूपायास्त्रयीविद्यायाः सार इत्यर्थः ।

End:

तुशब्दश्चशब्दार्थकः । निर्भयश्चास्मीति भावः । अत्राकारार्थायैवेशानां जगतां मत्प्राप्त्यर्थतया इति त्रिभिः श्लोकैः रहस्यार्थः संग्रहेण सम्यक् प्रदर्शितः ॥

अष्टश्लोक्यां तृतीयो यः पञ्चमो यश्च सप्तमः ।
तेषां त्रयाणां तत्त्वेन प्राज्ञा जानन्ति वैभवम् ॥
भट्टपराशररचितामष्टश्लोकीमुदारगम्भीराम् ।
श्रीवत्साङ्कमुनीन्द्रः श्रुत्वा भक्त्या चकार तट्टीकाम् ॥
यदिह रहस्यं विवृतं यद्वा न्यूनं वचोऽधिकं यद्वा ।
कृपया यदिदं सर्वं देवः क्षमतां तथा महान्तोऽपि ॥

Colophon:

इति सर्वतन्त्रस्वतन्त्रस्य श्रीपरमहंसपरिव्राजकाचार्यस्य श्रीवत्साङ्कश्रीमन्नारायणमुनीन्द्रस्य कृतिषु रहस्यटीका संपूर्णा ॥

(*c*) न्यासविंशतिव्याख्या.

NYĀSAVIṀŚATIVYĀKHYĀ.

Foll. 29*a* – 34*a*.

A commentary on Vēdāntadēśika's Nyāsaviṁśati which consists of twenty stanzas relating to Prapatti or self-surrender to God as a means of attaining salvation.

Complete.

Beginning:

श्रीमान् वेङ्कटनाथार्यः (. . .) संनिधत्तां सदा हृदि ॥
श्रुतिस्मृत्यादितात्पर्यनिरूढा न्यासविंशतिः ।
स्वयं व्याक्रियतेऽस्माभिर्दिङ्मात्रेण सदिच्छया ॥

प्रपत्त्याद्यपरपर्यायां न्यासविद्यां संजिघृक्षुः प्रथमं तत्त्वज्ञानादिमुखेन तदधिकारहेतुभूतमाचार्यसंग्रहणमाह—सिद्धमिति । एतेषामाचार्यगुणानां प्रमाणानि ‘ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ’ इत्यादीनि द्रष्टव्यानि ।

End :

उपायान्तरनिष्पादनाद्यनुगुणज्ञानशक्त्यादिविरहान्निर्विण्णः स्वशक्यस्तुतिकर्तव्यलघूपायपरामर्शप्रत्यवस्थापितः फलसंगकर्तृत्वत्यागयुक्तसाङ्गभरन्यासेन कृतकृत्यः स्वीकृतभरं श्रियः पतिमवलोक्य निर्भरो निर्भयश्च स्वयंप्रयोजनकैंकर्येण सुखं वर्तेतेति ॥

The remaining leaves are left blank.

R. No. **1031.**

Palm-leaf. 17¼ × 1⅜ inches. Foll. 167. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1913-14 by M.R.Ry. Kastūri Raṅgācārya of Mannargudi.

Fol. 1*a* gives the name of the first work as Pādukāsahasram and 1*b* is left blank. Foll. 2*a*—4*b* contain some stanzas in praise of goddess Lakṣmī. Fol. 5*a* is left blank. Fol. 5*b* gives the name of the former owner of the MS. as ' Raṅganna '.

(*a*) **पादुकासहस्रम्.**

PĀDUKĀSAHASRAM.

Foll. 6*a*—76*b*.

By Vēdāntadēśika. Same work as that described under No. 10571 of the D.C.S. MSS., Vol. XIX.

Complete.

Fol. 77 gives the number of stanzas in each of the Paddhatis of the above work.

(*b*) **लक्ष्मीसहस्रम्.**

LAKṢMĪSAHASRAM.

Foll. 78*a*—160*b*.

By Vēṅkaṭācārya. Same work as that described under No. 733 *ante*.

Complete.

Fol. 161*a* gives the number of stanzas in each of the Stabakas in the Lakṣmīsahasra. Fol. 161*b* is left blank.

(*c*) पेरुन्देवीस्तोत्रम्.

PERUNDĒVĪSTŌTRAM.

Foll. 162*a*—167*b*.

Same work as that described under No. 11424 of the D.C.S. MSS., Vol. XIX.

Contains 93 stanzas.

R. No. 1032.

Palm-leaf. 16¼ × 1½ inches. Foll. 74. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1913-14 by M.R.Ry. Kastūri Raṅgācārya of Mannargudi.

रहस्यरक्षा.

RAHASYARAKṢĀ.

By Vēdāntadēśika. Same work as that described under No. 5348 of the D.C.S. MSS., Vol. XI.

Complete in three Adhikāras.

R. No. 1033.

Palm-leaf. 17 × 1¼ inches. Foll. 61. Lines, 5 in a page. Telugu. Much injured.

Purchased in 1913–14 from M.R.Ry. V. Rāmacandra Rao of Samalkot in the Godavari district.

आश्वलायनस्मृतिः.

ĀŚVALĀYANASMṚTIḤ.

A treatise in Dharma-Śāstra attributed to Āśvalāyana and dealing with the various duties, ceremonies and observances of a twice-born which are considered to enable him to reach the celestial world.

To the end of Karmavidhiprakaraṇa.

Beginning:

आश्वलायनमाचार्यं नत्वापृच्छन् मुनीश्वराः ।
द्विजधर्मान् वदास्माकं स्वर्गप्राप्तिकरान् मुने ॥
इति तद्वचनं श्रुत्वा स धर्मान् मुनिरब्रवीत् ।
लोकस्य च हितार्थाय ब्राह्ममार्गरतस्य च ॥
स्नानं सन्ध्या जपो होमः स्वाध्यायाभ्यसनं तथा ।
माध्याह्नि(क)क्रियाः पञ्च यज्ञाश्चातिथिपूजनम् ॥
दानं शिष्टप्रतिग्राहं पोष्यवर्गसहाशनम् ।
सत्कथाश्रवणं सायं सन्ध्या होमादिकं तथा ॥
शयनं च यथाकालं धर्मपत्न्या गृही सदा ।
ब्रह्मचारी स्वधर्मस्थो गुरुसेवापरो वसेत् ॥

* * * *

Colophon:

इत्याश्वलायनस्मृतौ ब्राह्ममार्गाचाराध्यायः समाप्तः ॥

End:

द्वादशाहमनाग्निस्तु सन्ध्याहीनो दिनत्रयम् ।
चतुर्वेदविदो विप्रः शूद्र एव न संशयः ॥

Colophon:

इत्याश्वलायनस्मृतौ कर्मविधिप्रकरणम् ॥

R. No. **1034.**

Palm-leaf. 16 × 1½ inches. Foll. 26. Lines, 9 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. V. Rāmacandra Rao of Samalkot.

(*a*) पुष्पबाणविलासः—सव्याख्यः.

PUṢPABĀṆAVILĀSAḤ WITH COMMENTARY.

Foll. 1*a*—23*b*.

A collection of erotic stanzas. The commentary is called Śṛṅgāracandrikā. In a Telugu edition of the work the name of the commentator is given in the colophon as Vēṅkaṭarāyāpaṇḍita.

Breaks off in the 21st stanza.

Beginning:

श्रीमद्गोपवधूस्वयंग्रहपरिष्वङ्गेषु तुङ्गस्तन
व्यामर्दाद्गलितेऽपि चन्दनरजस्यङ्गे वहन् सौरभम् ।
कश्चिज्जागरजातरागनयनद्वन्द्वं प्रभाते श्रियं
बिभ्रत्कामपि वेणुनादरसिको जाराग्रणीः पातु नः ॥

अङ्गप्रभाभिराभीरस्त्रीणां मुदमुदश्चयन् ।
श्रेयसे भूयसे भूयाद्गोपीगोपालबालकः ॥

पुष्पबाणविलासस्य काव्यस्य रसशालिनः ।
शृङ्गारचन्द्रिकाभिख्यां व्याख्यां विरचयाम्यहम् ॥

अथ कविर्गोपिकावल्लभचरित्रप्रतिपादनपवित्रितपुष्पबाणविलासाख्यं काव्यं चिकीर्षुरादौ मङ्गलत्वादाशिषं प्रयुङ्क्ते—श्रीमदिति । अत्र प्रथमं भूदेवताकस्य मगणस्य प्रयोगात् कर्तुरध्येतृणां च शुभं भवति ।

End:

अस्यास्तनुत्वं क(म्प)श्च पाण्डिमा बाष्पनिर्गमः ।
निर्वेदश्वासदैन्याद्या अनुभावा भवन्त्यमी ॥ १० ॥

इति लक्षणात् ॥

तन्वी सा यदि गायति श्रुतिकटुर्वीणाध्वनिर्जायते
यद्याविष्कुरुते स्मितानि मलिनेवालक्ष्यते चन्द्रिका ।
आस्ते म्लानमिवोत्पलं नवमपि स्याच्चेत्पुरो नेत्रयो-
स्तस्याः श्रीरवलोक्यते यदि तटिद्वल्ली विवर्णैव सा ॥ २१ ॥

(*b*) तप्तमुद्राङ्कनप्रमाणसंग्रहः.
TAPTAMUDRĀṄKANAPRAMĀṆASAṄGRAHAḤ.

Foll. 24*a*—26*b*.

By Campakēśācārya. Similar to the work described under R. No. 526 *ante.* This work treats incidentally of Ūrdhvapuṇḍra also, which consists of a mark generally worn on the forehead by the devotees of Viṣṇu.

Incomplete.

Beginning:

श्रीरङ्गनगरीशाय भुजङ्गपतिशायिने ।
नारायणाय जगतां कारणाय नमो नमः ॥
ऊर्ध्वपुण्ड्रं तप्तचक्रं धार्यमित्येवमीदृशः ।
प्राचामाचार्यवर्याणां पक्षोऽयं परिपाल्यते ॥
धारणे तप्तचक्रस्याप्यूर्ध्वपुण्ड्रस्य संग्रहम् ।
प्रमाणानामहं कुर्वे चम्पकेशः सतां मुदे ॥
संक्षेपतः पूर्वपक्षाः सिद्धान्तश्चोच्यते मया ।
पूर्वोक्तविषये सम्यग्विदांकुर्वन्तु साधवः ॥

पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनोर्न तदामो अश्नुते श्रितास इद्वहन्तस्तत्समासत । इति श्रुतिः सकलजनपठ्यमाना सर्वेषां तप्तचक्रधारणा(णां)विदया(धा)ति ।

बाष्कलसंहितायाम्—

प्रि(धृ)ते विष्णो अब्जचक्रे पवित्रे जन्माम्भोधिं तत्तदेचर्षणीन्द्राः ।
काले बाह्वोर्दधतेऽन्ये पुराणाः लिङ्गान्यङ्के तावकान्य(न्व)यन्ति ॥ इति ।

अथर्वणे—एभिर्वयमुरुक्रमस्य चिह्नैरङ्किता लोके संभगो भवेम । ताद्विष्णोः ॥

R. No. 1035.

Palm-leaf. 17 × 1¼ inches. Foll. 9. Lines, 6 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. V. Rāmacandra Rao of Samalkot.

(*a*) नारायणशब्दनिर्वचनम्.

NĀRĀYAṆAŚABDANIRVACANAM

Foll. 1*a*– 4*b*.

Same work as that described under No. 5085 of the D.C.S. MSS., Vol. X.

Wants the first stanza; otherwise complete.

(*b*) नारायणशब्दनिर्वचनम्.

NĀRĀYAṆAŚABDANIRVACANAM.

Foll 5*a*—9*b*.

Same work as that described under R. No. 405 *ante*.

Incomplete.

R. No. **1036.**

Palm-leaf. 14½ × 1⅜ inches. Foll. 78. Lines, 8 in a page. Telugu. Fair.

Purchased in 1913–14 from M.R.Ry. V. Rāmacandra Rao of Samalkot.

गौतमीमाहात्म्यम्.

GAUTAMĪMĀHĀTMYAM.

On the holiness and religious importance of the river Gautamī.

From the middle of the 37th Adhyāya to the end of the 69th Adhyāya of the Gautamīmāhātmya forming part of the Brahmapurāṇa.

Beginning:

. . नासौ हरिरेव कोपेन हुतभुग्यथा ।
तस्मिन्नुत्तप्यमाने तु बुधपुत्रे महात्मनि ॥
जयशब्दश्च सर्वत्र आसीच्च सुरवेश्मनि ।
बुधपुत्रे समुत्पन्ने तत्राजग्मुः सुरेश्वराः ॥
अहमप्यगमं तत्र मुदा युक्तो महामते ।

* * * *

यस्मात्पुरू रवोऽन्वेति तस्मादेष पुरूरवाः ।
स्यादित्येवं नाम चक्रुर्बुधपूर्वाः सुरास्तदा ॥

* * * *

Colophon:

इति श्रीब्रह्मपुराणे गौतमीमाहात्म्ये इलाबुधपुरूरवोवसिष्ठसेश्वरादि-षोडशसहस्रतीर्थवर्णनं नाम सप्तत्रिंशोऽध्यायः ॥

End:

उभयत्र च विख्यानः संगमो लोकविश्रुतः ।
सरस्वतीसंगमश्च वाणीसंगम एव च ॥
गौतम्या संगता देवी वाणी सा च सरस्वती ।
सर्वत्र पूजितं तीर्थं तत्र वाचा शिवं प्रभुम् ॥

* * * *

दानहोमादिकं किंचिदुपवासादिकां क्रियाम् ।
यः कुर्यात्संगमे पुण्ये संसारे न भवेत्पुनः ॥

Colophon:

इति श्रीगौतमीमाहात्म्ये वाणीसंगमवागीश्वराद्येकोनविंशतितीर्थवर्णनं नामैकोनसप्ततितमोऽध्यायः ॥

R. No. **1037.**

Palm-leaf. $15\frac{1}{2} \times 1\frac{1}{8}$ inches. Foll. 22. Lines, 4 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. V. Rāmacandra Rao of Samalkot.

भरतार्णवः.

BHARATĀRṆAVAḤ.

By Nandikēśvara. Same work as that described under R. No. 354.

Breaks off in the fourth Adhyāya.

R. No. **1038.**

Palm-leaf. 16 × 1¼ inches. Foll. 9. Lines, 5 in a page. Telugu. Much injured.

Purchased in 1913-14 from M.R.Ry. V. Rāmacandra Rao of Samalkot.

The first two foll. are left blank.

काम्यवृषोत्सर्जनविधिः.

KĀMYAVṚṢŌTSARJANAVIDHIḤ.

Foll. 3*a*—6*b*.

On the performance of the religious ceremony of setting at large a bull with a view to benefit the manes of one's dead ancestors by securing everlasting stay in the Brahmalōka.

Complete.

The transcription of this manuscript is said to have been completed on the 6th day of the bright fortnight of Bhādrapada in the year Svabhānu.

Beginning:

प्राणानायम्य, एवंगुण (. . .) धर्मपत्नीसमेतस्य श्रीपरमेश्वरपुण्य- . . . . काम्यार्थं पितृणां शाश्वतब्रह्मलोकनिवाससिद्ध्यर्थं काम्यवृषोत्सर्जनाख्यं कर्म करिष्ये । आदौ निर्विघ्नं करिष्ये । गणपतिपूजां कृत्वा पुण्याहं वाचयित्वा प्राणानायम्य, मम श्रीपरमेश्वरप्रीत्यर्थं मम जन्माभ्यासाज्जन्मप्रभृति एतत्क्षणपर्यन्तं मया कृतानां सर्वेषां पापानामपनोदार्थं काम्यवृषोत्सर्जनाधिकारसिद्ध्यर्थं यथाशक्ति सर्वप्रायश्चित्तं करिष्ये ।

End:

तदभावे गोदानं वा कुर्यात् । ततश्चाचार्याय मण्डपदानं कुर्यात् । जापकेभ्यो दक्षिणाताम्बूलानि दत्त्वा तत आशीर्वचनम् । ब्राह्मणैर्बन्धुभिः स्वयं भुञ्जीतेत्याह भगवान् बोधायनः ॥

Colophon:

काम्यवृषोत्सर्जनविधिः समाप्तः ॥

The remaining leaves are left blank.

R. No. **1039.**

Palm-leaf. 14¼ × 1½ inches. Foll. 70. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. V. Rāmacandra Rao of Samalkot.

Wants the leaves numbered as 15, 29 and 49 to 53 in the middle. The fol. 40*b* is left blank.

कृष्णकर्णामृतम्—सुवर्णपात्रीसहितम्.

KṚṢṆAKARṆĀMṚTAM WITH SUVARṆAPĀTRĪ.

Same text as that described under No. 20 of the Report on a Search for Sanskrit and Tamil MSS., No. 2. The commentary named Suvarṇapātrī is by Pālaṅka Brahmābhaṭṭa.

Breaks off in the 93rd stanza of the second Śataka.

Beginning:

यस्यानुग्रहलेशेन मूको भवति पण्डितः ।
तं वन्दे दक्षिणामूर्तिं दलितार्तिं सतां सदा ॥
कर्णामृतानां कविवर्यलीलाशुकस्य संपर्करसोज्ज्वलानाम् ।
सुवर्णपात्रीं विबुधानुभूत्यै व्याख्यां करोत्यम्बुजजन्मनामा ॥

अथ तत्रभवान् लीलाशुकमुनिः कृष्णलीलाप्रतिपादकं काव्यं (चिकीर्षु)श्चिकीर्षिताविघ्नपरिसमाप्तये कृतं गुरुहरिनमस्काररूपं मङ्गलं निबध्नाति—

चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥

चिन्तामणिरिति । चिन्तामणिर्मणिविशेषः तद्वत् सकलार्थप्रदत्वादयमपि चिन्तामणिः । सोमगिरिर्नाम गिरिसंप्रदायप्रवर्तकः संन्यासी मम गुरुर्जयति सर्वोत्कर्षेण वर्तते । धातूनामनेकार्थत्वादत्र गुर्वाद्युत्कर्षप्रतिपाद-

केन जयतिपदेन तन्नमस्कारो लक्ष्यते। शिक्षागुरुः सर्वान्तर्यामित्वेन शिक्षकः शिखिनो मयूरस्य पिञ्छं बर्हं मौलौ शिरसि यस्य सः तथोक्तः, भगवान् षड्गुणैश्वर्यसंपन्नः श्रीकृष्ण इत्यर्थः ।

Colophon :

श्रीमल्लोहितगोत्रदिव्यमणिना व्याख्यातमाद्यं मुहु-
र्न्यग्रोधाङ्घ्रिपमूलवासिचरणद्वन्द्वानतिं कुर्वता ।
ब्रह्माभट्टबुधोत्तमेन शतकं कर्णामृतानां मह-
च्छ्लोकैर्द्वादशभिस्तदु(नः) परियुतं श्रीकृष्णसंप्रीतये ॥

इति श्रीमत्पालङ्कब्रह्माभट्टकृते कर्णामृतव्याख्याने सुवर्णपात्रीसमाख्याने द्वादशोत्तरमाद्यशतकं संपूर्णम् ॥

End :

मुरारिणो (णा) वारिविहारकाले मृगेक्षणानां मुषितांशुकानाम् ।
करद्वयं वा कचसंहतिर्वा प्रमीलनं वा परिधानमासीत् ॥ १३ ॥

मुरारिणेति । वारिविहारकाले जलक्रीडासमये मुरारिणा कृष्णेन मुषितांशुकानां चौर्यगृहीतवस्त्राणां मृगस्येक्षणे इव ईक्षणे अक्षिणी यासां तासां करद्वयं वा करयोर्द्वयं वा ; वाशब्दः समुच्चये ; करद्वयमपीत्यर्थः । कचसंहतिर्वा केशसमूहोऽपि मुखावारकत्वात् प्रमीलनं वा नयनयोर्मुकुलीभावोऽपि परि(धानं) वस्त्रं जातम् । कयाचि.

R. No. 1040.

Palm-leaf. 15⅜ × 1⅜ inches. Foll. 42 Lines, 5 in a page. Telugu. Injured.

Purchased in 1913–14 from M.R.Ry. V. Rāmacandra Rao of Samalkot.

(*a*) कौतुकचिन्तामणिः.

KAUTUKACINTĀMAṆIḤ.

Foll. 1*a*—22*b*.

On a fly-leaf in the beginning of the manuscript the name of the work is stated to be Kautukacintāmaṇi. Similar to the work described under No. 3894 of the D.C.S. MSS., Vol. VIII.

This work is said to have been copied by Nṛsiṁhalu, the copy having been completed on the 11th day of the dark fortnight of the Mārgaśira month in the year Ānanda.

Wants beginning and end.

Beginning:

धूमेन धारयेत् ।
अञ्जयेन्नयने तेन लोकवश्यमनुत्तमम् ॥
भारद्वाजस्य पित्तेन स्ववीर्यं धूर्तबीजकम् ।
मर्दयित्वा प्रदातव्यं स्त्रीणां तदिह वश्यकृत् ॥

* * * *

अथ वाजीकरणम्—

स्वरसेन भावितं वा धात्रीचूर्णं शिताज्यमधुमिश्रम् ।
कृत्वा सुपिष्टदुग्धं न तुष्यति स्त्रीशतेनापि ॥

End:

साधकस्तत्प्रभावेन व्याघ्ररूपेण दृश्यते ।
तत्फलान्यथवा कण्ठे धारयेद्व्याघ्ररूपकम् ।
तथाच कपिबर्वरे गुञ्जाफलं कुर्यात्कपिस्वरोपमः ॥

(*b*) రసార్ణవము.

RASĀRṆAVAMU.

Foll. 23*a*—31*a*.

See the Telugu part for description and extracts.

(*c*) रसरत्नाकरः.

RASARATNĀKARAḤ.

Foll. 31*b*—35*a*. Fol. 25*b* is left blank.

A treatise on medicine. The portion contained in this manuscript deals with the method and manner of preparing medicated oils and powders.

Contains the Tailapātanavidhi.

Beginning:

नानावृक्षतैलपातनविधिः—

तैलानां पीडनं वक्ष्ये सूर्यपाके तथानले ।
यन्त्रयोगेन तैलं च ग्राह्ययोगेषु योजयेत् ॥

धुत्तूरबीजचूर्णानि वस्त्रपूतानि कारयेत् ।
समूलोद्धारवारुण्या कषायेण विलेपितम् ॥

आलिप्य कांस्यपात्रे तु धारयेतातपे खरे ।
संतप्तं स्वच्छवस्त्रेण पीडयेत्तैलमाहरेत् ॥

End:

भल्लाततैलयोगेन महारोगहरं भवेत् ।
एतद्ब्रह्म महावीर्यं पुरा नारायणोदितम् ॥

त्वया वीर्यं महादेवि ज्ञात्वा ज्ञात्वा च नाशनम् ।
यः पठेच्छृणुयाद्वापि सर्वरोगहरं भवेत् ॥

एतद्रहस्यं परमं गुह्यानां गुह्यमुत्तमम् ।
नास्ति नास्ति च दुष्टानां गुरुभक्तिविहीनतः ॥
स्वयं देवि प्रदातव्यं नास्ति नास्ति न संशयः ॥

(*d*) राश्यंशजातफलम्.

RĀŚYAṀŚAJĀTAPHALAM.

Foll. 36*a*—42*a*.

A treatise on astrology dealing with the influences, good or evil, due to the various positions of the signs of the zodiac at the time of the birth of a person.

Complete.

This work is said to have been copied by Sanagavarapu Narasiṁhalu, the transcription having been completed on Monday, the 14th day of the dark fortnight of the month of Caitra in the year Vibhava.

Beginning:

कुत्सितं चित्तवैकल्यं कृत्वा दारुमहद्भयम् ।
चोरापराधनं मेषप्रथमांशफलं भवेत् ॥
संभ्रमं बन्धुकल्याणं श्वेतवस्त्रं लभेत्तदा ।
स्त्रीधनं प्राकृते मेषे वृषभांशफलं भवेत् ॥

End:

षडैश्वर्येण संपन्नं माङ्गल्याभरणादिकम् ।
सर्वसौभाग्यमाप्नोति मीने मीनांशकं फलम् ।

Fol. 42*b* contains a few lines regarding ग्रहावस्था.

R. No. **1041**.

Palm-leaf. $16\frac{3}{8} \times 1\frac{3}{8}$ inches. Foll. 21. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1913–14 from M.R.Ry. V. Rāmacandra Rao of Samalkot.

(*a*) मल्हणस्तवः.
MALHAṆASTAVAḤ.

Foll. 1*a*—3*b*.

By Malhaṇa. Same work as that described under No. 11084 of the D.C.S. MSS., Vol. XIX, and R. No. 177(*f*) *ante*.

Complete.

This manuscript is said to have been copied by Vēṅkaṭanārāyaṇa, son of Veṅgāyalappāḍi Ciṭṭaṇṇa, the copying having been completed on Thursday, the 1st day of the dark fortnight of the month of Phālguna in the year Akṣaya.

(*b*) बिल्हणस्तवः.
BILHAṆASTAVAḤ.

Foll. 4*a*—7*a*. Fol. 7*b* is left blank.

By Bilhaṇa. Same work as that described under No. 11071 of the D.C.S. MSS., Vol. XIX.

Complete.

Said to have been copied on Friday, the 2nd day of the dark fortnight of the month of Phālguna in the year Akṣaya by the same scribe.

(*c*) हलायुधस्तोत्रम्.

HALĀYUDHASTŌTRAM.

Foll. 8*a*—13*b*.

सूत्रधारः—सत्यम्, तथापि खल्वस्ति तादृशमेव नवनिर्वर्तितं नलचरित्रं नाम नाटकम्। कविरपि तस्य विदित एव ॥

पारिपार्श्विकः—आः स हि रुक्मिणीपरिणयस्यापि प्रणेता ॥

सूत्रधारः—(विहस्य) नहि नहि। अस्य खलु पितृव्योऽयमप्पय्यदीक्षितो नाम सरसकवितासाम्राज्यसार्वभौमः तत्प्रणेता। अयं तु मुकुन्दविलासस्य काव्यस्य निबन्धा ॥

पारिपार्श्विकः—आः स्मृतम्। अस्य किल कूटस्थाः साक्षात्कृतब्रह्माणः सर्वविद्यागुरवः छन्दोगाः सोमपीथिनो द्वैतवादासहिष्णवो जगद्विदिता एव। अमीष्वपि विशेषादत्रभवान् अच्चादीक्षितः ॥

सूत्रधारः—साधु स्मृते साधु। तस्य किलि कृष्णाह्वयवन्दितचरणारविन्दस्य भरद्वाजकुलचूडामणेरष्टभिः क्रतुभिरष्टाभिरायतनैः शम्भोरष्टभिर्ग्रामैरष्टाभिश्च सर्वविद्याविशारदैस्तनयैरष्टापि दिशो यशोभिरभिज्वलिताः। तस्य पञ्चमः सूनुरद्वैतमुकुरविवरणदर्पणाद्यनेकप्रबन्धनिर्माता शीलित एव श्रीरङ्गराजाध्वरी ॥

पारिपार्श्विकः—परिशीलित एव। तस्य हि तपःपरिपाकफलमखिलराजकमौलिविश्रान्तशासनश्चतुरधिकशतप्रबन्धनिर्माणसाहसी श्रीविष्णुमतनिर्वाहधूर्वहः श्रीमानप्पयाध्वरी ॥

सूत्रधारः—ज्ञायते स कल्पतरुं व्याचक्षाणः सरसकविना यदस्तूयत बालकविना—

अप्पदीक्षित किमित्यतिस्तुतिं वर्णयामि भवतो वदान्यताम्।
सोऽपि कल्प(क)तरुः स्थलीप्सया त्वद्गिरामवसरं प्रतीक्षते॥ इति ॥

पारिपार्श्विकः—न केवलं तदेव। तदपि ज्ञायते यदेष शिवार्कमणिदीपिकावसानलब्धकनकस्नानः प्रशंसितः साहित्यमार्गसंप्रदायगुरुणा कविना समरपुङ्गवयज्वना—

'हेमाभिषेकसमये परितो निषण्णसौवर्णसंहृतिमिषाच्चिनबोम्मभूपः।
अप्पय्यदीक्षितमणेरनवद्यविद्याकल्पद्रुमस्य कुरुते कनकालवालम्॥'

इति॥

सूत्र—तत्सोदर्यस्य विद्वत्कवेरच्चादीक्षितस्य महिमा केन वर्ण्यते। तथापि किंचिद्वर्णितं गुरुनामकविना—

'शब्दब्रह्म जगाहुषी जगृहुषी वैशेषिकीं. सा(से)दुषी
तर्कोन्मर्दमुपेयुषी श्रुतिशिखां भाट्टे पदं दाशुषी।
सांख्यादीनधिजग्मुषी विविदुषी साहित्यमर्माखिलं
कस्मिंस्तस्य हि शेमुषी नृपसभे नापूपुषद्वैदुषीम्॥'

इति॥ तस्य च पौत्रः साहित्यरत्नाकरमहावीरचरितादिप्रबन्धव्याख्यातुः कविलोकचूडामणेरम्बिकापुरुषावतारस्य भगवतो नारायणाध्वरिणः प्रसादेन। उक्तं च तेनैव कविना—

'चन्द्रशेखरसर्वाङ्गचरणोन्मार्जनाम्भसाम्।
विवर्तजगदुत्सङ्गे विहरन्ति मदुक्तयः॥
नारायणाध्वरीन्द्राय नमोऽस्तु ज्ञानसिन्धवे।
शारदा यत्कटाक्षाणां साप्यवेतनकिंकरा॥'

इति च॥

पारिपार्श्विकः—कथमिदमतिगम्भीरहृदयं रूपकमार्येण तत्त्वतः परिज्ञातम्॥

सूत्र—(विहस्य) अस्त्युपायः।

पारि—क इव ।

सूत्र—अग्रजन्मा खलु तस्य रसिकलोकमौलिमणेराचाादीक्षितो व्याकरोदिदं रूपकम्[व्याकरोत्]अनुजस्नेहात् ॥

पारि—कथमयं कविरन्तर्मुखत्रय्यन्तविचारप्रवृत्तः करोति स्म नाटकेऽप्यभिरुचिम् ।

सूत्र—यतोऽयमीदृशस्तत एवोक्तमत्रापि विषये तेनैव—

'कालं जेतुमुपायौ द्वौ कलिकल्मषसंप्लुतम् ।
कथा वा निषधेशस्य काशी वा विश्वपावनी ॥'

इति ॥

End:

राजा—देवि, कथनान्नश्यति दुःस्वप्न इत्यामनन्ति महान्तः। अस्वस्थहृदयया दृष्टः स्वप्नोऽप्ययमन्यथा भवेत् ॥

दमयन्ती—कहिं सहीओ ।

राजा—एहि समावेव द्रष्टुमन्तःपुरं गमिष्यावः ॥

(इति निष्क्रान्तौ)

Colophon:

इति नलचरित्रनाटके पञ्चमोऽङ्कः समाप्तः ॥

षष्ठोऽङ्कः.

(ततः प्रविशति कामन्तकः)

कामन्तकः—(वामाक्षिस्पन्दं नाटयन् सविषादम्)

प्रत्यूषेमहति(ऽहमन)क्षतान्य(राण्य)श्रृणवं पश्चाद्बहिर्निस्सरन्
अद्राक्षं प्रथमं च कुब्जहतकं संप्राप्तमन्तःपुरात् ।
अथैतन्नयनं च तावदसकृद्वामं मम स्पन्दते
को विद्यादखिलैरमीभिरधुना किं नाम संपत्स्यते ॥

* * * *

सारङ्गकः—अणं कोसेण सामिपादाणं अणुग्गहेण तुह्माणं वि अज्ज सव्वं जाणीअ विण्णवेमि।

(इति ससंभ्रमं निष्क्रान्तः.)

R. No. 1284.

Paper. 11 × 9½ inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Tāṅgal Rāmasvāmi Śāstri of Viriñcipuram.

Fol. 1*a* gives the name of the work as Sītāpariṇayam.

सीतापरिणयम्.

SĪTĀPARIṆAYAM.

Foll. 1*b*—42*b*.

By Sūryanārāyaṇādhvarin. Same work as that described under R. No. 910(*a*) *ante*.

From the end of the sixth Sarga to the end of the twelfth Sarga.

End:

बन्धून् बन्धुरयन् द्विषः कलुषयन् धर्मद्रुमुन्निद्रयन्
वंशं प्रांशवयन्निजं विरचयन्निर्वै(र्वी)रमुर्वीतलम् ।
दिग्योषाः परिपोषयन्निजगुणैः कल्याणयन् राघवः
त्रीन् लोकाननुरञ्जयन् जनिमतो गोपायति स्म प्रजाः ॥

Colophon:

इति सूर्यनारायणाध्वरिविरचिते सीतापरिणये महाकाव्ये द्वादशः सर्गः ॥

भारद्वाजकुलाब्धिकौस्तुभमणेर्नारायणाख्याभृतो
विद्वत्सङ्गमधो . . . . . . दिरायां स्त्रियाम् ।
सीताख्य . . . . . . नीशकृपयासौ सूर्यनारायणः
श्रीसीतापरिणीतिनामकमहाकाव्यं व्यधत्तेतराम् ॥

. . . प्रभूतां सरसां सुव्रतां सालङ्कृतिं सूक्तिमतीं सुरम्याम् ।
रामाय वैदेह इवाभिरामां सीतामिवैमां कृतिमर्पयामि ॥

सीतापरिणयकाव्यं समाप्तम् ॥

R. No. **1285.**

Paper. 11×8½ inches. Foll. 415. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Varakhēḍi Raṅganāthācāriyar of Tiruvadi in the Tanjore district.

Bound in two volumes.

न्यायसुधाटिप्पणी.

NYĀYASUDHĀṬIPPAṆĪ.

A commentary on Jayatīrtha's Nyāyasudhā, which is described under No. 4820 of the D.C.S. MSS., Vol. X: by Yadupati, a disciple of Vēdēśatīrtha.

From the first sūtra, the beginning being wanting of the second Pāda of the first Adhyāya to the end of the work.

Beginning:

मुख्यवृत्त्यभिप्रायेणेति ज्ञातव्यम् । अन्यत्र प्रसिद्धत्वादिर्वा इत्यत्रादिपदेनोक्तं यत्र प्रसिद्धत्वं ग्राह्यम् । आपातेति । अज्ञप्रतीत्यनुरोधेनेत्यर्थः । तथाच यथा विद्वत्प्रसिद्ध्या भावपराणामपि इन्द्रादिशब्दानामज्ञप्रतीत्यनुरोधेनान्यत्र प्रसिद्धत्वादिकं विवक्षितम्, तथा पूर्वपादे समन्वितानां विद्वद्रीत्या यौगिकानामपि अज्ञप्रतीत्यनुरोधेन रूढतया साक्षाद्धर्म्युपस्थापकत्वं विवक्षितम् । अतो युक्तेयं पादभेदोक्तिरिति भावः ॥

सू ॥ सर्वत्र प्रसिद्धोपदेशात् ॥

सत्यकामत्वादीति । आदिपदेन सत्यसंकल्पत्वादिपरिग्रहः ।

End:

विभूतिपदव्याख्यानव्याजेनान्ते माङ्गलिकं शब्दं पठति [भगवति] भगवान् टीकाकारः—विभूतिर्महालक्ष्मीति । आदौ श्रिय इति अन्ते च महालक्ष्मीरिति श्रीवाचकशब्दस्य संपुटाकारेण प्रयोगात् श्रीकरोऽयं

ग्रन्थ इति सूचयितुमिदमिति सांप्रदायिकाः । कमलामहिलेति । कमला रमा महिला वनिता यस्य स तथोक्तः । वनिता महिला तथेत्यभिधानात् । श्रद्धाजाड्याद्भक्तिपारवश्यात् । स्वाचार्यवचसि विषये । कृतिं तदर्थप्रकाशनरूपाम् । आचार्यवचसीत्यस्य श्रुत्या जाड्यादित्यनेनाप्यन्वयः । न्यायसुधेति । अमृतत्वहेतुत्वेन सुधारूपा न्यायाः यस्यामिति विग्रहः । अग्न्याहितादिवत्परनिपातः । भौमैर्विबुधैः सुरैः ब्राह्मणैरिति यावत् । इत्यशेषमतिमङ्गलम् ॥

वासवीवियति व्यक्तं परापरविभासकम् ।
व्यासाभिधमहं(हो) वन्दे महामोहतमोऽपहम् ॥

अपारागाधश्रीजयमुनिकृतग्रन्थहृदय-
प्रपञ्चे मे यत्नो यदपि परिहासैकफलकः ।
तथापि श्रीव्यासालव(भिध)मुनिकृपालेशबलतः
कृतो यत्नः स्यात्(न्मे) सकलसुजनाह्लादजनकः ॥

वेदेशयोगिवरमानसनीरजस्थश्रीमध्वहृत्कमलवासिरमानिवासः ।
प्रीतोऽस्त्वनेन जयतीर्थमुनीन्द्रवाक्यगूढाशयप्रकटनेन सदा विभूत्यै ॥

Colophon :

इति श्रीमद्वेदेशतीर्थपूज्यपादशिष्येण यदुपतिना विरचितायां न्यायसुधाटिप्पण्यां चतुर्थस्याध्यायस्य चतुर्थः पादः समाप्तः । चतुर्थाध्यायश्च समाप्तः । समाप्तश्चायं ग्रन्थः । शास्त्रं च परिसमाप्तम् ॥

Foll. 103 and 415*b* are left blank.

R. No. **1286.**

Paper. 11 × 9⅓ inches. Foll. 344. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Tiru Śrīnivāsavarada Tātācārya of Villiyambākam in the Chingleput district. Bound in two volumes.

न्यायपरिशुद्धिव्याख्या—सन्न्यायदीपिका.

NYĀYAPARIŚUDDHIVYĀKHYĀ : SANNYĀYADĪPIKĀ.

A commentary on Vēdāntadēśika's Nyāyapariśuddhi, which is described under No. 4911 of the D.C.S. MSS., Vol. X: by Mahāmahōpādhyāya Śrī-Kṛṣṇa Tātācārya of Tirupputkuḻi, a descendent of Lakṣmīkumāra Tātayadēśika and a disciple of Śrīnivāsayōgin.

Complete.

Beginning:

वन्देऽद्वन्द्वं द्वन्द्वं श्रितपरतन्त्रं निदानमखिलानाम् ।
दशरथजनकापत्यं स्थिरवाणीमौलिभूषणं किमपि ॥

वकुलभूषणपादसरोरुहप्रवणमानससंयमिशेखरम् ।
कलयतो निगमान्तगुरोः पदे कृतधिये करवै गुरवे नमः ॥

श्रीश्रीनिवासयोगीन्द्रचरणाम्भोजमाश्रये ।
कटाक्षाद्वीक्षते यस्य रक्षितुं सर्वरक्षकः ॥

लक्ष्मीकुमारतातयदेशिकवंश्येन कृष्णतातेन ।
न्यायपरिशुद्धिटीका क्रियते सन्न्यायदीपिकाभिख्या ॥

क्वाचार्यपादसूक्तिः क च मे स्थूला मितंपचा बुद्धिः ।
श्रीसूक्तिभक्तिकलितं साहसमेतद्बुधोत्तमैः सह्यम् ॥

प्रारिप्सितग्रन्थाविघ्नपरिसमाप्तिप्रचयगमनादिप्रयोजनाय विरचितं गुरुनमस्काररूपं मङ्गलं शिष्यशिक्षायै शिष्याणामनुषङ्गतो मङ्गलसिद्धये च ग्रन्थतो निबध्नंश्चिकीर्षितं प्रतिजानीते—पत्युरिति । यद्यपि मङ्गलविरहेऽपि नास्तिकादिग्रन्थेषु समाप्तिर्दृश्यत इति न समाप्तिं प्रति मङ्गलस्य कारणत्वं संभवति, तथापि विघ्नध्वंसद्वारा क्वचित् तत्प्रयोजकत्वमुपपद्यत एव, समाप्तिप्रतिबन्धकदुरितविशेषरूपविघ्ननाशं प्रति मङ्गलस्य कारणत्वात् । स्मर्यते हि—

'मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥'

इति । नास्तिकादिग्रन्थेषु तु स्वतस्सिद्धविघ्नविरहादेव समाप्त्युपपत्तिः । आस्तिकाग्रसरैस्तु विघ्नशङ्कया कुग्रन्थत्वपरिहाराय च मङ्गलाचरणमित्यन्यत्र विस्तरः । तत्पादकोटीरयोः संयमिपतिचरणमस्तकयोः संबन्धेनेति; चरणसंबन्धः शिष्यप्राशिष्यत्वादिः, मस्तकसंबन्धः आचार्यप्राचार्यत्वादिः । समिध्यमानविभवान् सम्यक्प्रकाशमानज्ञानादिसंपत्तीन् ।

End:

अशेषदृशः सर्वमपि सदा साक्षात्कुर्वतः । क्षितावनुमितिः--

तोयान्तः सा महीं ज्ञात्वा जगत्येकार्णवे प्रभुः ।
अनुमानात्तदुद्धारं कर्तुकामः प्रजापतिः ॥
अकरोत् स्वतनूमन्यां कल्पादिषु यथापुरम् ।

इत्युक्तः भूमिविषयकानुमित्यभिनय इत्यर्थः । तन्मानताख्यातये अनुमितेरपि प्रमितिभेदत्वप्रख्यापनाय यस्मिन् परमपुरुषे पश्यति सति तत्कटाक्षविषयीभूतस्य तत्त्वनिर्णयः कथासु विजयश्च भवति ।

'जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः ॥
मत्तः स्मृतिर्ज्ञानमपोहनं च'

इत्याद्युक्तेरिति भावः । यस्य भगवतः क्रुधा निग्रहसंकल्पेन : अत्याहितं महाभयम् । नित्यैश्वर्यमहोदधेः अपरिच्छिन्ननित्यैश्वर्यः निःश्रेयसाय मोक्षाय इति ॥

Colophon:

इति श्रीमन्महामहोपाध्यायैः तन्त्रचतुष्टयपारावारपारीणैः श्रीकृष्ण-

तातयार्यैः विरचितायां श्रीमन्न्यायपरिशुद्धिव्याख्यायां सन्न्यायदीपिकाख्यायामनुमानाध्याये चतुर्थं प्रमाणाभासाह्निकम् ॥

संपूर्णश्चाध्यायः ॥

R. No. **1287.**

Paper. 10⅝ × 9⅜ inches. Foll. 120. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Rāmakṛṣṇakavi of Vanaparti.

Foll. 119*b* and 120 are left blank.

नयद्युमणिदीपिका.

NAYADYUMAṆIDĪPIKĀ.

An original work in verse on the Viśiṣṭādvaita school of the Vēdānta followed by a commentary thereon. The author of the text as well as its commentary is Śrīnivāsa, son of Śrīnivāsa Tātācārya of Śrīśaila family and disciple of Kauṇḍinya Śrīnivāsadīkṣita as well as younger brother and disciple of Aṇṇayadīkṣita. The author is the same as that of the work entitled Tattvamārtāṇḍa.

Incomplete.

Beginning :

सत्यं ज्ञानमनन्तमच्युतमजं नित्यं स्वतो निर्मलं
श्रुत्यन्तप्रमितामिताद्भुतगुणं प्रत्यक्ष(क्प्र)काशात्मकम् ।
ब्रह्मस्तम्बमुखोद्भवास्थितिपुनःसंहारलीलारसं
रंहोधूतविरोधियूथमनघं ब्रह्माद्वितीयं भजे ॥
दोहंदोहममोघवाङ्मयगवीराहृत्य सूत्राक्षर-
क्षीरस्मेरमधान्मुदा क्षितितले क्षेमाय यो मादृशाम् ।
आतच्यैतदरिक्तयुक्तिनिकरैरामथ्य भाष्यात्मकं
गव्यं भव्यतमं च यो व्युदहरत्ताभ्यामुभाभ्यां नमः ॥
कुदर्शनविकर्शनास्पदविविक्तयुक्तिप्रभैः
प्रदर्शयितुमुद्यतं परिविमर्श्य भाष्याशयम् ।

अपार्थपरकत्थनव्यपगमोल्लसद्व्यासता-
निदर्शनमहं भजे हृदि सुदर्शनार्यं गुरुम् ॥

प्राचीं वाचमचीकशन्निशिचरग्रस्तां समस्तां मुदा
व्याजाद्वाजिमुखः स तत्प्रकृतिकानन्यानधन्यान् बुधान ।
तत्तात्पर्यहरांश्चिरान्निरसितुं जज्ञे यदात्मा पुन-
स्तं त्रय्यन्तगुरुं परापरकलातन्त्रस्वतन्त्रं भजे ॥

नत्वा वेङ्कटसुत्वनः पदयुगीं षड्दर्शनीहर्षण-
स्तत्ताद्दक्परवादिवादविविधाहंकारहुंकारिणः ।
तद्बिम्बप्रतिबिम्बडम्बररुचस्तत्तन्मताक्षेपण-
प्रेक्षालक्षणलक्षितानभिनुमस्तत्सोदरान् सादरम् ॥

यं पर्यायपतञ्जलिं पदविदः शंसन्ति मीमांसका
यस्याचार्यगुरू निरूढविभवावन्तेवसन्तावमी ।
पश्यत्पादममृष्यमाणमनसः पश्यन्ति यं तार्किका-
स्तं त्रय्यन्तकथोदधीन्दुमनघं वन्देऽण्णयार्यं गुरुम् ॥

विहितबहुविरोधान् व्यक्ततात्पर्यभेदा-
नपगलितविवादान् हन्त वेदान् विधाय ।
सततकृतविनोदान् सर्वशास्त्रानुवादान्
प्रथयितुमतिमोदांस्तातपादान्नमामि ॥

यस्मादस्माभिरादावगणि विगणिताद्भावनं जैमिनीयं
पश्चादु(द्य)द्विपश्चिन्मतहितकथकादूष्यमग्राहि भाष्यम् ।
तस्मिन् कौण्डिन्यवंशच्छलजलधिविधौ श्रीनिवासाध्वरीन्द्रौ
भूयोभूयः प्रणामव्रततिरधिगतप्राभवी बोभवीतु ॥

सेवंसेवमसद्वदावदमदप्रागल्भ्यबिभ्यत्त्रयी-
जीवंजीववधूसुधाकरवचोधारालधाराभरान् ।
श्रीशैलाण्णयदीक्षिताग्रजगुरून् शेषाविशेषोल्लस-
त्पाण्डित्यान् स्वकृतं यते विवरितुं तद्ब्रह्मसूत्रस्तवम्

मोहावेशवशंवदात्ममनसो मूढा निगूढाशयं
श्रीमद्भाष्यमदूष्यमब्जजनुषाप्यादूष्य हृष्यन्ति ये ।
तानात्मीयमतिव्यतिक्रमभवद्दोषान् मनीषिब्रुवां-
स्तत्तात्पर्यविवेचनान्निरसितुं यत्नः कृतार्थोऽद्य नः ॥

यो वायोरभवत्तृतीयतनुभृद्यस्तद्भुजामीशितु-
स्तादृग्रूपधरस्तयोर्हि चरमः स्पष्टप्रकृष्टोदयः ।
इत्थं तन्मतयोः क्रमादधिगतं न्यूनत्वमाधिक्यम-
प्यद्यत्वे त्वनवद्यतां प्रविशदीकर्तुं प्रवर्तामहे ॥

यावत्प्रज्ञमभिज्ञभाव्यमतिना ग्रन्थे मया निर्मिते
दोषान्वेषणतोषिताः कतिपये तुष्यन्तु कुप्यन्तु वा ।
(किं) नश्छिन्नमतः श्रुतिस्मृतिकथापारम्परीलम्पटाः
सन्तः प्रोज्झितमत्सराः प्रतिपदं सन्त्येव संतोषिणः ॥

ध्वान्तानुवर्तिषु जनेष्वपि चन्द्रिकायां
दोषानुषङ्गविधितः प्रथितोदयेषु ।
सन्मानसाब्जविततिव्यथिता विकासं
गृह्णातु संप्रति नयद्युमणेरमुष्मात् ॥

स्वकृतब्रह्मसूत्रार्थहृद्यपद्यविवेचनी ।
क्रियते श्रीनिवासेन नयद्युमणिदीपिका ॥

दृप्यत्पाषण्डषण्डद्रुमपरशुवचःस्पष्टिमुष्टिंधयश्रीः
स्वामी रामानुजार्यो जयतु विधिवधूश्लावितामोघशक्तिः ।
तद्भाष्यं चाप्यदूष्यं प्रभवतु कुहनाबद्धसिद्धान्तभेद-
श्रद्धालुध्वान्तसद्योविघटनचटुलोऽसाध्यमध्याह्नभानुः ॥

इह खलु भवभयाभितप्तजनभागधेयवैभवभाविताबतरणेन भगवता बादरायणेन निखिलनिगमान्ततत्त्वार्थनिर्धारणाय प्रणीतानि ब्रह्मसूत्राणि गहनगम्भीरार्थतया दुरवबोधानि साधयितुमसमर्थानामद्यतनानामल्पमतीनामनुजिघृक्षया सारदीपभाष्यमुखेनोत्तरवैशद्येन भगवता भाष्यकृता बहुधा व्याख्यातानि परिष्कृतानि च निगमान्तगुरुप्रभृतिभिरिति न तत्र किंचित्प्रपञ्चनीयमस्माकमस्ति । तथाहि---तदभिधेयतत्त्वार्थनिर्धारणस्य तत्तदध्यायप्रतिपाद्यनिरन्तराभ्यसनव्यसनमन्तरेण दुःसंपादतया तस्य पुण्ड्रेक्षुभक्षणवेतनतुल्यतया सुलभसाध्यत्वाय स्तोत्रमात्रेण सूत्रतत्त्वार्थनिर्धारणं कृतमपि सावद्यचोद्यनिराकरणाय स्वयमेव विवरीतुं प्रकरणमिदमारभ्यते । तत्र 'अथातो ब्रह्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दात्' इति पर्यन्तस्य कृत्स्नस्य शास्त्रस्य भगवदेकनिष्ठां प्रतिष्ठापयितुं जिज्ञास्यत्वं भगवतः प्रथमतो वक्ति—हरे जिज्ञास्यत्वमिति ।

हरे जिज्ञास्यत्वं तव मुनिरवादीत् प्रथमतो
यतो ब्रह्मेत्येतत्तव पदमसाधारणमभूत् ।
अथातःशब्दाभ्यामपि विहितकर्मावगतिभि-
स्तदाराध्यो वेद्यस्त्वमिति निरणैषीत्करुणया ॥

अत्र जिज्ञास्यत्वस्य विष्ण्वेकनिष्ठत्वकथनेनोत्तरसूत्रसंदर्भस्यापि तदेकविषयत्वं सूचितम् । न ह्यजिज्ञास्यमुत्तरशास्त्रविषय इति भावः । तद धिगम उत्तरपूर्वाघयोरश्लेषविनाशौ' इत्यनेन मोक्षसाधारणकारणज्ञान-

साध्यतया वक्ष्यमाणस्य पापसंबन्धाभावस्य 'हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः' इत्यादिभिर्भगवद्ध्यानाधीनत्वबोधनात् तस्य जिज्ञास्यत्वं युक्तमिति सूचयन् हरिशब्देनैव संबोधयति—हरे इति ।

End:

तथाच सर्वशाखाप्रत्ययन्यायेन सर्वेषामेकार्थत्वायेहापि भगवत्तादात्म्यानुसन्धानोपदे(शे)न विनायं चिदात्मोपदेश इत्याह—त्वमुपनिषदामिति । उपनिषदि(षीद)ति परं ब्रह्म प्रतिपाद्यत्वेन आस्विति उपनिषदः ।

* * * *

तस्य ह वा एतस्य महतो भूतस्य नि(श्वसि)तमेतद्यदृग्वेदो यजुर्वेद इत्यादीनां चेतनासाधारणपदघटितवाक्यानामेतद्विद्यन्धा(द्याङ्गा)नामनेन जीवेनात्मना.

R. No. **1288.**

Paper. 11 × 9½ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. Tāṅgal Rāmasvāmi Śāstri of Virincipuram.

(*a*) महाभाष्यतत्त्वविवेकः.

MAHĀBHĀṢYATATTVAVIVĒKAḤ.

Foll. 1*a*—14*b*.

Explains the correct meaning of the Pāṇini Sūtra as made out in the Mahābhāṣya of Patañjali: by Nīlakaṇṭhayajvan.

Contains the meaning of Sutras 2 and 3 of the third Pāda of the first Adhyāya.

Beginning:

आदिरन्त्येन सहेता ।

* * * *

न प्रामाणिकारवस्या(?)दुष्टतया सत्य(न्य)स्मिन् यस्मात्पूर्वो नास्ति स आदिः । सत्य(न्य)स्मिन् यस्मात्परो नास्ति सोऽन्तः इत्याद्यन्तवत्सूत्रे भाष्ये व्यवस्थापितत्वात् आद्यन्तपदशक्तिग्रहे अनुपयोगित्वोक्तेः ।

असि . . . . . यथोत्तरं मुनीनां प्रामाण्यात् आदिरन्त्येनेत्यत्र नवीन-पक्षे एते(इता)पदवैयर्थ्याय भवद . . . . . हलन्त्यसूत्रे तथैवोपपाद-यिष्यमाणत्वेन अत्र तद्विरुद्धोपपादनस्यायुक्तत्वाच्च ।

* * * *

उक्तरीत्या श्रूयमाणस्य वर्णान्त(र)स्य सावकाशत्वात् । तथा च कौस्तुभे जघन्यमीदृशसमाधा . . . . इति सर्वमनवद्यम् ।

हलन्त्यमिति सूत्रे (तु) नीलकण्ठेन यज्वना ।
भाष्यतत्त्वविवेकोऽयं क्रियते विदुषां (मुदे) ॥

द्विपदमिदं सूत्रम् । समस्तैकत्वे तु अन्त्यपदस्य पूर्वनिपातापत्तेः । उपदेशपदं च पूर्वसूत्रादनुवर्तते । उपदेशश्चाद्योच्चारणमिति सिद्धान्तः ।

End:

अत एव एतेन हलन्त्यमित्यत्र षष्ठीतत्पुरुषो दुरुपपादः सुप्-प्रत्याहारस्य दुरूहत्वादिति कौस्तुभे स्थितम् ।

Foll. 25 and 26 are left blank.

(*b*) प्रश्नमहोदधिः—सव्याख्यः.

PRAŚNAMAHŌDADHIḤ WITH COMMENTARY.

Foll. 27*a*—37*b*.

Transcribed in 1913–14 from a MS. of M.R.Ry. Kṛṣnamācaryar of Madura.

Similar to the work described under R. No. 472 *ante*. By Varāhamihira with the commentary by Śrīdhara.

Breaks off in the seventh Adhyāya.

१. संक्षेपहोरा.
२. गमनागमनयोग.
३. जयापजय.
४. शुभाशुभलक्षण.
५. प्रवासचिन्ता.
६. नष्टप्राप्ति.
७. गर्भिणीप्रसवे पुंस्त्रीज्ञान.

Beginning :

वराहमिहिरार्थक्य(चार्य)कृतप्रश्नमहोदधौ ।
श्रीधरः कुरुते वृत्तिं पूर्वं लोकानुकम्पया ॥

विघ्नोपशान्त्यर्थमिष्टदेवतां नमस्करोति—प्रणिपत्य रविं मूर्ध्नेत्यादिना ।

यो यो भावः स्वामिदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्याभि-
[वृद्धिः ।
पापैरेवं तस्य भावस्य हानिर्निर्दिष्टव्या पृच्छतो जन्मतो वा ॥

जन्मतः जन्मकाले; सार्वविभक्तिकस्तसिल् प्रत्ययः । तस्य काले मूर्त्याद्यात्मको यो राशिः शुभग्रहस्वामिनामन्यतमेन युक्तो दृष्टो वा स्यात् तस्य तस्य भावस्य वृद्धिर्भवति । पापैर्योगदृष्ट्या तस्य तस्य भावस्य हानिः स्यात् । उभयसंपाते बलवता निर्णयः ।

End :

अध्वयोजनपरिज्ञानं तु प्रश्नलग्नराशेर्मध्यात् पञ्चमनवमांशकात् पूर्वा . . . र्वाच्या । पञ्चमात्पूर्वं गतो नवांशाल्लग्नच्युतः तावन्तो योजना इत्यर्थः ॥

Colophon :

इति श्रीधराचार्यविरचितायां प्रश्नमहोदधिव्याख्यायां षट्पञ्चाशदङ्कवृत्तौ नष्टप्राप्त्यध्यायः षष्ठः समाप्तः ॥

अथ सप्तमोऽध्यायः ॥

तत्र गर्भिण्याः पुत्रदुहितृज्ञानं वरस्य कन्यालाभज्ञानं चाह—

विषमस्थितेऽर्कपुत्रे सुतस्य जन्मान्यथाङ्गनायाः(श्च) ।
लभ्या वरस्य नारी समस्थिते चान्यथा वा(न स्यात्) ॥

* * * *

तेषु पुंराशिष्वेकतमे लग्ने पुंग्रहेण दृष्टे वृष्टिम् । ग्रहलक्षणं तु.

Fol. 38 is left blank.

(*c*) जातकालंकारः.

JĀTAKĀLAṄKĀRAḤ.

Foll. 39*a*—60*b*.

Transcribed in 1913–14 from a MS. of M.R.Ry. R. Kṛṣṇamācārya of Madura.

A treatise in horoscopy.

Wants the beginning and end.

Beginning :

लग्नादिद्वादशभावेषु यद्यद्भावफलं केन्द्रत्रिकोणेषु भवति तत्र तत्फलमुक्त(त्तम)म् । यद्यद्भावपरं(फलं)षष्ठाष्टमव्ययेषु स्थितं तत्स्थानफलं मध्यमम् । लग्नाधिपे दीर्घस्थे कु . . . वषरक्तश्वेतादिकं परिकल्प्यत इति वक्तव्यम् । शुभाशुभैश्च फलं विचारणीयम् । लग्नाधिपे केन्द्रत्रिकोणेषु शुभक्षेत्रे शुभसहिते शुभवीक्षिते वा चतुःसागरपर्यन्तं कीर्तिमान् भवति ।

End :

सूर्यक्षेत्रे राहुणा केतुना वा युक्ते गृहे सति जन्मकाले तस्यैव दशा भवति चेत् तद्दशायां राहुभुक्तौ पितृगण्डः ।

(*d*) ज्ञानदीपिका.

JÑĀNADĪPIKĀ.

Foll. 61*a*—71*b*.

Transcribed in 1913–14 from a MS. of M.R.Ry. R. Kṛṣṇmācārya of Madura.

Contains the following Kāṇḍas :—

१. संज्ञाकाण्डः.	३. लाभालाभकाण्डः.
२. नष्टकाण्डः.	४. व्याधिमृत्युनिर्णयः.

By Viśvanātha. Similar to the work described under R. No. 395 *ante*.

Breaks off in the fourth Kāṇḍa.

Beginning:

अथ वक्ष्ये विशेषेण ग्रहाणां मित्रनिर्णयम् ।
भौमस्य मित्रे शुक्रज्ञौ भृगोर्ज्ञारार्कमन्त्रिणः ॥
आदित्यस्य गुरु . . शनैर्विद्गुरुभार्गवान् ।
भास्करेण विना सर्वे बुधस्य सुहृदस्तथा ॥

End:

चन्द्राद्योमस्थिते शुक्रे जीवाद्योमस्थिते रवौ ।
तल्लग्ने कार्यसिद्धिः स्यात् पृच्छतां नात्र संशयः ॥
* * * *
नीचारियोगवेलायां सर्वकार्यविनाशनम् ॥

Colophon:

इति विश्वनाथकृतौ ज्ञानदीपिकायां लाभालाभकाण्डस्तृतीयः ॥
अथ चतुर्थकाण्डः ॥
पूर्वशास्त्रानुसारेण व्याधिमृत्युविनिर्णयम् ।
* * * *
मकरे गुरुमन्दार्का मन्दः कुम्भे कविं विना ।
ज्ञाश्चान्त्ये जीमन्दार्का जीवो मेषाद्विपादपः ॥

(*e*) लम्पाकम्.

LAMPĀKAM.

Foll. 71*b*—74*b*.

Transcribed in 1913-14 from a MS. of M.R.Ry. R. Kṛṣṇamācārya of Madura.

Same work as that described under R. No. 218(*a*) *ante*. By Padmanābha. The work is said to consist of 62 stanzas.

Contains the three Adhyāyas, namely, १. संज्ञाध्याय २. जातकप्रकरणविधि and नष्टलाभाध्यायः.

Beginning:

धातुं मूलं च जीवं च मृतो धातुस्तथैव च ।
मूलजीवामृतिं चैव च्य(चत्वा)रः क्रमशस्तथा ॥

End:

पद्मनाभकृतौ शास्त्रे लम्पाकं मनुभूषणम् ।
द्विषष्टिश्लोकमित्युक्तं शिष्याणां हितकाम्यया ॥

Colophon:

इति पद्मनाभकृतौ लम्पाके विधिनष्टलाभाध्यायस्तृतीयः समाप्तः ॥

Foll. 74*b* and 75*a* contain some stanzas on horoscopy. Foll. 75*b* and 76 are left blank.

R. No. **1289.**

Paper. 11 × 8¾ inches. Foll. 94. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. S. P. V. Raṅganāthasvāmi of Vizagapatam.

धातुप्रत्ययपञ्जिका.

DHĀTUPRATYAYAPAÑGIKĀ.

This is said to be a portion of Śābdikābharaṇa and is intended as an easy introduction to Pāṇini's grammar. By Hariyōgin.

Contains the Dhātuprakaraṇa.

Beginning:

दीपकालाचलैर्वर्णैरभिव्यञ्जितमञ्जसा (?)।
स्फोटाह्वयमहं वन्दे रूपं विष्णोर्गुहाशयम् ॥
बालेषु पाणिनीयाब्धेः प्रवेशभृशभीरुषु ।
मयैष(त)दन्तर्विष्टेन क्षिप्यन्ते शब्दबिन्दवः ॥
स्वरूपमर्थं धातूनां व्यवस्थामपि तिङ्विधौ ।
वक्तुं वै कारणं भेदमयमस्मत्समुद्यमः ॥

तत्र तावद्धात्वर्थविशेषणद्वारेण लकारोत्पत्तिं प्रति निमित्तभूतः काल उपदिश्यते। स च नित्यत्वात् व्यापित्वाच्चासकाल एको यद्यपि कालः, तथापि वर्तमानो भूतो भविष्यन्निति व्यपदेशभेदास्ते तस्य क्रियाद्वारकाः। स च कालो मूर्तिमद्भिः सर्वैरवयवैः संयुक्तस्तत्संयुक्तेषु द्रव्येषु क्रियापि

समवेतेति संयुक्तसमवायेन क्रियागतो वर्तमानादिव्यवहारः उपचारात् काले वर्तते। यथैकस्मिन् पुरुषे क्रियाभेदादनेकाः संज्ञा दृश्यन्ते।

तदुक्तम्—

यथैकस्मिन् क्रियाभेदात्तक्षाद्याख्या प्रवर्तते।
क्रियाभेदात्तथैकस्मिन् भूताद्याख्या प्रवर्तते॥

आदिग्रहणेन वर्तमानादेर्ग्रहणम्।

End:

स्कभ्नातेर्वेः परस्य 'वेः स्कभ्नातेर्नित्यम्' इति षत्वम्। विष्कभ्नाति। वेरन्यत्र न भवति—परिस्कभ्नाति विस्कभ्नोति विस्कुभ्नातीत्याद्यूह्यम्॥

Colophon:

इति हरियोगिनः शैलवाचार्यस्य कृतौ शाब्दिकाभरणे धातुप्रत्ययपञ्जिकायां सौत्रधातवः समाप्ताः॥

नीलोत्पलदलश्यामो रामो राजीवलोचनः।
सलक्ष्मणो महावीरः पातु मां जानकीपतिः॥

R. No. **1290.**

Paper. $10\frac{3}{4} \times 8\frac{1}{2}$ inches. Foll. 150. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. Gōpālācārya (Mansālkaṭṭai) of Tirupati.

परिभाषेन्दुशेखरव्याख्या—त्रिशिखा.

PARIBHĀṢĒNDUSĒKHARAVYĀKHYĀ: TRIŚIKHĀ.

Foll. 1*a*—147*a*.

By Lakṣmīnṛsiṁha, a disciple of Prāṇanātha. Same work as that described under No. 1471 of the D.C.S. MSS., Vol. III.

Complete.

End:

शिवमिति। ग्रन्थान्ते मङ्गलवाचकस्य सतो देवतावाचकस्य प्रयोगात् ग्रन्थान्तेऽपि शिष्टाचारप्रतिपन्नं मङ्गलं वेदितव्यमितीष्टं सिद्धम्।

निर्माय त्रिशिखा सेयं दक्षिणामूर्तयेऽर्पिता ।
तेन तुष्यतु देवोऽपि पुष्यत्वेनामनारतम् ॥
गिरः क्व नागेश्वरनिर्विशेषनागेशसूरेः क्व मतिर्ममाल्पा ।
तथाप्ययं बालिशताविलासः सन्तः परं मन्तुममुं सहन्ताम् ॥
यद्यप्यशेषमिह दूषणदूष्यमेव तद्दूषयन्तु सुधियो न तु तेन दूये ।
यत्किंचिदस्ति यदि साधु ततः कृता चेच्छ्लाघा तदीयचरणौ
[शिरसा वहामि ॥

Colophon :

इति लक्ष्मीनृसिंहशास्त्रिविरचिता परिभाषेन्दुशेखरव्याख्या त्रिशिखा समाप्ता ॥

The scribe of the original manuscript adds—

मेषं पूषणि पुष्णाति चैत्रे सौम्यत्रयोदशीम् ।
संगते व्यलिखं स्वामिसूरिर्दुर्मुखिवत्सरे ॥

Foll. 147*b*—150*b* contain an alphabetical index of the Paribhāṣas commented upon in this work.

R. No. **1291.**

Paper. 12 × 9½ inches. Foll. 187. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. R. Kṛṣṇamācārya of Madura.

तर्कसारः.

TARKASĀRAḤ.

A treatise on Nyāya : by Pēttādīkṣita.

Begins towards the end of Vēdāpauruṣēyatvavāda.

Contains the Apūrvavāda in full and breaks off in the Arthavādavāda.

Beginning :

. . . ति जिज्ञासा भवतीति तत्राकाङ्क्षा . . . . .
ननु घटः कर्मत्वमित्यत्राकाङ्क्षाभेदान्वयप्रत्या . . . . . .

कत्वात्तदा क . . . त्त् . . . . योग्यत्वायोग्य . . . . चान्वयबोध इष्ट एव। नच धर्मधर्मिभावेनान्वयोऽस्तु, तत्र योग्यतासत्त्वादिति वाच्यम्, घट इति पदात् घटस्य संबन्धित्वे . . . . धर्मधर्मिभावान्वयप्रकारकजिज्ञासाजनकपदार्थोपस्थित्यभावात्तदन्वयेऽपि नाकाङ्क्षा।

* * * *

Colophon:

इति पेत्तादीक्षितविरचिते तर्कसारे वेदापौरुषेयत्ववादः समाप्तः॥

End:

एवं विधिपदवाच्यत्वं कार्यत्वविशिष्टा वृत्तिः विधिपदवाच्ये . . त् अवृत्तिवदेवेति युक्तयस्तु पूर्वमेवोक्ता एवेति दिक्॥

Colophon:

इति पेत्तादीक्षितविरचिते तर्कसारे अपूर्ववादः संपूर्णः॥

अर्थवादवादः। नन्वार्थवादिकं क्वचित् फलमित्यसंगतम्, अर्थवादानां सामानाधिकरण्यात् कार्यान्वित एव पदानां शक्त्यसाधारणात्।

* * * *

ताद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन वा पुनः। देवतासंगतिस्तत्र दुर्बलं तु परं परम्॥ इति। अत्र यदग्नये च प्रजापतये च . . . . तत्र तद्धितान्तस्य साक्षाद्देवतात्वप्रतिपादकत्वात् प्राबल्यम्। चतुर्थीस्थले च।

R. No. **1292.**

Paper. 11 × 9½ inches. Foll. 63. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from an injured paper MS. of M.R.Ry. V. Raṅganāthācārya of Tiruvadi.

शब्दरत्नटीका.

ŚABDARATNAṬĪKĀ.

A commentary on Haridīkṣitā's Śabdaratna, which has been described under No. 1403 of the D.C.S. MSS., Vol. III.

Begins in the middle of the Adantapuṁliṅga and breaks off in the Kārakaprakaraṇa.

Beginning:

तृतीयासमासे । लक्षणपरिभाषया तृतीयाशब्दमुच्चार्य विहितस्यैव ग्रहणं स्यात् इत्यतस्तस्य भावमाह—यदन्तत्वेति । करोति द्वारेति । शाकपार्थिव इत्यत्र प्रियशब्दद्वारेति बोध्यम् । समासस्तु विशेषणं विशेष्येणेति भावः । यत्र क्वापीति । पूर्वत्र परत्र वेत्यर्थः । समासविशेषग्रहणे हि सूत्रे प्रथमार्थे सप्तमीति भावः ।

End:

इत्यर्थादिति । श्रुधातोर्निःसरच्छब्दग्रहणे लक्षणेति भावः । अनिष्टत्वबोधनादिति । अन्यथा उपयोगग्रहणं व्यर्थं स्यादिति भावः ॥

R. No. 1293.

Paper. 11½×9 inches. Foll. 29. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. Raṅganāthācārya of Tiruvadi.

सिद्धान्तसारासारविवेचनम्.

SIDDHĀNTASĀRĀSĀRAVIVĒCANAM.

A treatise in support of the Dvaita school of the Vēdānta: by Vijayīndrabhikṣu. The tenth chapter of this work, which portion alone is found in this manuscript, is an adverse criticism of Rāmānuja's Viśiṣṭādvaita Vēdānta.

Contains the tenth chapter.

Beginning:

इदानीं रामानुजमतं निराक्रियते । रामानुजमतानुवर्तिनोऽप्येवमाहुः—प्रमाविषयः प्रमेयम् । प्रमाणस्य प्रमेयत्वं न पृथक्परिगणनम् । तच्च द्विविधम्—द्रव्यमद्रव्यं चेति । द्रव्यं च द्विविधम्—जडमजडं चेति ।

* * * *

मोक्षः निरतिशयब्रह्मानन्दावाप्तिरूपः, न तु दुःखहेतूच्छेदरूपः, तावन्मात्रस्यापुरुषार्थत्वादिति । अत्रोच्यते—न तावत् द्रव्याद्रव्यविभागो युक्तः, अद्रव्यत्वेनाभिमतानां रूपादीनां तदाश्रयद्रव्याणां चाभिन्नत्वात्, नीलो घट इत्यादिप्रतीत्या तदभेदस्यावश्याङ्गीकर्तव्यत्वात् । न हि सामानाधिकरण्यप्रतीतिर्दृष्टचरी ।

End :

ब्रह्मणोऽप्यनित्यज्ञानेच्छादिसद्भावः भगवत्प्रीतिकोपयोरेव धर्माधर्मरूपत्वं वर्णानामुत्पत्तिविनाशौ संसर्गाभावस्याधिकरणरूपत्वमित्यादीनि तन्मतसिद्धप्रमेयान्तराण्यपि निरसनीयानि । तन्निरासश्च ग्रन्थान्तरे द्रष्टव्यः ॥

Colophon :

इति विजयीन्द्रभिक्षुविरचिते सिद्धान्तसारासारविवेचने रामानुजमतनिरासो दशमः ॥

मत्तेभं मशकोऽपि जेष्यति यदि स्यादेवमादिर्जनः
सारासारविवेचने प्रभवति भ्रान्तेन किं तेन नः ।
श्रीरामानुजयोगिराजगुरुभिर्दृष्टेऽपि निर्धारिते
श्रीबोधायनवाक्यकारवचनैः श्रीमत्यबाधे मते ॥

R. No. **1294.**

Paper. 11 × 9½ inches. Foll. 70. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambākam.

आनन्दतारतम्यखण्डनम्.

ĀNANDATĀRATAMYAKHAṆḌANAM.

Similar to the work described under No. 4869 of the D.C.S. MSS., Vol. X. By Aṇṇayācārya, son of Tātayārya of Ṣaṭhamarṣaṇagōtra and Vēṅkaṭāmbā and brother and disciple of Vēṅkaṭārya.

Complete.

Beginning :

जिज्ञासोर्विषयं फलं च विपुलं यस्य स्वरूपं महत्
सत्यं ज्ञानमनन्तमङ्गलगुणं नित्यानवद्योन्नति ।
तद्ब्रह्मेत्यभिधीयमानमनिदंपूर्वैर्वचोभिः परं
य(व)स्त्वाविष्कुरुतां शुभानि कमलानित्यानुषक्तं मम ॥

वाणी जयति गुरूणां वेणी कृतकेतरोक्तिसुदतीनाम् ।
नाणीयस्यहितेषु कृपणी कथकेषु मुक्तिनिःश्रेणी ॥

माध्वानामध्वानं शृणुत जनः श्रितमभव्यमध्वानम् ।
माध्वीकामृतधारासाध्वीं गिरमाद्रियध्वमार्याणाम् ॥

अधिकरणविहरणदशास्वधिकरणे दधतु महिरो(मेदुरा)मोदम् ।
महतां यतिपतिघटितं श्रुतिनय[न]संनहनगहनगम्भीराः ॥

इह खलु निगमशतशिखरमुखरितनिखिलजगदवनभवनमद(थ)नमुख-लीलादक्षिणः स्वेतरविलक्षणैकलक्षणः

* * * *

बादरायणात्मनावतीर्य स्वार्थयाथार्थ्यानवबोधकृततिरोधिमपवर्गमनर्गलेन तद्बोधप्रतिष्ठापनेन नेदिष्ठं चिकीर्षुः अथातो ब्रह्मजिज्ञासेत्यादीनि सूत्राणि प्रणिनाय । तस्यैतस्यापवर्गस्य त्रिवर्गगततरतमताकृतदौर्गत्यदवीयसीं निसर्गसुन्दरतां निरूपयितुं प्रकरणमिदमारभ्यते । तथाप्यविद्याविनिर्मोकपरिकर्मितोऽनवधिकातिशयानन्त(न्द)ब्रह्मानुभूतिसुधासागरनिमज्जनोन्मज्जनात्मा क्रीडाविशेषोऽपवर्ग इति सिद्धम् । तत्रापि स्वस्वमतश्रद्धासिद्धाः सिद्धान्ता बहुविधाः । तत्रापि मुक्तानां ब्रह्मानन्दतुल्यस्यानन्दस्य प्राप्तिरस्तीति भाष्यकाराणां सैद्धान्तिकी सरणिः । तदपरे न क्षमन्ते । तथाहि—कथं चतुर्मुखादीनां मनुष्याणां च ब्रह्मोपासनानामेकरूपा फलप्राप्तिः, साधनतारतम्यानुगुण्येन फलतारतम्यावश्यंभावात् ।

End:

किंच सर्वकर्मक्षये सति आनन्दवृद्धेरयत्नसिद्धतया मदुक्तरीत्या सिद्धेरपरोक्षज्ञानेनानुष्ठितं मुक्तकर्मादि मुक्तिगतदुरितक्षयार्थमेवेति दुष्कर्मवत्यपि काचिन्मुक्तिस्त्वयाङ्गीकार्या स्यादेव । तस्मान्न केनापि प्रमाणेन मुक्तानामानन्दतारतम्यं सिध्यतीति निष्कण्टकोऽयं घण्टापथः ॥

Colophon:

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तप्रमुखविद्यानिषद्यायितहृदयकमलतातयार्यनन्दनस्य वेङ्कटाम्बागर्भशुक्तिमौक्तिकमणेः षड्दर्शनीवल्लभसर्वतन्त्रस्वतन्त्रवाजपेययाजिस्वाग्रजवेङ्कटार्यचरणपरिचरणसेवालब्धसर्वशास्त्रस्य चतुर्विधकवितानिर्वहणशीलस्य पूर्वोत्तरमीमांसापारावारपारीणस्यान्वीक्षकीव्याकरणशिक्षितमतेरण्णयाचार्यस्य कृतिषु मुक्तानामानन्दतारतम्यखण्डनं नाम प्रकरणं संपूर्णम् ॥

R. No. **1295.**

Paper. 11 × 9½ inches. Foll. 33. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambākam.

नयमणिकलिका.

NAYAMAṆIKALIKĀ.

An unfavourable criticism of the view of the Dvaita school of the Vēdānta that the syllable Ōm forms part of the first Sūtra of the Brahmasūtras; by Śrīnivāsa, son of Śrīnivāsa Tātācārya and grandson of Aṇṇayācārya of Śrīśaila family. He is also the author of Tattvamārtāṇḍa.

Complete.

Beginning:

मदनकदनवेल्लद्वल्लवीजाललोलत्कुचतटघटनोद्यत्कुङ्कुमालंकृताङ्गः ।
निगमनिकरचूडाक्रीडलीलानुकूलः कलयतु शुभकामी . . . मुदं नः ॥
यद्यपि चेदं प्रकरणमुपयुक्तं चन्द्रिकानिराकरणे ।
तथापि प्रथमे सूत्रे प्रण(व)वदाप्नोति किं न पार्थक्यम् ॥

इह कतिचिदतिसाहसिकाः प्रथममथातो ब्रह्मजिज्ञासेति ब्रह्ममीमांसोपक्रमसूत्रे सकलैः पठ्यमानमोंकारं तदवयवमभिदधति । तदेतत्प्रमाणपथानुवर्तिनो नानुमन्यन्ते । तथाहि—तद्ध(स्य) तदवयवत्वे न तावत् प्रत्यक्षं प्रमाणम्, असंभवात् । शब्दस्वरूपमात्रग्राहिणः श्रोत्रस्य साधुत्वासाधुत्वयोरिवावयवत्वानवयवत्वयोरुदासीनत्वात् ।

End:

तस्माद[स्माद]प्रामाणिकमिदं ध्वान्तमतानुवर्तिनामवयवत्वकथनमिति सर्वं समञ्जसम् ॥

श्रीमच्छ्रीशैलवंशाम्बुधिशशिकमलावासतातार्यपुत्रः
पौत्रश्चित्रापदानप्रगुणगुणनिधेरण्णयाचार्यनाम्नः ।
स्वाचार्याचार्यसेवासमधिगत(म)तोदन्तवेदान्ततत्त्वं(त्त्वो)
व्यातानीच्छ्रीनिवासो नयमणिकलिकां ध्वान्तदौर्गत्यहन्त्रीम् ॥

Colophon:

इति श्रीनिवासाचार्यस्य कृतिषु नयमणिकलिका समाप्ता ॥

R. No. 1296.

Paper. 12 × 9⅝ and 11 × 8⅜ inches. Foll. 355. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambākam.

स्मृतिसिन्धुः.

SMṚTISINDHUḤ.

A work purporting to be a digest of the essential points of the various works on Smṛtis. By Śrīnivāsa, a disciple of Kṛṣṇa.

Complete.

Beginning:

श्रीमत्कृष्णपदाब्जेनश्रीनिवासविपाश्रिता ।
स्मृतीनां सारमालोक्य स्मृतिसिन्धुर्वितन्यते ॥

'स्नात्वा कर्माणि कुर्वीत' इति स्मरणात् स्नातस्यैव प्रायश्चित्तादिकर्मण्यधिकारात् वारुणस्नाने अशक्तो मुमूर्षुः ब्राह्मादिस्नानमाचरेत्। तदाह याज्ञवल्क्यः—

असामर्थ्याच्छरीरस्य वैषम्याद्देशकालयोः ।
स्नाना(ना)न्येतानि तुल्यानि मन्त्रादीनि यथाफलम् ॥

यमः—

मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च ।
मानसं यौगिकं चेति सप्त स्नानान्यनुक्रमात् ॥

मन्त्रस्नानम्—

भुवि मूर्ध्नि तथाकाशे मूर्ध्न्याकाशे तथा भुवि ।
आकाशे भुवि मूर्ध्नि स्यान्मन्त्रस्नानं प्रकीर्तितम् ॥

इति। तत ऊर्ध्वपुण्ड्रं वा त्रिपुण्ड्रं वा उभयमपि वा स्वाचारं बिभृयात्।

मरीचः—

सर्पं दृष्ट्वा यथा लोके दर्दुरा भयविह्वलाः ।
ऊर्ध्वपुण्ड्राङ्कितं तद्वत्कम्पन्ते यमकिङ्कराः ॥

विष्णुः—

ऊर्ध्वपुण्ड्रधरो मर्त्यो म्रियते यत्र कुत्रचित् ।
श्वपाकोऽपि विमानस्थो मम लोके महीयते ॥

* * * *

अत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यं संप्रददे धेनुमिमामुत्क्रान्तिसंज्ञिकाम् ॥

End:

'विभक्ता वाविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः ।
मघासु च ततोऽन्यत्र नाधिकारः पृथग्विना ॥'

इति। पृथग्विना विभागं विनेत्यर्थः। यत्तु स्मर्यते—कृष्णपक्षे त्रयोदश्याम्.

R. No. 1297.

Paper. 10¾ × 8⅝ inches. Foll. 359. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of Vaḍakkuttirumālikai in Āḻvārtirunagari, a place in the Tinnevelly district.

तत्त्वचिन्तामणिप्रकाशव्याख्या—तर्कचूडामणिः.

TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ: TARKACŪḌĀMAṆIḤ.

By Dharmarājādhvarin. Same work as that described under No. 4102 of the D.C.S. MSS., Vol. VIII.

Contains the Śabdakhaṇḍa.

Incomplete.

Beginning:

योगिनां गतिमापन्ना यत्प्रसादेन कोसलाः ।
कर्मोपासनविज्ञानहीनास्तं राघवं भजे ॥

यद्भक्तिप्लवमासाद्य महाकाव्याम्बुधिं बुधाः ।
तरन्त्ययत्नतो लोके तं वन्दे गणनायकम् ॥

धर्मराजाध्वरीन्द्रेण बह्वृचेन विपश्चिता ।
शब्दखण्डप्रकाशस्य विवृतिः क्रियतेऽधुना ॥

निर्विघ्नसमाप्त्यर्थमिष्टदेवतां नमस्करोति—व्यालोलेति । चिकीर्षितं प्रतिजानीते—आलोच्येति । शब्दनिरूपणस्योपमानिरूपणानन्तर्ये हेतुमाह—उपमानस्येति । तथापीति । शब्दत्वावच्छिन्नसर्वशब्दस्य नोपमानोपजीव्यत्वं सादृश्याप्रतिपादकवाक्यानां तदभावात् । उपमानत्वावच्छिन्नं तु सर्वं शब्दं प्रत्युपजीव्यमिति(उप)मानतावच्छेदकावच्छिन्नस्य शब्दोपजीव्यत्वम् । शब्दस्य तु सादृश्यप्रतिपादकवाक्यत्वरूपशब्दत्वावान्तरधर्मावच्छेदेनैवोपमानोपजीव्यत्वम् । न तु विभाजकोपाधिरूपशब्दत्वावच्छेदेनेति भावः ।

End:

शबरस्वामिसंमतिमाह—तदुक्तमिति । विधौ विधायके वाक्ये परे लक्ष्यः शब्दार्थो नास्तीत्यर्थः । शबरवचनमनादरणीयं प्रायिकाभिप्रायं वेत्याशयेनाह—नेति । पूर्वं लक्षणायां लक्षणीयस्य विशेषणत्वनियमो निरस्तः । इदानीं विशेषणत्वमभ्युपेत्याप्याह—यजिपदेनेति । यथातथेति विशेषणतया विशेष्यतया वेत्यर्थः । ननु स्वर्गकामयागयोरन्वये.

R. No. **1298.**

Paper. 10½ × 8⅝ inches. Foll. 75. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. V. Raṅganāthācārya of Tiruvadi.

भेदतरङ्गिणी.

BHĒDATARAṄGIṆĪ.

A treatise in support of the view of the Dvaita-Vēdānta that the individual soul is different from the Supreme Brahman. It unfavourably criticises the doctrine of the Advaita-Vēdānta. By Raṅganātha, son of king Vēdājibhāskara and brother of Subhānu Rao and disciple of Vēṅkaṭārya.

The author pays his respect in the beginning to his Gurus Vēṅkaṭacārya, Subrahmaṇya and Satyapūrṇa and to his elder brother Kōnēri.

Complete.

Beginning:

वेङ्कटेशपदाम्भोजस्फुरत्परागपङ्क्तयः ।
पवित्रयन्तु मां मूर्ध्नि धृता नित्यं शिवादिभिः ॥

नमामि कृष्णं सततं हरेशं श्रियः पतिं कारणकारणं च ।
प्रातः सदा बालकमञ्जनाभं प्रकाशमानं कटिसूत्रहारैः ॥

* * * *

आनन्दतीर्थपादाब्जराजत्परागराजयः ।
सेव्यमानाः सुरैर्मूर्ध्नि मूर्खं पण्डितयन्तु माम् ॥
नमामि सत्यपूर्णं तं सदःपाण्डित्यशालिनम् ।
सदा रामपदासक्तं गुरुं गुरुमिवापरम् ॥
नत्वा सर्वगुणाधारं वेदं च जनिकारणम् ।
पतिव्रताधुरीणां च सोदरीं जननीमपि ॥
गुरुं श्रीवेङ्कटाचार्यं द्वैतागमविशारदम् ।
विनयादिगुणोपेतं तथा कोनेरिमग्रजम् ॥
सुब्रह्मण्यं चतुःशास्त्रपारावारविहारिणम् ।
प्रीत्यर्थं वेङ्कटेशस्य देवदेवशिखामणेः ॥
तुष्ट्यर्थं सत्यपूर्णस्य यतेः पाण्डित्यशोभिनः ।
श्रुतीनां भेदपरतां साधयेऽहं यथामति ॥

अत्र मायावादिनस्तु द्वा सुपर्णेति श्रुत्या न जीवेश्वरयोर्भेदसिद्धिः, तस्याः अन्तःकरणजीवपरत्वादित्याहुः । तदमङ्गलम्, द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीति इति श्रुतेः जीवेश्वरभेदपरताया एव स्वरसत्वात् ।

End :

तथाच भगवान्नारायणः सकलनिगमज्ञेयः जडाजडभिन्नः सच्चिदानन्द-शरीर : सर्वोत्कृष्टः ब्रह्मशिवेन्द्रादिवन्दितचरणनलिन इति वेदान्तिनां पन्थाः ॥

Colophon :

इति श्रीमदाचान्तपरसिद्धान्तन्यायामृतवेङ्कटाचार्यलब्धवेदान्तरहस्येन वाग्वैखरीनिस्त्रिंशखण्डितनिखिलाद्वैतख(प)ण्डितसुभानुरावार्यसहोदरतालब्ध-

विद्यावैशद्येन शौर्यौदार्यादिगुणज्ञानसंदानितदिगन्तविश्रान्तयशोबृन्दारणीप्रकारस्थवेदाजीभास्करभूपालतनयरङ्गनाथेन विदुषा विरचितेयं भेदतरङ्गिणी समाप्तिमगमत् ॥

R. No. **1299.**

Paper. 11 × 9½ inches Foll. 67. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. R. Kṛṣṇamācāriyar of Madura

श्रीतत्त्वरत्नम्.

ŚRĪTATTVARATNAM.

A treatise written to support the view of the Vaḍakalai sect of Śrī-Vaiṣṇavas that Goddess Lakṣmī is as supreme as God Viṣṇu and has co-extensive powers with Him. According to their view Lakṣmī is looked upon as the means, medium and also the goal of salvation.

The author salutes Pādukāsēvakarāmānujasvāmin and Vēṅkaṭadēśika, son of Varadārya and grandson of Vēṅkaṭārya of Vādhūlagōtra.

Incomplete.

Beginning:

यच्छक्त्या संविशिष्टो हरिरखिलतनुर्जङ्गमाजङ्गमानां
जन्मस्थित्यन्तलीलामनुभवति दधत्सर्वभूतेश्वरत्वम् ।
शेषित्वोपायताढ्यत्रियुगगुणजुषे सर्वभूतेश्वरायै
लक्ष्म्यै तद्विष्णुपत्न्यै शुभपदवपुषे कुर्महे सत्प्रणामान् ॥
जयन्ति श्रीमतो विष्णोर्जगद्रक्षणसंमुखाः ।
मूर्ता इव दयापूरा ह्यस्मदाचार्यपङ्क्तयः ॥
स जीयात्पादुकासेविरामानुजयतीश्वरः ।
चतुस्तन्त्रेऽपि यच्छिष्यैः शास्त्रकारायितं बुधैः ॥
वाधूलवेङ्कटार्यस्य पौत्रो वेङ्कटदेशिकः ।
वरदार्यात्मजः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

स्वाम्युपाय उपेयश्च श्रीमान् नारायणः सदा ।
श्रियः सर्वेशितृत्वादि मन्मुखाद्दर्शयिष्यति ॥

इह खलु श्रियः जीवकोटिप्रविष्टत्वमीश्वरकोटिप्रविष्टत्वमुभयबहिर्भूतत्वं वेति विचार्य सर्वेश्वरत्वादिकं स्थापयिष्यते । तत्र जीवकोटिप्रविष्टत्वमेव आधेयत्वविधेयत्वशेषत्वाणुत्वैकैकमात्रघटितचेतनत्वरूपजीवलक्षणचतुष्टयस्य तादृशैकैकमात्रघटिताहंत्वरूपजीवलक्षणचतुष्टयस्य च सत्त्वात् ।

* * * *

लक्ष्म्या अणुत्वेन जीवत्वमिति केचित् । अन्ये तु—

यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ।
त्वया च विष्णुना चाम्ब जगद्व्याप्तं चराचरम् ॥

End :

पाराशर्यविजये च परपक्षचतुष्टयमुपन्यस्य चरमपक्षं प्रक्रम्योक्तम्—पापीयानयं तुरीयपक्ष इति । तस्मान्नास्य चरमपक्षत्वेन स्वपक्षत्वस्वध्यवसानम् । अतः सर्वभूतेश्वरवचनसाम्यं दुर्वचमिति स्वाभाविकमेव श्रियः श्रीशं प्रति शेषत्वमिति सिद्धम् ॥

R. No. 1300.

Paper. 11 × 9½ inches. Foll. 379. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. belonging to the Government Oriental Library, Mysore.

Foll. 193*b* and 194 are left blank.

लघुचन्द्रिकाव्याख्या.

LAGHUCANDRIKĀVYĀKHYĀ.

A commentary on Brahmānandasarasvatī's Laghucandrika, which itself is a commentary on Madhusūdanasarasvatī's Advaitasiddhi and which has been described under No. 4531 of the D.C.S. MSS., Vol. IX.

Breaks off in the Jaḍatvanirukti in the first Paricchēda.

Beginning:

श्रीविट्ठलं गणेशानं शिवौ वाग्देवतां गुरून् ।
प्रणम्य चन्द्रिकाव्याख्यां विदधाति यथामति ॥

श्रीपरब्रह्मरूपविषयप्रयोजनं परममङ्गलरूपमाह मूले—मायेति । श्रुतिशिखोत्थाखण्डधीगोचरः श्रुतीनां कर्मोपासनाकाण्डरूपाणामुपकार्यत्वाच्छिखेव मुख्यं यत् महावाक्यं तज्जन्यसंसर्गाविषयकमनोवृत्तिगोचरो विष्णुर्व्यापकं जीवस्वरूपं मोक्षं प्राप्त इव स्वयं विजयते प्रकाशसंबन्धं विनैव प्रकाशते प्रकाशाभिन्न इत्यर्थः ।

* * * *

इष्टदेवतानमस्काररूपं मङ्गलं विघ्नविघातायाचरन् शिष्यशिक्षायै निबध्नाति टीकायाम्—नम इति । नवघनश्यामः अत एव कामेनापि कामितो यो देहस्तद्वते इत्यर्थः ।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संबन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥

End:

एवं मूलोक्तमनिर्वचनीयरजतसिद्धिं स्फुटयति—तथाचेति । यादृशं पुरोवर्तिशुक्तितादात्म्यापन्नम् । भ्रमेण इदं रजतमिति भ्रमेण । विषयी क्रियते इदं रजतं जानामीत्यनुभवबलादिति शेषः । उक्तभ्रमविषयताश्रयत्वेन भ्रमप्रत्यक्षेण गृह्यते इति समुदायार्थः । तादृशं पुरोवर्तितादात्म्यापन्नमेव । ननु अबाधितः प्रमानुभव एव विषयसाधकः, न तु बाधितो भ्रम इत्यत आह—ज्ञानस्येति.

R. No. **1301.**

Paper. 11 × 8½ inches. Foll. 32. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Śrīnivāsavarada Tātācāriyar of Villiyambākam.

परमुखचपेटिका.

PARAMUKHACAPĒṬIKĀ.

Similar to the work described under No. 4926 of the D.C.S. MSS., Vol. X.

By Mahāmahōpādhyāya Śriśaila Śrī-Kṛṣṇa Tātācārya, son of Vēṅkaṭaguru and a descendant of Lakṣmīkumāra Tātācārya and disciple of Śrīnivāsayati.

Complete.

Beginning :

रघुवंशदुग्धजलधौ जातं संतानमाश्रये कमपि ।
अतितुङ्गादपि यस्माद्विनतैरग्र्यं फलं करग्राह्यम् ॥
सुरभितसमस्तलोकं संयमिवरचरणचन्दनं सेवे ।
(छायां श्रयन् यदीयां) स्थाणुमपर्णाश्रयं लघूकुरुते ॥
प्राचीनवाचानिचयाञ्चलार्यमाचान्तमोचामदहृद्यवाचम् ।
दुर्वारगर्वान् कुदृशोऽतिखर्वान् कुर्वाणमीडे कुलदैवतं नः ॥
श्रीश्रीवासयतीन्दुर्विलसतु सर्वज्ञशेखरो हृदये ।
यत्पादसङ्गलेशादपसरति तमः प्रकाशते सर्वम् ॥
लक्ष्मीकुमारतातयदेशिकवंशाब्धिशीताकिरणस्य ।
वेंकटगुरोस्तनूजः कृष्णः परमुखचपेटिकां कुरुते ॥

यदुक्तं नारायणशब्दः शिवपरः, शिववृत्तिधर्मावच्छिन्नप्रतिपादकत्वात्, यथा शिवशब्द इति । तत्र किमिदं शिवपरत्वं शिववाचकत्वं वा, शिवबोधौपयिकाकाङ्क्षाशालित्वं, शिवे साधुत्वं वा, शिवबोधौपयिकतात्पर्यविषयत्वं वा, अन्यद्वा किंचित् । नाद्यः, सिद्धसाधनात् ।

End :

इत्थं च शिवोत्कर्षपरपुराणादीनां शारीरकस्मृत्यधिकरणनिश्चलीकृतविरोधाधिकरणन्यायेन 'अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम्' इति मात्स्यवचनमप्रमाणमेवेति सर्वं समञ्जसम् ॥

श्रीकृष्णतातदासं द्वारीकृत्येह देशिकैः कलिता ।
भूयाद्भागवतानां प्रीत्यै परमुखचपेटिका सेयम् ॥

Colophon :

इति श्रीशैलकुलतिलकश्रीमहामहोपाध्यायश्रीकृष्णतातदासस्य कृतिषु परमुखचपेटिका संपूर्णा ॥

R. No. **1302.**

Paper. 11 × 8½ inches. Foll. 514. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. V. Raṅganāthācārya of Tiruvadi.

Bound in two volumes.

न्यायामृतव्याख्यानम्—लक्ष्मीनाथीयम्.

NYĀYĀMṚTAVYĀKHYĀNAM : LAKṢMĪNĀTHĪYAM.

A commentary on Vyāsayati's Nyāyāmṛta, which is described under No. 4796 of the D.C.S. MSS., Vol. X : by Lakṣmīnātha, a disciple of Yādavēndra and Lakṣmīvallabhayōgin. In the beginning the author pays his respect to a number of teachers of the Dvaita school of the Vēdānta.

Breaks off in the Viśēṣasamarthanaprakaraṇa in the second Paricchēda.

Beginning :

कल्याणगुणसंपूर्णं कामितार्थप्रदायिनम् ।
कृष्णं श्रीव्यासतीर्थार्यवरदं सततं भजे ॥

वेदवेदार्थतत्त्वज्ञं पूर्णबोधं नमाम्यहम् ।
यस्य संस्मृतिमात्रेण पुमान् प्राज्ञोऽभिजायते ॥

श्रीमध्वमुनिसिद्धान्तसंप्रदायप्रवर्तकम् ।
श्रीपद्मनाभतीर्थार्यमाश्रये ज्ञानसिद्धये ॥

आनन्दतीर्थमुनिना सिद्धान्तं वैष्णवं मतम् ।
येन प्रकाशितं वन्दे जयतीर्थार्यसद्गुरुम् ॥
श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनदीक्षितम् ।
शिष्याज्ञानतमश्चण्डभानुं व्यासगुरुं नुमः ॥
यदनुग्रहमात्रेण पूर्णोऽहं सर्वसंपदा ।
श्रीयादवेन्द्रमनिशं वन्दे विद्यागुरुं मम ॥
यन्नामस्मरणं लोके प्रतिवादीभकेसरी ।
तं नौमि रामचन्द्राख्यं भिक्षुमक्षोभ्यवैष्णवम् ॥
यस्य प्रसन्नो भगवान् वेदव्यासो महामुनिः ।
लक्ष्मीवल्लभयोगीन्द्रं गुरुराजमहं भजे ॥
व्यासतीर्थाख्यदासेन लक्ष्मीनाथाख्यभिक्षुणा ।
न्यायामृतस्य टीकेयं क्रियते प्रीतये हरेः ॥
न्यायामृतस्य भावोऽयं प्रौढानामपि दुर्गमः ।
व्यासतीर्थार्यकृपया मया स्वल्पः प्रकाश्यते ॥
बालवाक्यं यथा पित्रोर्न दूष्यं ग्राह्यमेव च ।
सतामपि च मद्वाक्यं ग्राह्यमेव मुदा तदा(था) ॥
बालानां च सुखेनैव ज्ञानप्रवचनाय च ।
अर्थोऽयं प्रतिवाक्यं तु लिख्यते च यथामति ॥

श्रीमत्परमहंसपरिव्राजकाचार्यः श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापनसमर्थः पदवाक्यप्रमाणपारावारपारीणः सर्वतन्त्रस्वतन्त्रः पूर्णबोधमताम्बोधिपूर्णचन्द्रः

* * * *

श्रीव्यासतीर्थाख्यमुनिः सकलसज्जनानुकम्पया सकलसच्छास्त्रन्याय-गर्भन्यायामृताख्यं ग्रन्थं कर्तुकामस्तस्य निर्विघ्नेन परिसमाप्त्यर्थं प्रचय-कैवल्याद्यखिलपुरुषार्थसाधनत्वाय चावसितशिष्टाचारपरम्पराप्राप्तं स्वेष्ट-

देवता(नमस्कार)रूपमङ्गलं कुर्वाणः शिष्यशिक्षायै ग्रन्थादौ निबध्नाति—निखिलेति। लक्ष्मीसहायं नवजलधरकायं कृष्णं नौमीति योजना। नौमीत्युत्तमपुरुषप्रयोगादहमिति लभ्यते।

End:

ननु भङ्गमारभ्य एतावता ग्रन्थेन विशेषः समर्थितः। सोऽप्यनुपपन्नः। विशेषो न वस्त्वभिन्नः भिन्नो वा, नाद्यः, वस्तुनि विशेष इत्याधाराधेयभावादिव्यवहाराभावप्रसङ्गात्। न द्वितीयः, अनवस्थापत्तेरित्याशङ्क्य निराकरोति—अयमेवेति। अर्थापत्तिसिद्ध एवेत्यर्थः। वस्त्वभिन्न-इति। अतो नानवस्थेति भावः। ननु वस्तुनि विशेष इत्याद्याधाराधेयभावादिव्यवहारो न स्यादित्यत आह.

Foll. 461*a*—362*a* give the table of contents of the first volume.

R. No. **1303.**

Paper. 11 × 9½ inches. Foll. 59. Lines, 20 in a page. Telugu. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. D. Yajñanārāyaṇa Śāstri of Challapalli in the Kistna district.

सुदर्शनसंहिता.

SUDARŚANASAṀHITĀ.

Same work as that described under No. 8148 of the D.C.S. MSS., Vol. XV.

Contains Paṭalas 1—31.

The headings of the Paṭalas 1 to 27 are given under No. 8148 referred to and the headings of Paṭalas 21 to 38 are given below:—

२८. मन्त्रसंग्रहणम्.
२९. हनुमदष्टाक्षरप्रयोगः.
३०. प्रयोगयन्त्रोद्धारः.
३१. पञ्चवक्त्रयन्त्रप्रयोगाविधिः.

End:

संमार्ज्य पुनरालिख्य प्रतिमां यन्त्रमुत्तमम्।
मन्त्रयन्त्रोक्तसंदर्भे साध्यनाम लिखेद्ध्रुवम्॥

Colophon:

इति श्रीमत्सुदर्शनसंहितायामाञ्जनेयप्रशंसायां पञ्चवक्त्रयन्त्रप्रयोगविधिर्नाम द्वा(एक)विंशः पटलः ॥

R. No. **1304.**

Paper. 10⅝ × 9½ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. S. Gōpālācāryar of Villiyambākam.

प्रधानप्रतितन्त्रदर्पणम्.

PRADHĀNAPRATITANTRADARPAṆAM.

A treatise showing that all words are capable of signifying God Viṣṇu by force of conveying that meaning by denotation: by Śrīśaila Śrīnivāsa, author of the Tattvamārtāṇḍa and son of Śrīnivāsa Tātācārya and Lakṣmyambā and disciple of Kauṇḍinya Śrīnivāsadīkṣita and brother and disciple of Aṇṇayācārya.

Complete.

Beginning:

अशेषदोषैकमुषे विदुषां श्रेयसां पुषे ।
चिदचिद्वस्तुवपुषे नमस्कुर्मो मधुद्विषे ॥

स्वापृथक्सिद्धसर्वार्थस्तद्वाचिपदवाच्यताम् ।
गुणिव्यक्त्यादिवद्बिन्दन्मुकुन्दोऽस्तु मुदे मम ॥

इह खलु भगवान् बादरायणः सर्वे वेदा यत्पदमामनन्ति सर्वे वेदा यत्रैकं भवन्तीति श्रुतिप्रसिद्धं वेदैश्च सर्वैरहमेव वेद्यः इति गीतोपबृंहितं भगवतः सर्ववेद्यत्वं प्रतितिष्ठापयिषुः

* * * *

भगवतश्चराचरात्मककृत्स्नप्रपञ्चवाचिशब्दबोध्यत्वं मुख्यया वृत्त्येति वक्तुं चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वादित्याह। तत् व्यवस्थापयितुं प्रकरणमिदमारभ्यते । वेदान्तेषु तावत् सर्वजगत्कारणभूतं सदेवेदं ब्रह्मैवेदमात्मैवेदं पुरुष एवेदं सर्वमित्यादिषु सामान्यतः तत्त्वमसि ब्रह्मास्मीत्यादिषु विशेषतः प्रपञ्चसामानाधिकरण्येन व्यपदिश्यते ।

End :

अतस्ताद्विषये वैदिकीं प्र(ति)पत्तिमुपजीव्य प्रवर्तमाना वैदिका लौकिकाश्च व्यवहारा नापराध्यन्ति। यथा शास्त्रय . . णादिवत् तत्तत्कार्यवर्जितोऽपि वर्णनिर्देशो नापराध्यति, तेन विना तदनिष्पत्तेः। तद्वादिहापीति सर्वमवदातम्॥

Colophon :

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासतातार्यतनुजनुषा लक्ष्म्यम्बागर्भशुक्तिमुक्ताफलवपुषा कौण्डिन्यश्रीनिवासदीक्षितकटाक्षवीक्षासंलब्धमीमां . . . . मतिविभवपुषा निजाग्रजाण्णयार्यदीक्षितपरिचर्यासमासादितचतुस्तन्त्रीविनोदजुषा श्रीनिवासविदुषा विरचितं प्रधानप्रतितन्त्रदर्पणाख्यं प्रकरणं समाप्तम्॥

R. No. **1305.**

Paper. 11½ × 9 inches. Foll. 70. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Nārāyaṇa-Śāstri of Tiruvadi.

व्याकरणक्रोडपत्रम्.

VYĀKARAṆAKRŌḌAPATRAM.

Foll. 1*a*—69*a*.

A critical dissertation on some of the Sūtras of Pāṇini's Aṣṭādhyāyī.

Complete.

Beginning :

नदीसंज्ञासूत्रविचारः।

* * * *

वर्णग्रहणं च सर्वत्रेति तदन्तविधिः। स्त्रियमाचक्षाते इति स्त्र्याख्यौ। आख्याग्रहणं स्त्रीत्वविषयासिद्ध्यर्थम्। नित्यस्त्री . . . . रान्तोकारान्तौ नदीसंज्ञौ भवत इति सूत्रार्थः। कुमार्यै गौर्यै शार्ङ्गरव्यै ब्रह्मबन्ध्वै इत्यादिकमुदाहरणम्।

End :

एवं चाभेदस्य संबन्धत्वाभावसाधकानि बहून्यपि दूषणान्य . . . . . त्यवगन्तव्यम् । अतएव नामार्थयोरभेदान्वय इत्यादिकं संगच्छते ॥

Colophon :

इति व्याकरणक्रोडपत्रं समाप्तिमगमत् ॥

Foll. 69*b* and 70 contain the table of contents of the work.

R. No. **1306.**

Paper. 11 × 9½ inches. Foll. 188. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Tāṅgal Rāmaswāmi Śāstriyar of Viriñcipuram.

भगवद्गीतालघुव्याख्या.

BHAGAVADGĪTĀLAGHUVYĀKHYĀ.

A short commentary on the Bhagavadgīta written in accordance with the doctrines of the Advaita school of the Vēdānta : by Rāghavānandatīrtha, a disciple of Rāmacandrēndrasarasvatī.

Complete.

Beginning :

अज्ञानतिमिरान्धस्य(. . . .) श्रीगुरवे नमः ॥
महेशं दक्षिणामूर्तिं मन्दहाससमन्वितम् ।
अर्धेन्दुशेखरं पूर्णं वन्दे गौरीशमच्युतम् ॥
नारायणः परोऽव्यक्तादण्डमव्यक्तसंभवम् ।
अण्डस्यान्तास्त्विमे लोकाः सप्तद्वीपा च मेदिनी ॥

प्रज्ञाचक्षुर्हि धृतराष्ट्रः चक्षुरिन्द्रियरहितत्वेन बाह्यार्थान् प्रत्यक्षेण ज्ञातुमशक्तः सन् स्वस्य ज्ञानोपदेष्टारं समीपवर्तिनं संजयं प्रत्युवाच—

धर्मक्षेत्रे कुरुक्षेत्रे(. . . .)किमकुर्वत संजय ॥

धर्मस्य तत्त्वबुद्धेश्चाभिवृद्धिकारणे कुरुक्षेत्रे युयुत्सवः योद्धुमिच्छवः मामका मदीया दुर्योधनप्रभृतयः समवेताः सन्तः संयुक्ताः सन्तः किमकुर्वत किं कृतवन्त इत्यर्थः ।

End:

पार्थः अर्जुनः यत्र यस्मिन् पक्षे वर्तते तत्र तस्मिन् पाण्डवानां पक्षे श्रीः राज्यलक्ष्मीः विजयश्च परेभ्यः उत्कृष्टत्वेन भूतिः सकलसंपद्विस्तारः नीतिः न्यायश्च ध्रुवा अव्यभिचारिणी इति मे मतिः निश्चयः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रेन्द्रसरस्वतीपूज्यपादशिष्यश्रीराघवानन्दतीर्थविरचिता भगवद्गीतालघुव्याख्या समाप्ता ॥

अष्टादशोऽध्यायः ॥

श्रवणानन्तरं कार्यं मननं गुर्वनुज्ञया ।
मया कृतं हि गीताया मुमुक्षूणां हिताय च ॥

R. No. 1307.

Paper. 11×8⅝ inches. Foll. 277. Lines, 20 in a page. Telugu. Good.

Transcribed in 1913–14 from a palm-leaf MS. of M.R.Ry. Paṭṭābhirāmamūrti of Vizianagaram.

वर्त्तिकसारव्याख्यानम्.

VĀRTTIKASĀRAVYĀKHYĀNAM.

A commentary on Vidyāraṇyā's Bṛhadāraṇyakōpaniṣadvārttikasāra which is a summary of Surēśvarācārya's Bṛhadāraṇyakōpaniṣadvārttika.

Contains Adhyāyas 1 to 8.

Complete.

This manuscript is said to have been copied by one Acyutarāma, the copying having been completed on Friday the 5th day of the Bhādrapada in the year Pramāti.

Beginning:

यतो जगत उद्भूतिसम्भूतिपरिभूतयः ।
तं वन्दे राममात्मानं चिदानन्दघनं गुरुम् ॥
येनोद्धृतो वार्त्तिकाब्धेः सारो विबुधतुष्टिदः ।
अविद्यातज्जतापघ्नं विद्यारण्यं हरिं भजे ॥
पूर्वाचार्यान् लोकवन्द्यान् नत्वानन्दगिरीयतः ।
व्याख्या वार्त्तिकसारस्य लघु सङ्गृह्य लिख्यते ॥
मणयो मणितत्त्वज्ञैः सञ्चितास्तत्र केचन ।
बालिशेन समानीताः किं न ग्राह्यास्तदर्थिभिः ॥

इह खलु लोकानुग्रहैकसारतया सम्यग्ज्ञानप्रवर्तनप्रयोजनकृतशरीर-परिग्रहा विद्यारण्यश्रीचरणाः श्रीमत्सुरेश्वरवार्तिके सारं जिघृक्षवस्तत्राधिकारिविषयप्रयोजनानि निर्दिशन्ति—श्रीमदिति । इम इत्येनेन बुद्धिस्थाः साधनचतुष्टयसंपन्ना गृह्यन्ते ! आचार्येषु दृढभक्ता विवेकादिसंपन्ना द्रागनायासेन प्रत्यक्तत्त्वजिज्ञासवोऽत्राधिकारिणः । एतद्ग्रन्थाभ्यासजन्यब्रह्मात्मैक्यज्ञानाभिव्यक्तं तृप्तिशब्दितं निरतिशयं स्वरूपभूतब्रह्मसुखं फलम् । तदेवाज्ञातं सत् विषय इत्युक्तं भवति । अनेन प्रत्यक्तत्त्वानुसन्धानलक्षणं मङ्गलम(लं)कृतमिति ध्येयम् । उक्तसुखाभिव्यञ्जकज्ञानस्योपानिषद्वाक्यमात्रेण संभवात् किं नूतनकृतिकरणक्लेशेनेत्याशङ्क्योपक्रमादिलिङ्गैरुपनिषत्तात्पर्यानिर्णये जातमपि ज्ञानं नाविद्यानिवर्तनक्षममिति तदर्थमियं कृतिरर्थप्र(व)तीत्याह—संसारेति ।

End:

एतावत् एतावन्मात्रम् । यदेतन्नेति नेत्यद्वैतात्मदर्शकम् । इदमेव अरे मैत्रेय अत्र तत्त्वसाधनमिति ज्ञेयम् । त्वयेति । ह एवं किलात्र तत्त्वसाधनमात्मज्ञानं प्रियायै उक्त्वा यत्पूर्वं प्रतिज्ञातं प्रव्राजिष्यन्नस्मीति तच्चकार विजभा(हार)र प्रव्रजितवानित्यर्थः ॥

Colophon:

इति वार्त्तिकसारव्याख्याने सारसंग्रहे अष्टमोऽध्यायः ॥

R. No. 1308.

Paper. 11 × 8½ inches. Foll. 38. Lines, 20 in a page. Grantha Good.

Transcribed in 1913–14 from a palm-leaf MS. of M.R.Ry. Tiru. Śrīnivāsavaradatātācāriyar of Villiyambakam.

क्षत्रचूडामणिः.

KṢATRACŪḌĀMAṆIḤ.

A poem dealing with the story relating to a Jaina king named Jīvandhara, son of Satyandhara; by Vādībhasiṁha.

Contains the Lambhas one to eleven. Complete.

१. सरस्वतीलम्भः.
२. गोविन्दालम्भः.
३. गन्धर्वदत्तालम्भः.
४. गुणमालालम्भः.
५. पद्मालम्भः.
६. क्षेमसुन्दरीलम्भः.
७. कनकमालालम्भः.
८. विमलालम्भः.
९. सतीलम्भः.
१०. भूमिदेवीलम्भः.
११. मुक्तिलम्भः.

Beginning:

श्रीपतिर्भगवान् पुष्याद्भक्तानां वःसमीहितम् ।
यद्भक्तिःशुल्कतामेति मुक्तिकन्याकरग्रहे ॥

संक्षेपेण प्रवक्ष्यामि चरितं जीवकोद्भवम् ।
पीयूषं न हि निश्शेषं पिबन्नेव सुखायते ॥

श्रेणिकाप्रश्नमुद्दिश्य सुधर्मो गणनायकः ।
यथोवाच मयाप्येतदुच्यते मोक्षलिप्सया ॥

इहास्ति भारते खण्डे जम्बूद्वीपस्य मण्डने ।
मण्डलं हेमकोशाभं हेमाङ्गदसमाह्वयम् ॥
तत्र राजपुरी नाम राजधानी विराजते ।
राजराजपुरीसृष्टौ स्रष्टुर्या मातृकायते ॥
तस्यां सत्यन्धरो नाम राजाभूत्सत्यवाङ्मयः ।
वृद्धसेवी विशेषज्ञो नित्योद्योगी निराग्रहः ॥
महिता महिषी तस्य विश्रुता विजयाख्यया ।

* * * *

निष्प्रत्यूहेष्टसिद्ध्यर्थं सिद्धपूजादिपूर्वकम् ।
सिद्धमातृकया सिद्धामथ लेभे सरस्वतीम् ॥

Colophon :

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणिकाव्ये सरस्वतीलम्भो नाम प्रथमो लम्भः ॥

End :

श्रीरत्नत्रयपुण्याथ जीवन्धरमहामुनिः ।
अष्टाभिस्स्वगुणैः पुष्टोऽनन्तज्ञानसुखादिभिः ॥
सिद्धलोकोत्तराभिख्यां केवलाख्यामकेवलाम् ।
अनूपमामनन्तान्तामनुबोभूयते श्रियम ॥
एवं निर्मलधर्मनिर्मितमिदं शर्म स्वकर्मक्षय-
प्राप्तं प्राप्तुमतुच्छमिच्छतितरां यो वा महेच्छो जनः ।
सोऽयं दुर्मतकुञ्जरप्रहरणे पञ्चाननं पावनं
जैनं धर्ममुपाश्रयेत मतिमान् निश्श्रेयसप्राप्तये ॥
राजतां राजराजोऽयं राजराजो महोदयैः ।
तेजसा वयसा शूरः क्षत्रचूडामणिर्गुणैः ॥

Colophon:

इति श्रीमद्वादीभसिंहसूरिविरचिते क्षत्रचूडामणिकाव्ये मुक्तिश्रीलम्भो नाम एकादशो लम्भः ॥

परिसमाप्तं चेदं काव्यम् ॥

R. No. **1309.**

Paper. 11×9½ inches. Foll. 85. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a palm-leaf MS. of M.R.Ry. Krişnamācāriyar of Madura.

रहस्यत्रयसारप्रमाणसङ्ग्रहः.

RAHASYATRAYASĀRAPRAMĀṆASAṄGRAHAḤ.

Gives reference to the name and chapter, etc., of works from which quotations are cited as authorities in the Rahasyatrayasāra of Vēdāntadēśika. By Kauśika Śrīnivāsa, son of Śrīnivāsācārya.

Seems incomplete.

Beginning:

श्रीमदात्रेयनाथार्यान् गुरून् नः परमान् गुरून् ।

श्रीरामप्र . . . . ॥

. . साकं[शकटकटि] सहन्त्री शकटकटिकवेः पूतना शातनीया विश्वाविश्वासयुक्तान् जनमखिलमहं. . . . . जनिमदिति सुतान् लीलया पालयन्ती.

तुङ्गा. मङ्गल(ल्य)मूर्तिर्मे दिशतु मतिं वाजिरूपा वदान्या ॥

. . . . श्रीरहस्ये

सारे ग्रन्थे प्रतीतः प्रकटयितुमिदं मानुजातं समूलम् ।

. . . . कतकपादौ म. . . . . कौशिकश्री

वासाचार्यस्य पुत्रो माहतजनमुदे सङ्ग्रहीष्यन् क्रमेण ॥

रहस्यत्रयस्य व्याख्याने सारनाम्नि प्रगुणमहितं मानुजालं समूलं

तर्कभक्तचात . . . कुली . . . .

श्रीनिवासो घनगुरुकरुणाभूषितो दर्शयामि ॥
श्रीमान् वेङ्कटनाथार्यः (. .) सदा हृदि ॥
पापिष्ठः क्षत्रबन्धुश्च पुण्डरीकश्च पुण्यकृत् ।
आचार्यवत्तया मुक्तौ तस्मादाचार्यवान् भवेत् ॥
स . . . . मुदे ।
तमिमं सर्वसम्पन्नमाचार्यं पितरं गुरुम् ॥
अर्च्यमर्चितुमिच्छामस्सर्वे सम्मन्तुमर्हथ ।
. . . . शाध्याये च सहदेवः तमिममित्यादि ॥
श्रीविष्णुपुराणे पञ्चमेंऽशे प्रथमेऽध्याये—
. . . . परो गुरुः ।
ममाप्यखिललोकानां गुरुर्नारायणो गुरुः ॥
कृष्णं प्रति गाङ्गेयस्य ।

End:

ईदृशं परमं स्थानं निरयास्ते च तादृशाः ।
आरण्यपर्वणि पञ्चषष्टिशततमेऽध्याये—
अत्यर्कानलदीप्तं तत् स्थानं विष्णोर्महात्मनः ।
श्रीमहाभारते—
ततो महति पर्यङ्के . . . त्रिषु लोकेषु कश्चन ॥
श्रीरामायणे अयोध्याकाण्डे—
तं वैश्रवणसङ्काशमुपविष्टं स्वलङ्कृतम् ।
. . . . विनीतवान् ।

R. No. 1310.

Paper. 11 × 9½ inches. Foll. 63. Lines, 20 in a page. Dēvanāgarī and Malayalam. Good.

Transcribed in 1913–14 from a palm-leaf MS. of M.R.Ry. P. V. Seshu Ayyar, Professor of Mathematical Physics, Presidency College, Madras.

करणपद्धतिः.
KARAṆAPADDHATIḤ.

Similar to the work described under R. No. 663(*a*) *ante*. The original MS. of which this is a copy contains a Malayalam translation. The short stanza and the Malayalam passage introduce this translation.

Incomplete.

Beginning:

नूतनगृहसोमसुता रचितायाः करणपद्धतेर्विदुषा ।
भाषा विलिख्यतेऽस्मिन् बालानां बोधनार्थमल्पधियाम् ॥

കരണപദ്ധതിവ്യാഖ്യാനം ബുദ്ധികുറഞ്ഞവർക്കറിവാനായിക്കൊണ്ട് ഭാഷയാക്കി ചെയ്യുന്നേടത്ത വസ്തുനിർദ്ദേശം ഈശ്ലോകം. അനന്തരം ഗ്രന്ഥാരംഭത്തിങ്കൽ ആചാരിയൻ അവിഘ്നപരിസമാപ്തിക്കായിക്കൊണ്ട് ഗുരുവന്ദനം ചെയ്യുന്നു.

मदीयहृदयाकाशे चिदानन्दमयो गुरुः ।
उदेतु सततं सम्यगज्ञानतिमिरारुणः ॥

मार्ताण्डादिग्रहान् नत्वा तत्प्रसादाद्विलिख्यते ।
गुणहारगुणादीनां करणे कापि पद्धतिः ॥

नानाशास्त्रप्रगल्भस्तिलबलमसुसूक्ष्मं धयेद्राजदम्भो
भद्रोदन्तो धरेन्द्रो निरनिसृगधिसौख्यं वरिष्ठोऽभिषङ्गः ।
दोर्दण्डाग्रेऽद्रिनाथो विषमितविपिन(ने)चन्द्ररेखाम्बुखिन्ने-
न्यर्कादेः पर्ययास्स्युः क्षितिदिनमनृशंसः कलार्थी स मर्त्यः ॥

End:

कृष्णाष्टम्यां समारभ्य शुक्लाष्टम्याः पुरैव तु ।
शृङ्गोन्नतिं गणयितुमुपायोऽथ प्रदर्श्यते ॥
तिथिकोटिनरोन्वादिक्रमात कर्किमृगादितः ।
पन्नगा . . . निता मान्यैर्लब्धं स्यात्सितमानमान् ॥

R. No. 1311.

Paper. 11⅓ × 9⅛ inches. Foll. 187. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913–14 in continuation of the MS. described under R. No. 15 *ante* from a MS. of M.R.Ry. T. A. P. Śrīraṅgācārya of Tirupati.

Bound in two volumes.

रहस्यत्रयव्याख्या—तात्पर्यदीपिका.

RAHASYATRAYAVYAKYĀ : TĀTPARYADĪPIKĀ.

By Vīrarāghava. Same work as that described under R. No. 15 *ante*.

Contains the Dvayādhikāra in continuation of R. No. 15 *ante* to the end and the Caramaślōkādhikāra.

Incomplete.

End :

एकत्वमुपायप्रधानत्वादर्थपञ्चकव्यक्तिरुत्तमपुरुषेणाधिकारिप्रतिपादनादिति वाक्यार्थः ईशानामिति श्लोके दर्शितः ॥

Colophon :

इति श्रीशैलकुलतिलकश्रीमद्रामानुजगुरुसूनुना तच्चरणनलिनमधुव्रतेन श्रीनिवासरामानुजमुनिश्रीमच्छठारिसूरिनिर्व्याजकरुणासमधिगतनिखिलार्थतत्त्वयाथात्म्येन श्रीवीरराघवदासेन विरचितायां रहस्यत्रयविवरणटीकायां तात्पर्यदीपिकाख्यायां द्वयाधिकारो द्वितीयः ॥

ननु द्वयोक्तायाः प्रपत्तेः शरण्याभिमतिप्रकाशकश्चरमश्लोकः ।

* * * *

तत्त्वज्ञानमात्ररूपाया अपि पुरुषोत्तमविद्याया भक्तिसाध्यप्रीतिजनकत्वं स सर्वविद्भजति मामित्यादिना प्रतिपाद्यत इति भाषितत्वात् प्रशंसार्थमपि तस्या मोक्षसाधनतोक्तेति एतावता तदुक्तिः ।

R. No. 1312.

Paper. 10¾ × 9½ inches. Foll. 45. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Rāmakṛṣṇakavi of Vanaparti.

(*a*) वैराग्यतरङ्गः.
VAIRĀGYATARAṄGAḤ.

Foll. 1*a*—5*b*. Fol. 6 is left blank.

Deals with the nature of true renunciation, the means conducive to its practice and the good resulting therefrom. By Sunātha, son of Śēṣa-paṇḍita.

Complete.

Beginning:

परात्परगुरुं वन्दे चैतन्यामृतविग्रहम् ।
यस्यावलोकनेनैव गता संसारवासना ॥

अथ वैराग्यलक्षणम्—
दुःखमूलो हि संसारस्तत्र सौख्यं न विद्यते ।
वासना संसृतेर्मूलं तस्यास्त्यागो विधीयताम् ॥
अन्तरे वृत्तिरुत्पन्ना संसारस्य प्रवर्त(र्ति)का ।
तस्य निर्मूलनं कार्यं प्रकर्षेण मुमुक्षुणा ॥

End:

अतो(तः) कीटभ्रमरन्यायेन ब्रह्मानुसन्धानात् ब्रह्मैव भवति । तत्सृष्ट्वा । तदेवानुप्राविशत् । ब्रह्मविद्ब्रह्मैव भवति । ब्रह्मविदाप्नोति परम् । इति दृढानुसन्धाने जाते सति अन्तमतिः सा गतिः इति सिद्धान्तः ॥

Colophon:

इति पण्डितशेषोद्भवेन सुनाथेन कृतौ वैराग्यतरङ्गः समाप्तः ॥

(*b*) पञ्चाक्षरीमुक्तावली.
PAÑCĀKṢARĪMUKTĀVALĪ.

Foll. 7*a*—45*a*. Fol. 45*b* is left blank.

Gives details regarding the five-syllabled mantra relating to Śiva, such as its mode of meditation, the Hōma or sacrifice and the conduct of worship connected with it.

Complete.

Beginning:

प्रणम्य जगतामीशं विभुं साम्बं सदाशिवम् ।
गणेशं विघ्नहर्तारं गिरं विद्याकरान् गुरून् ॥

शिवपञ्चाक्षरीमन्त्रजपहोमार्चनादिकाम् ।
पद्धतिं तनुते शैवविद्वान् सिद्धेश्वराह्वयः ॥
बुद्धिजालैः समारूप्य शैवागमसमुद्भवः(वा) ।
सारोक्तिमौक्तिकानी(ली)ह स्रगिव ग्रथिता यतः ॥
अतः पञ्चाक्षरीमुक्तावलिरित्यभिधाय(न)कम् ।
लभते पद्धतिरियं शिवसंतोषकारिणी ॥
आदिसर्गे महादेवो जगन्निर्माणहेतवे ।
मन्त्रराजमिमं प्राह ब्रह्मणे रजआत्मने ॥
पञ्चाक्षराणि पञ्चास्यैरग्रहीत् पद्मजो यतः ।
पञ्चानामक्षराणां च समाहारोऽत्र कथ्यते ॥

End:

अथ स्रुक्स्रुवलक्षणम्—

श्रीपर्णीशिंशुपाक्षीरवृक्षेषु अन्यतमं हस्तमानं काष्ठं त्रिंशद्भागैर्विभज्य विंशत्यंशैर्दण्डमष्टांशैर्वेदीति निर्णयः । अत्रानुक्तमपेक्षितमन्यत् ग्रन्थान्तरतोऽवगन्तव्यमिति दिक् ॥

Colophon:

इति पञ्चाक्षरीमुक्तावली समाप्ता ॥

R. No. 1313.

Paper. 11×9½ inches. Foll. 83. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. Sundararājabhaṭṭācārya of Perukavāḷadān

वैखानसगृह्यसूत्रभाष्यम्.

VAIKHĀNASAGṚHYASŪTRABHĀṢYAM.

A commentary on the Vaikhānasagṛhyasūtra, which is described under No. 5, pages 6 and 155 of M. Seshagiri Śāstri's Report No. 2: by Narasiṁhavājapēyayājin.

Breaks off in the fifth Paṭala of the fourth Praśna.

Beginning:

विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥
श्रौतस्मार्तविदः प्रणम्य तदनु श्रीनारसिंहोऽग्निचित्
संमान्यः कृतवाजपेयसवनः सोऽहं यथा . . . ।

* * * *

अथ निषेकादिसंस्कारान् व्याख्यास्याम इति । अत्राथशब्दो मङ्गलार्थः । अत्र सूत्रस्य . . . . वेयुरिति रेतसा भार्यया तया निषिच्यते संसिच्यते इति निषेकः । स आदिः प्रथमो येषां ते ददे संस्कार . . . . तान्निषेकादिसंस्कारान् वि आख्यास्यामः । विशब्दो विशेषे विस्तारे वा । आङभिव्याप्तौ । ख्या प्रकथने . . . . स्यतासी लृलुटोरिति स्यप्रत्ययः । अतो दीर्घो यञीति दीर्घः ।

End:

एवमाहिताग्नेरर्धाधायिनः औपासनाग्नौ सर्वाधायिनो निर्मन्थ्ये लौकिके अग्नौ वा पाकयज्ञाः कर्तव्या इति विज्ञायते ॥

Colophon:

इति श्रीवाजपेययाजीये वैखानससूत्रभाष्ये चतुर्थप्रश्ने चतुर्थः पटलः ॥

अथ चतुर्थे पञ्चमः पटलः ।

अथ स्नानाद्यनुष्ठानानन्तरम् । अग्नौ तत्तदाश्रमोक्ताग्नौ ।

* * * *

काश्यपगोत्रमन्ध्रदेशं नीलवर्णं नीलाम्बरच्छत्रध्वजपताकोपशोभितं मकुटाद्याभरणान्वितं वरदाभयबाणधनुर्हस्तं गृध्रवाहनं सपरिवारं पश्चिमाभिमुखं सूर्यतनयं शनैश्चरमावाहयामि ।

R. No. 1314.

Paper. $10\frac{5}{8} \times 9\frac{1}{2}$ inches. Foll. 131. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Sundararāja-bhaṭṭācārya of Perukavāḻndān.

(*a*) वैखानससंहिता.

VAIKHĀNASASAṀHITĀ.

Foll. 1*a*—118*a*. Foll. 20*a*, 32, 35*b* to 38*b* and 42*a* are left blank.

This is a collection of portions from the several Saṁhitās of the Vaikhānasāgama. It deals with the consecration of the various divine images set up in Viṣṇu temples, with the mode of performing worship and festival to them, etc.

Contains the following Adhyāyas:—

मानव्ये भृगुप्रोक्तायां संहितायां क्रियाधिकारे महाशान्तिविधिर्नामाध्यायः.

वैखानसे भृगुप्रोक्ता . . . पात्रवासाधिकारे विष्णुप्रतिष्ठाविधिर्नाम षड्विंशोऽध्यायः.

वैखानसे वैदिके भार्गवसंहितायां वर्णाधिकारे चलनप्रतिष्ठाविधिर्नामाष्टाविंशोऽध्यायः.

वैखानसे भार्गवसंहितायां पुरातन्त्रे दीपदण्डप्रतिष्ठाविधिर्नाम षट्पञ्चाशोऽध्यायः.

वैखानसे भार्गवसंहितायां खिलाधिकारे अष्टसप्ततिरध्यायः.

वैखानसे अत्रिप्रोक्ते समूर्त्यर्चनाधिकारे विष्णुभक्तार्चनविधिः पञ्चपञ्चाशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायां यज्ञाधिकारे लक्ष्म्युत्सवविधिर्नाम द्वात्रिंशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायां खिलाधिकारे देवीस्नपनविधिर्नाम सप्तसप्ततिरध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायां वासाधिकारे ध्रुवबेरोत्सवहर्म्यनिष्कृतिश्चतुश्चत्वारिंशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायां वासाधिकारे उद्धृतप्रायश्चित्तविधिः पञ्चचत्वारिंशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायां वासाधिकारे कर्षणादिपुनःसंस्कारविधिः षट्चत्वारिंशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां पुरातन्त्रे दीक्षाप्रकरणं नाम त्रिषष्टितमोऽध्यायः.

वैखानसे भृगुप्रोक्तायाम् अर्चनाधिकारे मुद्राधारणविधिरेकोनसप्ततितमोऽध्यायः.

वैखानसे भृगुप्रोक्तायाम् अर्चनाधिकारे षड्विंशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायां प्रकीर्णकाधिकारे प्रतिष्ठाफलपुनःप्रतिष्ठाविधिः त्रिंशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायामर्चनाधिकारे विष्वक्सेनप्रतिष्ठाविधिः सप्तसप्ततिरध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायां निरुक्ताधिकारे द्वारपालप्रतिष्ठाविधिर्नाम षड्विंशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायां क्रियाधिकारे पीठप्रतिष्ठाविधिः . . .

वैखानसे काश्यपप्रोक्तायां संहितायां ज्ञानकाण्डे हनुमत्प्रतिष्ठाविधिरष्टाशीतितमोऽध्यायः.

वैखानसे भृगुप्रोक्तायां संहितायामुत्तरतन्त्रे अर्चनाधिकारे भक्तप्रतिष्ठालक्षणप्रतिमाविधिर्नाम दशमोऽध्यायः.

वैखानसे भृगुप्रोक्तायां प्रकीर्णाधिकारे उत्तरखण्डे विमानप्रशंसाविधिः सप्तसप्ततिरध्यायः.

वैखानसे भृगुप्रोक्तायां पुरातन्त्रे जयन्त्युत्सवविधिर्नाम सप्तदशोऽध्यायः.

Do. do. do. लक्ष्म्युत्सवविधिर्नामाष्टादशोऽध्यायः.

Do. do. वसन्तोत्सवसमाप्तिः.

Do. do. निरुक्ताधिकारे मासोत्सवविधौ कृत्तिकामासोत्सवविधिरष्टचत्वारिंशोऽध्यायः.

वैखानसे भृगुप्रोक्तायां वह्निपूजाविधिः.

Do. do. मानाधिकारे पञ्चामृतविधिर्नाम एकोनषष्टितमोऽध्यायः.

वैखानसे भृगुप्रोक्तायां वासाधिकारे तन्त्रसंकरबालस्थाननिर्देशो नाम त्रिचत्वारिंशोऽध्यायः.

वैखानसे भार्गवसंहितायां विष्णुप्रतिष्ठाविधिः समाप्तः.

Beginning:

अथ . . . केवलं होमामिति प्रोवाच पूर्ववत् रक्षेताग्निचिच्छिन्नं . . . . विप्रांश्च भोजयेत् ।

दद्यादाचार्यपूर्वेभ्यो दक्षिणां देवसंनिधौ ।

* * * *

Colophon:

इति मानव्ये भृगुप्रोक्तायां संहितायां क्रियाधिकारे महाशान्तिविधिर्नामाध्यायः ।

End:

ऋत्विग्भ्यो दक्षिणां दद्याद्यथाशक्ति हिरण्यकम् ।
नित्यार्चनं ततः कुर्याद्यावज्जीवमतन्द्रितः ॥

Colophon:

इति वैखानसे भार्गवसंहितायां विष्णुप्रतिष्ठाविधिः समाप्तः ॥

(*b*) नागप्रतिष्ठाविधिः.

NĀGAPRATIṢṬHĀVIDHIḤ.

Foll. 118*b*—121*a*.

Taken from the Parāśarasaṁhitā. Same work as that described under No. 3354 of the D.C.S. MSS., Vol. VI.

Incomplete.

(*c*) अपांप्रतिष्ठा.

APĀMPRATIṢṬHĀ.

Foll. 121*a*—123*a*. Fol. 123*b* is left blank.

By Śaunaka. Same work as that described under No. 5759 of the D.C.S. MSS., Vol. XII.

Complete.

Fol. 124*a* contains a few stanzas from Kṛkalāsaśānti.

(*d*) अष्टपादशान्तिः.

AṢṬAPĀDAŚĀNTIḤ.

Foll. 124*a*—125*a*.

On the ceremony to be performed for averting the evil consequences supposed to be due to the falling of a spider on the different parts of a person's body.

Complete.

Beginning:

अथातः संप्रवक्ष्यामि फलमष्टापदोद्भवम् ।
वत्सरे मृत्युमाप्नोति नरो ग्रन्थिविवर्जितः ॥
जन्मत्रये प्रत्यरे च वधे विपदिकेषु च ।
. . . मन्दवारे च शान्तिं कुर्याद्यथाविधि ॥
पक्षयोरुभयोर्जाते षण्मासान्मृत्युमाप्नुयात् ।
कक्षयोर्भ्रातृनाशः स्यादधरोष्ठे दरिद्रता ॥

चुबुके मातृनाशः स्यादुत्तरे व्याधिकृद्भवेत् ।
वृषणे च समुत्पन्ने भार्यापुत्रविनाशनम् ॥

तस्य शान्तिं प्रवक्ष्यामि मन्त्रौषधविधानतः ।
अष्टद्रोणं च धान्यं च तदर्धं तण्डुलं तथा ॥

End:

एवं कृते तु तच्छान्तिर्भविष्यति न संशयः ।
नो चेत्तत्फलमाप्नोति शान्तिहीननरो ध्रुवम् ॥

Colophon:

इत्यष्टपादशान्तिः समाप्ता ॥

(*e*) कूर्मप्रवेशशान्तिः.
KŪRMAPRAVĒŚAŚĀNTIḤ.

Fol. 125.

Similar to the work described under No. 3279 of the D.C.S MSS., Vol. VI.

On the ceremony to be performed for averting the evils believed to be due to the voluntary entering of a tortoise, crocodile or fish or wild animals in the granary of a man's house.

Incomplete.

Beginning:

कूर्मो नक्रोऽथवा मत्स्योऽप्यन्ये वा दुष्टजन्तवः ।
धान्यक्षेत्रे स्वयमेव प्रविशेद्यस्य वेश्मनि ॥

सद्यो मृत्युमवाप्नोति यो नरः शान्तिवर्जितः ।
क्षेत्रोद्भूतं च तद्धान्यं विप्रेभ्यो दानमुत्तमम् ॥

तत्र शान्तिं प्रवक्ष्यामि सर्वदोषापनुत्तये ।
पूर्ववत्सम्यगारभ्य शान्तिं प्रतिकृतिं तथा ॥

End:

अग्निं प्रतिष्ठाप्य स्वगृह्योक्तविधानेन मुखान्तं कृत्वा यतः पुरोडाशेति समिदन्नाज्याहुतिः सप्त कूर्मा . . . यधर्मराजायेति पूर्ववत् । उपहोमाः कृत्तिकाद्यश्विन्या.

Fol. 126 is left blank.

(*f*) गौलीपतनशान्तिः.

GAULĪPATANAŚĀNTIḤ.

Fol. 127.

Similar to the work described under No. 3295 of the D.C.S. MSS., Vol. VI.

Wants the beginning; otherwise complete.

Beginning:

. . . . ऊरुद्वयसुखं भवेत् ।
पृष्ठादिशिखिपर्यन्तं वर्धनं धनमेव च ।
जानुजङ्घे तथा हानिः केशान्ते (म)रणं ध्रुवम् ॥

* * * *

अशुभं वा शुभं वापि सचेलः स्नानमाचरेत् ।
पूर्णकुम्भं पुरःस्थाप्यावाह्य धान्याधिकासने ॥

End:

जप्तृभ्यो दक्षिणां दत्वा ब्राह्मणान् भोजयेत्ततः ।
सर्वदोषविनिर्मुक्तः सुखी स्यान्नैव संशयः ॥

Colophon:

इति गौलीपतनशान्तिः ॥

(*g*) सुप्तपतनशान्तिः.

SUPTAPATANAŚĀNTIḤ.

Fol. 127*b*. Fol. 128 is left blank.

Same work as that described under No. 3463 of the D.C.S. MSS., Vol. VII.

Incomplete.

(*h*) अशनिपातशान्तिः.

AŚANIPĀTAŚĀNTIḤ.

Fol. 129*a*.

Similar to the work described under No. 3240 of the D.C.S. MSS., Vol. VI.

Wants the beginning ; otherwise complete.

Beginning:

. . . . कुम्भरत्नानि निक्षिपेत् ।
कूर्चाम्रपल्लवैस्त्र्यक्षैः पिधाय च घटाननम् ।
ब्रह्मादिप्रतिमास्तेषु वस्त्रोपरि . . . . . ।

End:

सर्वोपकरणोपेतां प्रतिमां दक्षिणान्विताम् ॥
दत्वा विप्रवरेभ्यस्तु ग्रहान् पूज्य . . . . ।
ब्राह्मणान् भोजयेत्पश्चाद्यथाविभवविस्तरम् ॥

Colophon:

इत्यशनिपातशान्तिः समाप्ता ॥

Fol. 129*b* gives a list of various Sūtras attributed to different sages. Foll. 130 and 131 contain some stanzas from various Dharmaśāstras.

R. No. 1315.

Paper. 11 × 9½ inches. Foll. 121. Lines, 20 in a page. Grantha. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. S. Gōpālācārya of Villiyambākam.

(*a*) चतुर्विंशतितीर्थङ्करस्तोत्रम्.

CATURVIṀŚATITĪRTHAṄKARASTŌTRAM.

Foll. 1*a*—86*b*. Foll. 87—88 are left blank.

A eulogy on the twenty-four Tīrthaṅkaras of the Jinas. The mode of drawing the Yantra relating to the conduct of their worship is also given herein.

Complete.

Beginning:

श्रीमत्षोडशभावनापरिलसत्प्रज्ञाविधानं मह-
द्भूतानागतवर्तमानजिनपान् द्विःसप्ततिं भक्तितः ।

मुक्तिश्रीकुचकुम्भनिर्भरपरीरम्भा(न्) नमस्कृत्य च
वक्ष्येऽहं मुनिहृत्सरोजनिहितं तेषां पदप्राप्तये ॥

अथ यन्त्रोद्धारणक्रमः—

भूतानागतवर्तमानजिनपान् मध्ये महासद्गता-
न्य(न)ष्टाम्भोजदलेषु गुप्तिशुभकृद्दे(दाने)कादशोपासकान् ।
प्रोद्यच्छ्रीप्रतिमासुयोगदशधर्माख्यान् बहिः षोडश
प्रख्यातोज्ज्वलभावनापदगुणानालिख्य चाह्वानये ॥

ओं ह्रीं षोडशभावनायन्त्राधिप अत्रावतर ओं ह्रीं षोडशभावनायन्त्राधिपाय दिव्यं जलं निर्वापयामि स्वाहा ॥

End:

त्रिलोकलोकेश्वरतां गतोऽपि यः स्वकीयकायेऽपि तथापि नस्पृहः ।
स वर्धमानोऽन्त्यजिनो नताय मे ददातु मोक्षं मुनिपद्मनन्दिने ॥

* * * *

शुद्धज्ञानप्रकाशाय लोकालोकैकभानवे ।
नमः श्रीवर्धमानाय वर्धमानजिनेशिने ॥

Colophon:

इति चतुर्विंशतितीर्थंकरस्तोत्रं परिसमाप्तम् ॥

(*b*) नवग्रहशान्तिविधानम्.

NAVAGRAHAŚĀNTIVIDHĀNAM.

Foll. 89*a*—121*b*.

On the propitiation of the nine planets in accordance with Jainism.

Complete.

Beginning:

श्रीमज्जिनेन्द्रमभिवन्द्य जगत्त्रयेशं स्याद्वादनायकमनन्तचतुष्टयार्हम् ।
श्रीमूलसङ्घसुदृशां सुकृतैकहेतुं जैनेन्द्रयज्ञविधिरेष मयाभ्यधायि ॥

स्वस्ति त्रिलोकगुरवे जिनपुंगवाय स्वस्ति स्वभावमहिमोदयसुस्थिताय ।
स्वस्ति प्रकाशमहिमोज्ज्वलदिङ्मुखाय स्वस्ति प्रसन्नललिताद्भुतवैभवाय॥

* * * *

श्रीमत्सुरेन्द्रभवनेन्द्रनरेन्द्रबृन्दपूज्यं जिनेन्द्रमभिवन्द्य मुनीन्द्रवन्द्यम् ।
त्रैलोक्यनाथसवनाभ्युदये विनेयात् शान्त्यै करोमि कुसुमाञ्जलिमुत्क्षिपामि ॥

End:

स्वर्णस्य विश्राणनमेतदद्य सुवर्णलाभस्य सुवर्णकान्तिम् ।
सुवर्णतेजोपमपुत्रजातं वधूवराभ्यां नियतं ददातु ॥

वस्त्रप्रदानमन्त्रः—

भूयासं(त्सु)पद्मनिधिसंभवसारवस्त्रं भूयाच्च कल्पतरुकल्पितदिव्यवस्त्रम् ।
भूयात्सुरेश्वरसमर्पितसारवस्त्रं भूयात् त्वयार्पितमिदं च सुखाय वस्त्रम् ॥

Colophon:

नवग्रहशान्तिविधानं सपूर्णम् ॥

R. No. **1316**.

Paper. $11 \times 8\frac{7}{8}$ inches. Foll. 54. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. Nārāyaṇa-Śāstri of Tiruvadi.

The transcription of the original manuscript is said to have been completed on the 4th day of Āvaṇi (the Upākarma day of the Ṛgvēdins falling on that day) in the year Āṅgirasa.

शब्दकौस्तुभटिप्पणी.

ŚABDAKAUSTUBHAṬIPPAṆĪ.

A short commentary on Bhaṭṭōjidīkṣita's Śabdakaustubha, which is described under No. 1324 of the D.C.S. MSS., Vol. III.

Wants the beginning and contains up to the end of the first Pāda which contaius nine Āhnikas of the first Adhyāya.

Beginning:

विषयमिति । विषये कथिते तत्प्रतिरूपप्रयोजनमप्युक्तप्रायमिति भावः । प्रयोजनमाहेति कैयटोक्तं तु चिन्त्यम्, विषयाकथनेन न्यूनत्वादिति दिक् । द्योतका इति । इदं न साध्यम्, अनर्थकनिपातानामपि दर्शनात् । किंतु वाचकत्वाभाव इति । तदाह—नत्विति । प्रकृते च शब्दानुशासनपदस्य लक्षणा, प्रादिसमभिव्याहारे जिधातोः प्रकृष्टजयादाविव । केवलप्रयोगस्तु प्रादिवदेषामपि । एतेन वाचकपदसमभिव्याहाराभावात् अथशब्दस्य न द्योतकतेति परास्तम् ।

End:

बाहीकग्रामेभ्यः । दैवदत्त इति । देशबहिर्भूतेषु बाहीकेषु देवदत्तो नाम ग्रामः । तत्र भवो दैवदत्त इत्यर्थः ॥

Colophon:

इति श्रीशब्दकौस्तुभटिप्पण्यां नवममाह्निकं समाप्तम् ॥

साहितीसौहितीसंपत्परिमाणस्थिरीकृता ।
कृतं यट्टिप्पणं शब्दकौस्तुभस्यादिमस्य तु ॥

R. No. **1317.**

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 141. Lines, 20 in a page. Telugu. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Yajñanārāyaṇaśāstri of Challapalli in the Kistna district.

निर्णयरत्नदीपिका.

NIRṆAYARATNADĪPIKĀ.

A treatise laying down the method of preparing Indian calendars: by Rāmaliṅga, son of Liṅgārya and disciple of Narasiṁhaguru.

Apparently complete.

Beginning:

श्रीकरं श्रुतिनिभानिकेतनं शैलजाहृदयकञ्जरञ्जनम् ।
भक्तवाञ्छितमनोरथप्रदं भावयामि करुणानिधिं शिवम् ॥

शङ्करान्वयमणिं तपोधनं नारसिंहगुरुमार्यसेवितम् ।
विघ्नराजमथ सहधर्मचारिणीं भावयामि मदभीष्टसिद्धये ॥
द्राक्तत्केपल्लचन्वयभूषणस्य लिङ्गार्यवर्यस्य तनूभुवा मया ।
श्रीरामलिङ्गाख्यविचक्षणेन विरच्यते निर्णयरत्नदीपिका ॥
शिवं गौरीं हरिं लक्ष्मीं ब्रह्माणं च सरस्वतीम् ।
गुरुं विनायकं खेटान् नत्वा गणितमारभे ॥

तत्रादौ कलियुगगताब्दानयनमाह—

महीगजाहता षष्ठी गजवेदसमन्विता ।
प्रभवाद्यब्दसंयुक्ता भवेयुः कलिवत्सराः ॥

శకాబ్దాలు తెచ్చు ప్రకారం—

षाष्टिः कराक्षिगुणितं व्यपगतसंवत्सरेण संमिश्रम् ।
कलिगगनाब्धिसमेतं शकनृपकालं विजानीयात् ॥

* * * *

दैवज्ञनिदाने—

संवत्सरादिमेषादिसिंहादिकर्कटेषु च ।
तौलीनक्रधनुर्युग्मप्रवेशादिवसाधिपाः ॥
आर्द्राप्रवेशनाथस्य नाथाच्चाब्देषु नित्यशः ।
राजा मन्त्री च मासस्य रसनीरसनायकाः ॥

End:

अथ फाल्गुनकृष्णाष्टम्यां पूर्वापरयुक्तायां तिस्रोऽष्टका इत्युच्यते। तन्निर्णयः मार्गशीर्षकृष्णाष्टम्यामुक्तः । तदिहानुसंधेय इति फाल्गुनकृष्णाष्टमीनिर्णयः ॥

Colophon:

इति निर्णयरत्नदीपिकायां फाल्गुनमासतिथिकृत्यनिर्णयः ॥

R. No. 1318.

Paper. $9\frac{1}{3} \times 6$ inches. Foll. 12. Lines, 11 in a page. Grantha. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. V. Raṅganāthācārya of Tiruvadi.

व्युत्पत्तिवादव्याख्या.

VYUTPATTIVĀDAVYĀKHYĀ.

A commentary on Gadādharabhaṭṭācārya's Vyutpattivāda, which is described under No. 4290 of the D.C.S MSS., Vol. VIII.

Contains the Prathamāvibhaktyartha; incomplete.

Beginning:

शाब्दबोध इति । अत्र निरूपितत्वं सप्तम्यर्थः । तच्चसांसर्गिकविषयतारूपायां संसर्गमर्यादायामन्वेति । सा च तृतीयार्थाभेदे । स चाभेदो धात्वर्थविषयतायाम् । सविषयवाचकपदान्तरसमभिव्याहारस्थले विषयताया एव सविषयवाचकधात्वर्थत्वात् । सा च विषयता आख्यातार्थाश्रयत्वे अन्वेति । तच्चाश्रयत्वं संसर्गे । तथाच एकपदार्थानुयोगिकः अपरपदार्थप्रतियोगिकः संसर्गः शाब्दबोधनिरूपितसंसर्गत्वावाच्छिन्नविषयताश्रयतावान् इत्याकारकोऽन्वयबोधः ।

End:

सार्थकप्रत्ययान्तेति । संख्यातिरिक्तार्थप्रतिपादकेत्यर्थः । तेन पाकादिक्रियायाः संख्यार्थकसुप्रत्ययान्तधातूपस्थापकत्वेऽपि स्तोकः पाक इत्यादौ न स्तोका.

R. No. 1319.

Paper. $9\frac{1}{2} \times 5\frac{7}{8}$ inches. Foll. 16. Lines, 10 in a page. Grantha. Good.

Transcribed in 1913-14 from a MS. of M.R.Ry. Rāmasvāmi-Śāstri of Anaṅgānallūr.

क्षीरनदीमाहात्म्यम्.

KṢĪRANADĪMĀHĀTMYAM.

On the sanctity and religious importance of the river Pālār, which flows near Conjeeveram in the Chingleput district. The legendary account of the origin of the river is also given herein.

Complete; as found in the Brahmāṇḍapurāṇa.

Beginning:

तरङ्गिणीनां सर्वासां स्नानोपस्पर्शजं फलम् ।
त्वन्मुखाच्छ्रुतमस्माभिः सम्यक्पौराणिकोत्तम ॥
दुग्धनद्याः प्रभावस्य बुभुत्सा प्रेरते हि नः ।
कस्मात्सप्तर्षयः सम्यगाश्रित्य क्षीरवाहिनीम् ॥
तुण्डीरमण्डले काञ्च्याः पश्चिमे तु महत्तपः ।
तेपुः शिवं हृदि ध्याय तल्लिङ्गानि प्रपूजयन् ॥

* * * *

श्रीसूतः—

मुनीन्द्राः कथयिष्यामि शृणुध्वं सादरं मुदा ।
दुग्धनद्याः समुत्पत्तिं स्नानदानफलं च वै ॥

End:

श्रीसूतः—

एतादृशं हि भुवि दुग्धनदीप्रभावं
संक्षेपतो निगदितं भवतां समीपे ।
धन्योऽहमस्य पठनेन तथैव यूयं
धन्याश्च वीतकलुषाः श्रवणान्मुनीन्द्राः ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे क्षीरनदीमाहात्म्ये सनत्कुमारजमदग्निसंवादे क्षीरनदीमाहात्म्यवर्णनं नाम नवसप्ततितमोऽध्यायः ॥

क्षीरनदीमाहात्म्यं संपूर्णम् ॥

R. No. **1320.**

Paper. 9⅜ × 5¾ inches. Foll. 90. Lines, 10 in a page. Dēvanāgarī Good.

Transcribed in 1913–14 from a MS of M.R.Ry. V. Raṅganāthācārya of Tiruvadi.

(*a*) **मोक्षस्थितिनिरूपणम्.**

MŌKṢASTHITINIRŪPAṆAM.

Foll. 1*a*—43*b*.

This work purports to give in accordance with the principles of the Dvaita Vēdānta an idea of the state of final deliverance and the condition of the individual souls when they attain that state, The work is also called Muktāvalī. The author salutes in the first stanza—Pūrnabōdha Jayārya, Vidyādhīśa, Kēśavārya and Satyajaitra

Complete.

Beginning:

रमारमणमानम्य पूर्णबोधं जयार्यकान् ।
विद्याधीशं केशवार्यं सत्यजैत्रं गुरून्मम ॥
विस्तरेण कृते शास्त्रे श्रुतं गुरुमुखात्कियत् ।
स्मारं स्मारं यथाबोधं मोक्षस्थितिनिरूपणम् ॥
मुक्तिमुक्तावलीसंज्ञं केवलं बालबोधकम् ।
करिष्ये संग्रहेणाहं गुरुश्रीहरितुष्टये ॥

* * * *

यद्यपि सूत्रतद्भाष्यतट्टीकादिसर्वग्रन्थेषु मोक्षस्वरूपमुपवर्णितं तत्तद्विषये श्रुतिस्मृतीतिहासपुराणानि च कथितानि, तथापि विक्षिप्य विस्तरणाभिहितं न त्वानुपूर्वीविशेषेण संग्रहेण च।

End:

इत्येवं मोक्षस्वरूपक्रममात्रं सूत्रतद्भाष्यबहुग्रन्थानुसारेण विविच्य संग्रहेण कथितम् । तत्र तत्रावान्तरप्रमेयविवेचनेन वक्तव्यं तत्तदुपयोग्यधिकं प्रमेयजातं तत्रोदाहृतप्रमाणजातं च विस्तरभयादुपरम्यते । अतस्तदुभयं तत्रैवानुसन्धेयमिति संक्षेपः इत्यशेषमतिमङ्गलम् ॥

Colophon:

इति मोक्षस्थितिनिरूपणं समाप्तम् ॥

Fol. 44*a* gives the year of transcription, etc.

Fol. 44*b* is left blank.

(*b*) प्रमेयनवमालिकाव्याख्या—गूढभावप्रकाशिका.

PRAMĒYANAVAMĀLIKĀVYĀKHYĀ: GŪḌHABHĀVAPRAKĀŚIKĀ.

Foll. 45*a*—90*a*. Fol. 90*b* is left blank.

A commentary by Vēṅkaṭabhaṭṭa on the Pramēyanavamālikā, also called Aṇumadhvavijaya, which is a work by Nārāyaṇapaṇḍitācāry briefly dealing with the leading incidents in the life of Ānandatīrta. The work and the commentary are noticed in Burnell's Catalogue of MSS. in the Tanjore Palace Library.

Complete.

Beginning:

इन्दिरापतिमानम्य पूर्णबोधान् गुरूनपि ।
व्याख्यास्यामि यथाबोधं प्रमेयनवमालिकाम् ॥
इहान्वयमुखेनैव श्लोकार्थोऽपि निरूप्यते ।
गूढभावप्रकाशश्च क्रियते प्रीतये हरेः ॥

इह खलु संसारकान्तारसञ्चारोदर्कदुःखानलसन्तप्तानि सुजनकुसुमबृन्दान्यनुजिघृक्षुः नारायणपण्डिताचार्यः निखिलसन्तापशामकभगवत्प्रसादोन्मीलकभक्तिनिदानाखिलगुरुर्वायुभक्तिजनकतदवतारलीलानुसन्धानाय तल्लीलाः सञ्जिघृक्षुः आदौ हनुमदवतारलीलाः सङ्गृह्णाति—श्रीशेति । श्रीशस्य विष्णोः प्रीत्यै प्रीतये ङिति ह्रस्वश्च इति वा ङी(नदी)त्वम् ।

End:

इमां द्वात्रिंशच्छ्लोकोपेतामिमां द्वात्रिंशच्छ्लोका त्मिकां च दक्षां समर्थाम् । सर्वाभीष्टदोग्ध्रीं प्रमेयनवमालिकां प्रमेयनवमालिकानाम्नीं सतां श्रवणभूषणं कर्म भूषिताम् । किरणस्य लट् (?) । एष नारायणः नारायणपण्डिताचार्यः

व्यतनुत कृतवान् । लङ् । व्यतरद्यदिति पाठे दधार इति शब्दचरणस्य(?) लङः रूपम् । अयमेवार्थः यद्भूजृम्भणेन . . . . णादिकं भवेत् ।

तस्य श्रीमध्व . . स्य पादपद्मे समाश्रये ॥

Colophon :

इति श्रीवेङ्कटेशभट्टविरचिता व्याख्या गूढभावप्रकाशिका सम्पूर्णा॥

इति प्रमेयनवमालिका(मध्वविजय)व्याख्या गूढभावप्रकाशिका समाप्ता ॥

R. No. **1321.**

Paper. 9½ × 6⅞ inches. Foll. 14. Lines, 9 in a page. Dēvanāgarī. Good.

Transcribed from a palm-leaf manuscript of M.R Ry. R. Kṛṣṇamācārya of Madura.

पूर्वमिमांसाविषयसङ्ग्रहदीपिका.

PŪRVAMĪMĀṀSĀVIṢAYASAṄGRAHADĪPIKĀ.

This treatise gives briefly and succinctly the subject-matter dealt with in each of the Pādas of the several Adhyāyas of the Pūrvamīmāṁsā. By Appayadīkṣita.

Complete.

Beginning :

अथातो धर्मजिज्ञासेति सूत्रेण प्रमाणस्वरूपसाधनफलैः धर्मस्य विचारं प्रतिज्ञाय प्रथमेऽध्याये तस्मिन् प्रमाणं निरूपितम् । तत्र प्रथमे पादे साक्षाद्धर्मे प्रमाणभूतायाश्चोदनायाः पौरुषेयत्वाद्यप्रामाण्यहेतुशङ्कानिराकरणपूर्वकं तत्र प्रामाण्यमुपपादितम् ।

End :

याजनादिभिः ब्राह्मणो धनमार्जयेदिति द्रव्यार्जनशास्त्रेण ज्योतिष्टोमादिशास्त्रस्यर्त्विगपेक्षस्याविशेषेण त्रैवर्णिकानामार्त्विज्यमाक्षेप्तुं प्रवृत्तस्योपकारः शास्त्रप्रसङ्ग इत्येवमादिरूपेण द्वादशे सापवादः प्रसङ्गो निरूपितः ॥

Colophon:

इति धर्ममीमांसासारसंग्रहव्याख्या परिभाषा ॥ पूर्वमीमांसाविषयसंग्रहदीपिका अप्पयदीक्षितकृता समाप्ता ॥

R. No. **1322.**

Paper. $9\frac{5}{8} \times 6$ inches. Foll. 37. Lines, 11 in a page. Telugu. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. P. D. Raṅganāthācārya of Tiruvadi.

(*a*) एकादशीनित्यहोमनक्षत्रेष्ट्यादिनिर्णयः.

ĒKĀDAŚĪNITYAHŌMANAKṢATRĒṢṬYADI-NIRṆAYAḤ.

Foll. 1*a*—20*a*.

A treatise by Triyambaka, pupil of Kēśavācārya, laying down in accordance with the practice of Mādhvas how the daily offerings of certain class of sacrifices should be performed on the Ēkādaśī day.

Complete.

Beginning:

केशवार्यं गुरुं नत्वा ध्यात्वा तत्पादपङ्कजम् ।
स्मारं स्मारं तदुक्तार्थं तत्प्रसादानुरञ्जितः ॥
एकादशीनित्यहोमनक्षत्रेष्ट्यादिनिर्णयम् ।
मन्दानां सुखबोधाय तन्वे यज्ञेशतुष्टये ॥

ननु आण्डपिल्लोक्तरीत्या पञ्चत्रिंशद्दिनसाध्यासु प्रदीपाद्युक्तरीत्या द्वात्रिंशद्दिनसाध्यासु नक्षत्रेष्टिषु प्रवर्तमानासु मध्ये एकादशीप्राप्तौ तस्यामन्वहमेकैकेष्टिविधानेनावश्यं प्राप्तस्य तन्नक्षत्रेष्ट्यनुष्ठानस्य वैष्णवैः कर्तुमशक्यत्वात् कथं तस्यां तदनुष्ठानम् ।

End:

तस्मादुक्तविधया स्वल्पायामपि द्वादश्यां द्वित्रिनक्षत्रेष्ट्याद्यनुष्ठानोपपत्त्या द्वादश्युल्लङ्घनाप्राप्तेर्युक्तमेव पारणमिति न कश्चिद्दोष इति सिद्धम् ॥

Colophon:

इति श्रीमत्पाण्डुरङ्गस्य केशवाचार्यनिजशिष्यघोगरगांवत्रियम्बक-कृतमेकादशीनित्यहोमनक्षत्रेष्टिश्राद्धानां द्वादश्यामनुष्ठानादिसमर्थनम् ॥

(*b*) रघूत्तमगुरुस्तोत्रम्.
RAGHŪTTAMAGURUSTŌTRAM.

Foll. 20*b*—21*a*.

A eulogy on Raghūttamaguru, son of Rāghuvāryatīrtha who is one of the religious teachers of the Mādhvas.

Complete.

Beginning and End:

गम्भीराशयगुम्भसंभृतवचःसंदर्भगर्भोल्लस-
ट्टीकाभावविबोधनाय जगतां यस्यावतारोऽजनि ।
तत्ताद्दक्षदुरन्तसंततपःसंतानसंतोषित-
श्रीकान्तं सुगुणं रघूत्तमगुरुं वन्दे परं देशिकम् ॥
सच्छास्त्रामलभावबोधकिरणैः संवर्धयन्मध्वस-
त्सिद्धान्ताब्धिमनन्तशिष्यकुमुदजा(व्रा)तं विकासं नयन् ।
उद्भूतो रघुवर्यतीर्थजलधेस्तापभ(पाद्भ)यं त्रासयन्
यस्तं नौमि रघूत्तमाख्यशशिनं श्रीविष्णुपादाश्रितम् ॥
उद्यन्मार्ताण्डसंकाशं दण्डमालाकमण्डलुम् ।
धरं कौपीनसूत्रं च सीताराघवमानसम् ॥
श्रीनिवासेन वन्द्याङ्घ्रिं तुलसीदामभूषणम् ।
रघूत्तममुनिं वन्दे रघुवर्यपदार्चकम् ॥

Colophon:

इति श्रीरघूत्तमस्तोत्रं संपूर्णम् ॥

Foll. 22*b* and 23 are left blank.

(c) सर्वसमर्पणस्तोत्रम्.
SARVASAMARPAṆASTŌTRAM.

Foll. 24*a*—37*a*. Fol. 37*b* is left blank.

A eulogy on God Viṣṇu to whom a complete self-surrender is made herein in accordance with what is stated in the Bhagavadgītā; by Varakhēḍi Śrīnivāsa, son and disciple of Bālārya, who is himself a disciple of Satyavijaya.

Complete.

Beginning:

नारायणं नमस्कृत्य मध्वं जयमुनीन् गुरून् ।
विद्याधीशं सत्यजैत्रं साक्षान्मम गुरूनपि ॥
नत्वा वितन्यते किंचिद्गीताद्युक्तप्रकारकम् ।
बालार्यसूरिवर्याणां निजदासेन सूनुना ॥
वरखेड्युपनाम्नेदं श्रीनिवासाभिधेन तु ।
हरेः समर्पणस्तोत्रं मध्वमाधवतुष्टये ॥
नारायण नमस्तेऽस्तु लक्ष्मीरमण केशव ।
समस्तगुणसंपूर्ण सर्वदोषविवर्जित ॥

End:

श्रीसत्यविजयश्रीमद्गुरुराजनिषेविणाम् ।
बालार्यसूरिवर्याणां निजदासेन सूनुना ॥
श्रीनिवासेन रचितं वरखेड्युपनामिना ।
इदं समर्पणस्तोत्रं प्रीयेतां मध्वमाधवौ ॥

Colophon:

इति श्रीमत्सत्यविजयतीर्थगुरुराजशिष्याणां बालार्यसूरिवर्याणां निजदासभूतेन सुतेन च श्रीनिवासेन रचितं सर्वसमर्पणस्तोत्रं संपूर्णम् ॥

The scribe of the original manuscript adds –

लिखितं रङ्गनाथेन वरखेड्युपनामिना ।
तद्वंशजेन श्रीमन्तौ प्रीयेतां मध्वमाधवौ ॥

R. No. **1323.**

Paper. 9⅜ × 5¾ inches. Foll. 82. Lines, 10 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. P. D. Raṅganāthācāriyar of Tiruvadi, a village in the Tanjore district.

(*a*) **अल्पाक्षरत्वविचारः.**

ALPĀKṢARATVAVICĀRAḤ.

Foll. 1*a*—11*b*. Fol. 12 is left blank.

An investigation of the meaning of the expression Alpākṣara (least number of syllables) which is held to be an essential characteristic of the Sūtra form of Sanskrit literature and which occurs in the definition thereof, viz., **अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्.**

The author salutes in the beginning Pūrṇabōdha, *i.e.*, Madhvācārya.

Incomplete.

Beginning :

नमत्सुरशिरोरत्नरत्ननिर्यत्नानिर्गतैः ।
नीराजितपदाम्भोजं श्रीनिवासं भजेशुभैः(जेऽशुभिः) ॥
अन्यत्र व्रजतो वेदान् यो वै(प्णव)पदाम्बुजे ।
ब्रह्मसूत्रेण यो(ऽबध्नात्) वेदव्यासं तमाश्रये ॥
तस्करौघनिरासार्थं भाष्यशूराग्रगोऽन्तिके ।
सूत्राणां स्थापितो यैस्तान्पूर्णबोधान् गुरून् भजे ॥

ननु अल्पाक्षरमसंदिग्धमित्यत्राल्पाक्षरत्वं नाम यदि हीनाक्षरघटितत्वं तदा ब्रह्मसूत्राणां ब्रह्मविद्यात्वेन तद्घटकाक्षराणां वेदाक्षराणामिव परमपुरुषार्थप्रयोजकज्ञानप्रयोजकत्वेनाहीनत्वादसंभवः ।

End :

मोक्षजनकात्यर्थप्रसादहेत्वपरोक्षोत्पादकब्रह्मजिज्ञासेति [मोक्षरूपप्रयोजनसत्त्वाद्ब्रह्मजिज्ञासेत्यादिवाक्यघटकवर्णगताष्टादशत्वादिसंख्यानामिवोक्त - सिद्धित्वावच्छिन्नविषयकमोक्षरूपप्रयोजनवत्त्वज्ञानाभावदशायां मोक्षफलक] असर्वनामवाच्यवाचकं च भवदपि नासमस्तसर्वनामवाच्यवाचकमिति.

(b) ब्रह्मयज्ञकालमीमांसा.
BRAHMAYAJÑAKĀLAMĪMĀṀSĀ.

Foll. 13a—32b.

On the proper time for the performance of the Brahmayajña according to the view of the Mādhva school; by Varakhēḍi Timmappācārya, a disciple of Satyavijayatīrtha. The author is of opinion that it may be performed at any time between the morning and the evening but that it is good if performed in the noon time.

Complete.

Beginning:

वन्दे लक्ष्मीश्वरं कृष्णं सत्यजैत्रं जगद्गुरुम् ।
ब्रह्मयज्ञादिसंकल्पं वक्ष्येऽहं तु यथामति ॥

अथ ब्रह्मयज्ञतर्पणानुष्ठानकालो विचार्यते । अत्र केचिद्वदन्ति— अर्घ्यदानानन्तरमेव ब्रह्मयज्ञतर्पणं कृत्वा गायत्रीजपः कार्यः । तथाहि— . . . . . . दस्मृतौ — सर्वः . . . .

गायत्र्याघ्योञ्जलिं दत्वा ध्यात्वा कर्मगतं हरिम् ।

इत्यन्तमर्घ्यप्रकरणं कृत्वा तदनन्तरम्,

'मन्त्रतः परिवृत्याथ समाचम्य सुरादिकान् ।
तर्पयित्वा निपीड्याथ वासः . . . . . ॥'

इत्यन्तं ब्रह्मयज्ञप्रकरणम् ।

End:

यदा साधनद्वादश्यामपि उदयघटिकायामे ब्रह्मयज्ञाद्यनुष्ठानं तदा नित्यब्रह्मयज्ञे का विचारणेति । तस्माद्ब्रह्मयज्ञानुष्ठाने न काप्यनुपपत्तिरिति ।

सर्ववेदोदितो देवः समस्तगुणपूर्तिमान् ।
ब्रह्मयज्ञा(र्चि)तः कृष्णः प्रीयतां मे गुरुः सदा ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणविदामग्रेसराणां श्रीमत्सत्यविजयतीर्थसच्चरणा(नां) शिष्येण श्रीमद्वैष्णवसिद्धान्तप्रतिष्ठापकेन वरखेडि तिम्मप्पाचार्येण कृता ब्रह्मयज्ञकालमीमांसा समाप्ता ॥

ब्रह्मयज्ञकालमीमांसा समाप्ता ॥

(*c*) नारायणशब्दार्थविचारः.

NĀRĀYAṆAŚABDĀRTHAVICĀRAḤ.

Foll. 33*a*—53*a*.

Similar to the work described under R. No. 405 *ante*.

Complete.

Beginning:

यदुक्तं यद्यपीत्यनेन प्रसङ्गादित्यन्तेन नारायणशब्दस्य शिवसंज्ञात्वमेव सम्भवतीति, तदयुक्तम् ; शिवे नारायणशब्दप्रयोगादेरभावात् ।

न च कूर्मपुराणशिवसहस्रनामादौ शिवे नारायणशब्दप्रयोगोऽस्तीति वाच्यम् ; कूर्मपुराणादौ नारायणशब्दप्रयोगस्योपक्रमादिभिः विष्णुविषयत्वात् ।

End:

न च कणादमते जातेर्नित्यत्वेऽपि सिद्धान्ते जात्यनित्यत्वमभ्युपगम्यत इति वाच्यम् ; जात्यनित्यत्वाभ्युपगमेऽपि नित्यगतजातेर्नित्यत्वाभ्युपगमेन वर्णानां नित्यतया तद्गतजातेरपि नित्यत्वाभ्युपगमात् । तस्मान्नोक्तव्युत्पत्तिसम्भवः ॥

Colophon:

इति नारायणशब्दार्थविचारः ॥

(*d*) नारायणशब्दपक्षतावच्छेदकविचारः.

NĀRĀYAṆAŚABDAPAKṢATĀVACCĒDAKAVICĀRAḤ.

Foll. 53*b*—57*a*.

An investigation of the import of the expression "Nārāyaṇaśabda," when that expression is used as the minor term in a syllogistic reasoning seeking to establish that the expression denotes God Śiva.

Complete.

Beginning:

विजयीन्द्रमनोवासिमध्वमानसवासिने ।
शेषक्षितिभृदीशाय श्रीशाय नतिरस्तु मे ॥

अत्र किं पक्षतावच्छेदकम्? नारायणशब्दत्वं चेत् किं तत्, न तावत् नकारोत्तराकारोत्तररकारोत्तरयकारोत्तरणकारत्वम्; तस्य णकार एव विश्रान्तेः। तत्र च शिववाचकत्वस्याभावेन बाधात्। शिववृत्तिधर्मावच्छिन्नप्रतिपादकत्वाभावेनासिद्धेश्च ।

End:

एकशुद्धकाविशिष्टानां तदभिन्नाभिन्नत्वन्यायेन सर्वेषामेव समानवर्णारूढाविशिष्टानामभिन्नत्वस्यावर्जनीयत्वात् । तस्मात् पक्षतावच्छेदकं दुर्निरूपम् ॥

Colophon:

इति नारायणशब्दपक्षतावच्छेदकविचारः समाप्तः ॥

Foll. 57*b*—58 are left blank.

(*e*) तत्त्वविवेकटीकाव्याख्या—भावप्रकाशिका.

TATTVAVIVĒKAṬĪKĀVYĀKHYĀ: BHĀVAPRAKĀŚIKĀ.

Foll. 59*a*—82*b*.

A commentary on Jayatīrtha's Tattvavivēkaṭīkā which is described under No. 4786 of the D.C.S. MSS, Vol. X; by Vyāsayati, a disciple of Brahmaṇyatīrtha.

Complete.

Beginning:

अथ तत्त्वविवेकटिप्पणी प्रारभ्यते—

कमलारमणं नत्वा पूर्णबोधेष्टदैवतम् ।
व्याकुर्वे पञ्जिकां तत्त्वविवेकस्य यथामति ॥
स्पष्टार्थो य इह ग्रन्थः स न व्याक्रियते मया ।
ग्रन्थगौरवभीरुत्वान्न चोद्ग्रन्थो बहूच्यते ॥

तत्रादौ तावदित्यादि । तत्र वक्तव्यत्वेन बुद्धिस्थानामुद्देशलक्षणविभागपरीक्षाणां मध्य इत्यर्थः । द्विविधं परतन्त्रं चेत्यादिकरिष्यमाणोद्देशविभागयोर्विशेषविषयत्वादत्र क्रियमाणयोः सामान्यविषयकत्वान्न पुनरुक्तिरिति दर्शयितुं सामान्येनेत्युक्तम् ।

End:

अन्यथास्यामेव श्रुतौ अस्मिन् द्यौरित्यादिना द्युभ्वाद्यायतनत्वेनोक्तस्य विशिष्टस्य ब्रह्मणः तमेवैकं जानथ इति ज्ञानं न विधीयत इत्यर्थ इति ॥

इन्दिरातटिदाश्लिष्ट इन्द्रनीलसमद्युतिः ।
तापं हरतु मे कृष्णजीमूतोऽमृतवर्षणात् ॥

Colophon:

इति श्रीमद्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण व्यासयतिना विरचिता भावप्रकाशिका तत्त्वविवेकटीकाव्याख्या समाप्ता ॥

तत्त्वविवेकटीकाभावप्रकाशिका समाप्ता ॥

R. No. **1324.**

Paper. $9\frac{1}{2} \times 5\frac{3}{8}$ inches. Foll. 21. Lines, 9 in a page. Dēvanāgarī. Good.

Transcribed in 1913–14 from a MS. of M.R.Ry. Hariyācār of Paḻḻikoṇḍa, a village in the North Arcot district.

भागवतसंग्रहरत्नमाला.

BHĀGAVATASAṄGRAHARATNAMĀLĀ.

A summary in twelve Adhyāyas of the Śrībhāgavata, each Adhyāya giving succinctly what is treated of in a Skandha of the work from the point of view of a follower of Madhvācārya. In the opening stanzas the author salutes God Viṣṇu, Vyāsa, Purṇaprajña (Madhvācārya), Vijayadhvaja (Jayatīrtha) and Yadupati.

Complete.

Beginning:

रमापतिं हरिं व्यासं पूर्णप्रज्ञगुरूनपि ।
विजयध्वजं यदुपतिं व्याख्याकारान् नमाम्यहम् ॥

प्रथमस्कन्धमारभ्य व्यासप्रोक्ता च या कथा ।
द्वादशस्कन्धभरितां तां संकोचाद्वदाम्यहम् ॥
मङ्गलाचरणं प्रोक्तमधिकार्यादिवर्णनम् ।
सूतशौनकसंवादो हरेर्माहात्म्यवर्णनम् ॥

End:

शीघ्रबुध्यवरोहार्थं द्वादशस्कन्धसंग्रहः ।
वर्णितः कवयः सर्वे दयां कुर्वन्तु ते मयि ॥
द्वादशस्कन्धविटपकथासंग्रहमालिका ।
वेदव्यासस्य सुग्रीवे मालेव तु विराजताम् ॥

Colophon:

इति श्रीमद्भागवते द्वादशस्कन्धे संग्रहरत्नमालिकायां द्वादशोऽध्यायः ॥

R. No. 1325.

Paper. $8\frac{1}{8} \times 6\frac{3}{4}$ inches. Foll. 7. Lines, 15 in a page. Grantha. Good.

Presented in 1913-14 by M.R.Ry. P. Varadācāriyar of Pallikoṇḍa.

उत्तररङ्गमाहात्म्यम्.

UTTARARAṄGAMĀHĀTMYAM.

A work in poetry on the holiness and religious importance of the Viṣṇu shrine at Pallikoṇḍa, a village in the North Arcot district. It is said to have been narrated by Narada to Bhṛgu.

Complete in two Adhyāyas; as found in the Brahmāṇḍapurāṇa.

Beginning:

भृगुः—

कावेरीमध्यदेशस्थश्रीरङ्गातिशयः श्रुतः ।
माहात्म्यमपि कावेर्याः सर्वमुक्तं त्वयानघ ॥
श्रीमदुत्तररङ्गस्य माहात्म्यं श्रोतुमद्भुतम् ।
इच्छाम्यहं महाभाग यथावद्वक्तुमर्हसि ॥

श्रीनारदः—

अम्बरीष इति ख्यातः सर्वलक्षणसंयुतः ।
राजा तु सत्त्वसंपन्नः सदा तपसि सुस्थितः ॥
सर्वलोकेश्वरं विष्णुं साक्षात्कर्तुं महीपतिः ।
मतिं चकार पद्मिन्या नद्यास्तीरे तु दक्षिणे ॥
बीजाचल इति ख्यातो मेरुमन्दरसंनिभे ।
महागिरौ तपस्तप्तुं प्रारेभे स महीपतिः ॥

* * * *

आरामे रुचिरे क्षीरनदीतीरे तु दक्षिणे ।
पुंनागपटलाश्वत्थपारिजातादिशाखिभिः ।
मनोहरे प्रदेशे तु वल्मीकादागतो महान् ॥

End:

बहूनि वर्षाणि तदाम्बरीषस्तत्रैव संपूज्य रमासहायम् ।
भोगीन्द्रपर्यङ्कवरे शयानं दिव्यं पदं प्रापदतीव भक्तिमान् ॥
माहात्म्यमेतत्तु पठन्ति मानवा ये नित्यमत्रैव वसन्ति सत्तमे ।
क्षेत्रे तु मेऽप्यद्भुतशक्तिवैभवे स्वेष्टानि तेषां प्रभवन्ति सत्तम ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे भृगुनारदसंवादे श्रीमदुत्तररङ्गमाहात्म्ये द्वितीयोऽध्यायः समाप्तः ॥

R. No. **1326.**

Paper. 11×8¾ inches. Foll. 318. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1913–14 from a photographic copy which has been described under R. No. 798 *ante.*

Bound in two volumes.

महाभाष्यदीपिका.

MAHĀBHĀṢYADĪPIKĀ.

By Bhartṛhari. Same work as that described under R. No. 798 *ante.*

Wants the beginning. Breaks off in the seventh Âhnika of the first Pāda of the first Adhyāya.

R. No. **1327.**

Paper. $10\frac{7}{8} \times 8\frac{1}{2}$ inches. Foll. 14. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1913–14 from a MS. of the Library.

(*a*) अमृतनारायणकल्पः.

AMṚTANĀRĀYAṆAKALPAḤ.

Foll. 1*a*—4*a*.

On the mode of preparation of a medicine named Amṛtanārāyaṇakalpa held to be efficacious for the curing of eye diseases. It is stated herein that Bṛhadratha, son of Paribhadra, king of Kāśī, was afflicted with eye-diseases and was cured by using this medicine.

Complete.

Beginning:

शुक्लाम्बरधरं (. . . .) सर्वविघ्नोपशान्तये ॥
यस्य द्विरदवक्त्राद्या (. . . .) विष्वक्सेनं तमाश्रये ॥

सनत्कुमारयोगीन्द्रं सिद्धाश्रमनिवासिनम् ।
नारदः प्रणिपत्याथ वचनं चेदमब्रवीत् ॥
भगवन् योगिनां श्रेष्ठ सर्वतन्त्रविशारद ।
सर्वरोगहरास्त्वत्तः कल्पाश्च विविधाः श्रुताः ॥
इदानीमक्षिरोगस्य शान्तिं ब्रूहि तपोधन ।
इत्युक्तः स मुनिश्रेष्ठः सिद्धार्थः सर्वमन्त्रवित् ॥

सनत्कुमारः—

श्रृणु नारद सर्वज्ञ कल्पं नारायणाख्यकम् ।
अक्षिरोगहरं पुण्यमायुष्यं पापनाशनम् ॥

* * * *

काशीपुर्यां पुरा ब्रह्मन्नासीद्राजा सुधार्मिकः ।
पारिभद्र इति ख्यातस्तस्य पुत्रो बृहद्रथः ॥
अक्षिरोगेण रोगाणामाश्रयेणार्दितोऽभवत् ।
औषधैर्जपहोमाद्यैर्दानैर्नानाविधैरपि ॥
यदा शान्तिर्न तस्यासीदाययौ सनकस्तदा ।
तमागतं नृपः सम्यगभिवीक्ष्य मुदान्वितः ॥

End:

तस्मात्त्वमपि भूपाल इमं कल्पं यथाविधि ।
शान्तये चाक्षिरोगस्य कुरु नित्यमतन्द्रितः ।
इत्थं सनकवाक्यं तु समाकर्ण्य नराधिपः ।
कारयामास मुनिभिर्वसिष्ठप्रमुखैस्ततः ।
बृहद्रथस्तु तं पुत्रं मुक्तं . . . क्षिरोगतः ।
पुत्रपौत्रैः परिवृतो भुक्त्वा भोगांस्तथैव च ।
अधिकारावसाने तु प्राप विष्णोः परं पदम् ॥

Colophon:

इति श्रीपाञ्चरात्रे महोपनिषदि सनत्कुमारसंहितायां शान्तितन्त्रे अमृतनारायणकल्पो नाम चतुर्नवतितमोऽध्यायः ॥

(*b*) **नामत्रयविधानम्.**

NĀMATRAYAVIDHĀNAM

Foll. 4*a*—6*a*. Foll. 5*b*, 6*b* and 8*b* are left blank.

On the manner of repeating the three expressions denoting God Viṣṇu, viz., Acyuta, Ananta and Gōvinda, and on the efficacy of such a repetition.

Taken from the Brahmāṇḍapurāṇa. Breaks off in the second Paṭala.

Beginning:

मन्त्राणां चैव माहात्म्यं फलानि च पृथक् पृथक् ।
त्वत्तः श्रुतानि सर्वं तु कमलासनभाषितम् ॥
नामत्रयस्य माहात्म्यं श्रोतुकामा वयं प्रभो ।
. . . . नुग्राह्या वक्तुमर्हति शोभितम् ॥

ब्रह्मोवाच—

* * * *

अच्युतानन्तगोविन्दचतुर्थ्यन्तैर्नमोऽन्तकैः ।
पदैस्त्रिभिर्जपः काले मूलमन्त्र उदीरितः ॥

End:

अशुचिर्वाप्यनाचारो मनसा पापमाचरन् ।
शुचिरेव भवेन्नित्यं नामत्रयजपाद् द्विजः ॥

Colophon:

इति ब्रह्मप्रोक्ते नामत्रयविधाने प्रथमः पटलः ॥

ब्रह्मा—

विनियोगं प्रवक्ष्यामि यथावद्विजसत्तमाः ।
तस्मात्परतरं रक्षा रोगार्तानां विधीयते ॥

* * * *

इति गुह्यतमं प्रोक्तं रहस्यमतिदुर्लभम् ।
एवं ज्ञात्वा भवेत्स्वस्थः किंपुनः पाठतो जनाः ॥

(*c*) शंकरपादरक्षाप्रयोगप्रत्याम्नायः.

ŚAṄKARAPĀDARAKṢĀPRAYŌGAPRATYĀMNĀYAḤ.

Foll. 9*a*–14*a*. Fol. 14*b* is left blank.

Transcribed from a MS. of M.R.Ry. Muniratnam Ayyar of Virincipuram in the North Arcot district.

A satire against the Madhva detractors of Śaṅkarācārya.

Complete.

Beginning:

कृते(ता) तु मणिमञ्जरी जगति येन मूढात्मना
तदीयजननीभगे श्वपचबौद्धहूणादयः ।
खरोष्ट्रमहिषादयोऽप्य(प्य)तनुदीर्घमेढ्रोच्छ्रिता
यभन्तु मिहिताशयाः सततमागता निर्दयाः ॥

श्रीशंकरं हृदि ध्यात्वा तद्दूषणकृतां नृणाम् ।
पादरक्षाप्रयोगस्य प्रत्याम्नायं करोम्यहम् ॥

तेषां मध्ये तु मध्वाख्यो दुर्बीजप्रभवो यतः ।
अतस्तमेव संबोध्य यत्किंचिद्वक्ष्यतेऽधुना ॥

रे रे मध्वासतीसूनो त्वमसि च्छन्नभावनः ।
अदूष्यविषये दूष्यं मोघं यत् कल्पितं त्वया ॥

शिवोऽहमिति वक्तृणां शिवा चा(भा)र्या भवेद्यदि ।
गीताविभूत्यध्याये पाण्डवानां धनंजयः ॥

रुद्राणां शंकरश्चास्मीत्येवं वक्तुर्मधुद्रुहः ।
सुभद्रा पार्वती चोभे न भार्ये भवतः कथम् ॥

End:

सप्तगोदावरीतीरसंस्थितेन मयादरात् ।
रचिता शास्त्रमालोक्य वेदवित्सोमयाजिना ॥

यद्वक्त्रतोऽभून्मणिमञ्जरीयं तद्वाचि मेढ्रः(ढ्रं) सह मूत्रधारया ।
हस्तप्रयोगोत्थितरेतसा च प्रवेशयित्वा मिथुनं करोमि ॥

विजयन्ते परानन्दकृष्णपादरजःस्रजः ।
या धृता मूर्ध्नि जायन्ते महेन्द्रादिमहास्रजः ॥

Colophon :

इति शंकरपादरक्षाप्रयोगप्रत्याम्नायः समाप्तः ॥

R. No. 1328.

Paper. $8\frac{3}{4} \times 5\frac{1}{2}$ inches. Foll. 52. Lines, 8 in a page. Dēvanāgarī. Good.

Restored in 1913–14 from a MS. of the Library which has been described under R. No. 636(*a*) *ante*

(*a*) सुभाषितमञ्जरी.
SUBHĀṢITAMAÑJARĪ.

Foll. 1*a*—50*a*.

By Cakravarti Vēṅkaṭācārya. Same work as that described under No. 636(*a*) *ante*.

Complete in forty Paddhatis.

(*b*) मूषिकपञ्चकम्.
MŪṢIKAPAÑCAKAM.

Foll. 50*a*—51*a*.

By Cakravarti Vēṅkaṭācārya. Same work as that described under R. No. 636(*c*) *ante*.

Complete.

(*c*) वृश्चिकपञ्चकम्.
VṚŚCIKAPAÑCAKAM.

Foll. 51*b*—52*b*.

By Cakravarti Vēṅkaṭācārya. Same work as that described under R. No. 636(*b*) *ante*.

Complete.

R. No. **1329.**

Paper. 11 × 9½ inches. Foll. 164. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1913–14 from a MS. of the Library which has been described under R. No. 368 *ante*.

तन्त्रटीकानिबन्धनम्—अजिता.

TANTRAṬĪKĀNIBANDHANAM : AJITĀ.

By Paritōṣamiśra. Same work as that described under R. No. 368 *ante*.

Contains the third Adhyāya, the beginning being wanting.

AGENTS FOR THE SALE OF MADRAS GOVERNMENT PUBLICATIONS.

IN INDIA.

A. C. Bazzaud & Co. (Late A. J. Combridge & Co.), Madras.
R. Cambray & Co., Calcutta.
E. M. Gopalakrishna Kone, Pudumantapam, Madura.
Higginbothams, Ltd., Mount Road, Madras.
V. Kalyanarama Iyer & Co., Esplanade, Madras.
G. C. Loganadham Brothers, Madras.
S. Murthy & Co., Madras.
G. A. Natesan & Co., Madras.
The Superintendent, Nazair Kanun Hind Press, Allahabad.
P. R. Rama Iyer & Co., Madras.
D. B. Taraporevala Sons & Co., Bombay.
Thacker & Co., Ltd., Bombay.
Thacker, Spink & Co., No. 3, Esplanade East, Calcutta.
S. Vas & Co., Madras.
S.P.C.K. Press, Madras.

IN THE UNITED KINGDOM.

B. H. Blackwell, 50 and 51, Broad Street, Oxford.
Constable & Co., 10, Orange Street, Leicester Square, London, W.C.
Deighton, Bell & Co., Ltd., Cambridge.
T. Fisher Unwin, Ltd., 1, Adelphi Terrace, London, W.C.
Grindlay & Co., 54, Parliament Street, London, S.W.
Kegan Paul, Trench, Trübner & Co., Ltd., 68—74, Carter Lane, London, E.C., and 25, Museum Street, London, W.C.
Henry S. King & Co., 65, Cornhill, London, E.C.
P. S. King & Son, 2 and 4, Great Smith Street, Westminster, London, S.W.
Luzac & Co., 46, Great Russell Street, London, W.C.
B. Quaritch, 11, Grafton Street, New Bond Street, London, W.
W. Thacker & Co., 2, Creed Lane, London, E.C.
Oliver and Boyd, Tweeddale Court, Edinburgh.
E. Ponsonby, Ltd., 116, Grafton Street, Dublin.
W. Wesley & Son, 28, Essex Street, Strand, London.

ON THE CONTINENT.

Ernest Leroux, 28, Rue Bonaparte, Paris.
Martinus Nijhoff, The Hague, Holland.